हिन्दू-विश्वविद्यालयीय-नेपालराज्य-संस्कृत-ग्रन्थमालायाः

कुसुमम् ११

श्री भर्तृहरिविरचिता

# महाभाष्यटीका

( चतुर्थाह्निकपर्यन्ता )

भागः १

संपादकः

श्री वी० स्वामिनाथन्, एम्० ए०, एम्० लिट्०

प्राध्यापकः—केन्द्रीयसंस्कृतविद्यापीठः, तिरुपतिः

प्रधानसंपादकः

वासुदेवशरणोऽग्रवालः

वैक्रमाब्दम् २०२१ ]

[ प्रथमं संस्करणम्

Rs 10/50

Hindu Vishvavidyalaya Nepal Rajya Sanskrit Series

Vol. 11

# MAHĀBHĀṢYA ṬĪKĀ

BY

# BHARTṚHARI


Vol. 1

*Edited by*

V. SWAMINATHAN, M.A., M.Litt.
*Lecturer in Sanskrit,*
Kendriya Sanskrit Vidyapeetha, Tirupati.

*General Editor,*

Dr. V. S. AGRAWALA,
Banaras Hindu University.




1965

Thesis approved for the Degree of M. Litt. of the University of Madras in 1956.

Rs. 7/-

हिन्दू-विश्वविद्यालयीय-नेपालराज्य-संस्कृत-ग्रन्थमालायाः

कुसुमम् ११

श्री भर्तृहरिविरचिता

# महाभाष्यटीका

( चतुर्थाह्निकपर्यन्ता )

भाग १

संपादकः

श्री वी० स्वामिनाथन्, एम्० ए०, एम्० लिट्०

प्राध्यापकः—केन्द्रीयसंस्कृतविद्यापीठः, तिरुपतिः

प्रधानसंपादकः

वासुदेवशरणअग्रवालः

वैक्रमाब्दम् २०२१ ] [ प्रथमं संस्करणम्

नेपाल राज्य संस्कृत प्रकाशन मण्डल
काशी हिन्दू विश्वविद्यालय
वाराणसी–५

मूल्य ७)

मुद्रक—
लक्ष्मी दास
बनारस हिन्दू युनिवर्सिटी प्रेस,
वाराणसी–५

## FOREWORD

The TRIPĀDĪ is the name of the Commentary written by Bhartṛihari on the GREAT MAHĀBHĀṢYA of Patañjali which in itself is a big Commentary on the sūtras of Pāṇini and the vārttikas of Kātyāyana. Vardhamāna, the author of the Gaṇaratnamahodadhi (1140 A.D.), refers to Pāṇini (Śālāturīya), Śākaṭāyana (Śakaṭāṅgaja), Chandragomin, Jainendra (Digvastra), Bhartṛihari, Vāmana, Bhoja amongst a list of grammarians who have dealt with the two-fold topics of nouns and verbs. In his own Commentary he writes about Bhartṛihari as follows :

भर्तृहरिर्वाक्यपदीयप्रकीर्णकयोः कर्ता महाभाष्यत्रिपाद्या व्याख्याता च,

GRM. on Śl. 2,

i.e. 'Bhartṛihari was the author of the VĀKYAPADĪYA and PRAKĪRṆAKA and also of a Commentary on the Mahābhāṣya called TRIPĀDĪ'. The implication is that in the time of Vardhamāna the name 'Vākyapadīya' denoted only its first two Kāṇḍas and the third known as the PRAKĪRṆAKA was given the status of a separate book. Besides, the Commentary of Bhartṛihari on the Mahābhāṣya was called TRIPĀDĪ in the time of Vardhamāna most likely because it extended upto the first *three* Pādas of Adhyāya One of the Pāṇini's AṢṬĀDHYĀYĪ.

Kaiyaṭa (circa 1100 A.D.) in the beginning of his PRADĪPA Commentary on the Mahābhāṣya refers to Hari whose Commentary written in an abridged or summary style served for him like a bridge to cross the ocean of Patañjali's great work :

महाभाष्यार्णवावारपारीणं विवृतिप्लवम् ।
यथागमं विधास्येऽहं कैयटो जैयटात्मजः ॥
भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्तथा ।
छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम् ॥
तथापि हरिबद्धेन सारेण ग्रन्थसेतुना ।
क्रममाणः शनैः पारं तस्य प्राप्तास्मि पङ्गुवत् ॥

It appears that the reference in Kaiyaṭa is to the commentarial work on the Mahābhāṣya of Patañjali. The original name of

Bhartṛihari's Commentary, however has since been discovered as MAHĀBHĀṢYADĪPIKĀ. The extent of Bhartṛihari's Commentary on the Bhāṣya included an exposition on 14 Āhnikas viz., nine of pāda one and three of pāda two and two of the Pāda three of the first Adhyāya of the Mahābhāṣya. Kaiyaṭa seems to have had before him the complete MS. of this work and this is why he designates it as a *'Sāra'*.

Fortunately, this important work of Bhartṛihari, who was himself one of the greatest grammarians of this country, is preserved to us although in a single MS. and that too in a fragmentary condition which breaks off in the middle of the VII Āhnika. For a detailed notice of this unique MS. we are indebted to Dr. F. Kielhorn who wrote about it in the preface of Vol. II of his Mahābhāṣya edition (1883) as follows:

> 'Of Bhartṛihari's Commentary on the Mahābhāṣya no complete MS. has yet been discovered and for a knowledge of that work we therefore can only consult the fragments preserved in the Berlin Library'.
>
> "Bhartṛihari's Commentary is called in the Berlin MS. simply भर्तृहरि (or भर्तृहर)-टीका, or श्रीमहाभाष्यटीकाभर्तृहरि-विरचिता or श्री महोपाध्यायभर्तृहरिविरचिता श्री महाभाष्यदीपिका। The MS. of which the first two leaves are missing begins on fol. 3a in the midst of the explanation on लौकिकानां वैदिकानां च, and breaks off on fol. 218b in the midst of the Commentary on Pāṇini I.1.55".

During the course of my own researches on the Aṣṭādhyāyī and Mahābhāṣya and from the time of my acquaintance with the existence of this codex I had entertained the desire to see it in print some day. Some years ago I saw a photostat copy of the Berlin MS. in the Madras University Library. Thereafter Pt. Brahmadatta Jijñāsu, the doyen of Mahābhāṣya scholarship, announced the publication of this work and actually published two formes giving the text of the work and there the work ended without prospect of its being resumed. About a couple of years back I decided to print the whole of the

available text of the Mahābhāṣya Ṭīkā called Dīpikā or Tripādī by obtaining a transcript of its photostat from the Madras University. Just then Dr. V. Raghavan communicated to me that Shri V. Swaminathan, a student of his, had prepared an edition of this Commentary which had been approved for the M.Litt. Degree of the Madras University and that the same MS. could be made available to the Hindu University for publication in the Hindu Vishvavidyalaya Nepal Rajya Sanskrit Series. I accepted the arrangement with great pleasure. Accordingly the text of the Dīpikā as preserved in the Berlin MS. is now being presented to scholars. Owing to the bulk of the work and time taken in its printing it is being issued in two Vols., of which Vol. I with the text of the 4 Āhnikas is being issued here and the remaining portion of the text from V to VII Āhnikas with Editor's Introduction, will follow in near future. In the meantime I learn that Prof. K. V. Abhyankar of Poona has also prepared an edition of this text, two instalments of which have appeared in the Annals of B.O.R. Institute (pp. 1-80) upto the Pratyāhāra Sūtra—*hayavaraṭ* in the midst of Āhnika II.

Some years ago the Banaras Hindu University received from the Nepal Rajya a generous donation of Rs. One Lakh to be devoted to a pious purpose. It was gratefully accepted by the University and Pt. Govind Malviya, who was then the Vice-Chancellor, earmarked this sum for the publication of Sanskrit texts, their commentaries and translations, in a properly edited form. The Hindu Vishvavidyalaya Sanskrit Publications Board, appointed for this purpose, has decided that the Series be named Hindu Vishvavidyalaya Nepal Rajya Sanskrit Granthamālā.

The work of preparing critical editions of selected ancient texts has been taken up in right earnest and is in several stages of progress. Already about half a dozen volumes have been printed, and it is expected that in the coming years the work of the series will gain momentum. It is proposed to publish important Sanskrit texts which are either so far unpublished

or have become out of print since long, or deserve to be critically edited again on the basis of fresh MS. material, or which should be re-printed with a new interpretative approach. Basic scriptural texts of Hinduism like the Vedas, Brāhmaṇas, Śrauta-Sūtras, Dharma-Sūtras, Gṛihya-Sūtras, Charaṇa literature, Purāṇas, Upa-purāṇas, Epics, Dharma-Śāstras, Philosophical and Scientific literature with commentaries, as well as expositional works bearing on them will be specially taken up for new editions in this series.

Our thanks are due to Prof. V. Raghavan for making available this text of the Dīpikā as prepared under his direction by his student Shri V. Swaminathan M.A., M.Litt. Shri Swaminathan who was formerly assisting Dr. Raghavan in his New Catalogus Catalogorum work in the Madras University is now a Lecturer in the Central Sanskrit Institute, Tirupati. We express our deep gratitude to him for accepting whole-heartedly our proposal to get the work printed at B.H.U. and to take the trouble of reading the proofs.

I also offer my thanks to Babu Lakshmi Das, Manager, B.H.U. Press for speedy printing that he has done in spite of delays in returning proofs as they were being corrected at Tirupati and Madras for final print orders.

V. S. AGRAWALA,
*General Editor*,
Hindu Vishvavidyalaya
Nepal Rajya Sanskrit
Granthamālā Series.

*Banaras Hindu University.*
*15-3-65*

# PREFACE

This book represents the thesis for which the University of Madras awarded me the Post-graduate Degree of M.Litt. in 1956 and embodies the research work I did as a registered M.Litt. student of the Madras University under the guidance of Dr. V. Raghavan, Professor and Head of the Department of Sanskrit. It is now published with some minor changes and corrections.

Bhartṛhari belongs to that great age of Indian thinkers which may be said to have culminated in the appearance of Śaṅkara. He was an outstanding philosopher and a versatile genius and when we see the range of his mind and the richness of his exposition we can very well exclaim that in him the Mahābhāṣya of which it has been said महाभाष्यं वा पठनीयं महाराज्यं वा शासनीयम् found its truly befitting commentator.

The fragmentary Ms. of Bhartṛhari's Commentary on the Mahābhāṣya existing in the unique codex in Berlin has been known for years now. Stray notices of it have appeared and an attempt was also made to print it in a periodical named *Suprabhātam* in which 17 out of the 434 sheets of the photocopy of the Berlin Manuscript appeared in print. Realizing the importance of this work, it was suggested by my Professor Dr. V. Raghavan that I should take up an edition of the Bhartṛhari's Commentary on the Mahābhāṣya. A complet edition of the first four Āhnikas out of seven in the Codex is now being presented for the first time.

The method followed and the sources for comparative study have been set forth at the end of my introduction to be printed in Vol. II. wherein I have given an analysis of the contents of the work and also an estimate of Bhartṛhari's contribution to grammatic literature and his personality and place in the field of Śāstric literature.

I have based my work on the photostat copy of the Berlin Manuscript available in the Madras Government Oriental

Manuscripts Library. The available portion covering only the first seven Āhnikas of the Mahābhāṣya owing to the page limit fixed by the Madras University for the presentation of a thesis, I included the first four Āhnikas in what I submitted for my Degree, although actually I had prepared the whole of the text as available in the Berlin Codex.

I regret that some printing mistakes have crept in the text and I crave the indulgence of the learned scholars for this.

I must express my gratitude to the authorities of the Madras University for affording me facilities to prosecute higher studies under Dr. V. Raghavan, Professor and Head of the Department of Sanskrit, University of Madras and for obtaining for me permission to publish this thesis of mine. I am thankful to the authorities of the Madras Government Oriental Manuscripts Library for permitting me to use the above mentioned photostat copy of the Berlin Manuscript. I cannot give adequate expression to my gratefulness to Dr. V. S. Agrawala of the Banaras Hindu University for including this work in the Hindu Vishvavidyalaya Nepal Rajya Sanskrit Series and for making all arrangements necessary for printing.

Kendriya Vidyapeetha,
Tirupati,
*14-3-65.*

V. Swaminathan

# विषय-सूचिः


| विषयाः | | | पृष्ठाङ्काः |
|---|---|---|---|
| पस्पशाह्निकम् | ... | ... | १— ५५ |
| द्वितीयमाह्निकम् | ... | ... | ५६—१०९ |
| अइउण् | ... | ... | ५६— ६८ |
| ऋऌक् | ... | ... | ६९— ७६ |
| ए ओङ्। ऐ औच् | ... | ... | ७७— ९० |
| हयवरट् | ... | ... | ९१—१०३ |
| लण् | ... | ... | १०४—१०५ |
| ञमङणनम् | ... | ... | १०६—१०९ |
| तृतीयमाह्निकम् | ... | ... | ११०—१३० |
| इको गुणवृद्धी ( १।१।३ ) | ... | ... | ११०—१३० |
| चतुर्थमाह्निकम् | ... | ... | १३१—१७७ |
| न धातुलोप आर्धधातुके (१।१।४) | ... | ... | १३१—१३६ |
| क्ङिति च (१।१।५) | ... | ... | १३७—१४६ |
| दीधीवेवीटाम् (१।१।६) | ... | ... | १४७—१४९ |
| हलोऽन्तराः संयोगः (१।१।७) | ... | ... | १५०—१६० |
| मुखनासिकावचनोऽनुनासिकः ( १।१।८ ) | | ... | १६१—१६२ |
| तुल्यास्यप्रयत्नं सवर्णम् (१।१।९) | ... | ... | १६३—१७२ |
| नाज्झलौ ( ।१।१० ) | ... | ... | १७३—१७७ |

श्रीः

# श्रीमहाभाष्यटीका भर्तृहरिविरचिता

…पनार्थं वैदिकानां पृथगुपादानम्। प्राधान्यस्यापि हि सामान्येऽन्यन्तर्भूतस्य पृथगुपदेशो दृश्यते,[१] ब्राह्मणा आयाता वसिष्ठोऽप्यायात इति। अथवा[२] लौकिकानामित्येवमुक्ते लौकिकशब्दं सामान्यमपि विशेषे(ण) प्रतिपद्येत भाषाशब्दानामेवेदमनुशासनं, न वैदिकानां; यस्मात्ते हि नियतसंवेशाः प्रतिनियतप्रातिशाख्याः दृष्टानुविधित्वात्तेष्विति, अत उभयोरुपादानं—

**लौकिकानां वैदिकानां चेति।**

ननु[३] चैवमात्मकत्वे सति नानेनानुशासनं वैदिकानामिति। ये सन्ति प्रातिशाख्या लक्षणे (?)। पुरुषा(:) प्रमादादशक्तेर्वा[४] अपभाषन्ते[५]। अत इदमनुशासनम्। यथा[६] तैत्तिरीयाः कृतणत्वमग्निशब्दमुच्चारयन्ति। किंच ये च शब्दा अनाम्नाता अपूर्वस्याभिव्यक्तौ[७] व्याप्रियन्ते, तद्यथा—"संख्यया कपालान्युद्वासयन्ति" इति संख्याशब्दप्रतिपादितैः एको द्वौ त्रय उद्वासयन् शास्त्रेणानुशिष्टैरुद्वासयति; एवं येयमग्निहोत्रे "मानुषीव विदंकुरु" इत्यत्रापि विनियोगशब्दाः शास्त्रेणान्वाख्याताः प्रयोक्तव्या इति (वैदि)केषु व्यापारः। ये चान्येऽलब्धानुपूर्वीकाः[८] तेष्वपि व्यापारोऽस्ति। कथमिति? "शास्त्रपूर्वे प्रयोगे अभ्युदयः" (वा० ९, पस्पशा) शास्त्रात् विज्ञाततत्वा(त्) प्रयुज्यमाना(त्) धर्मः[९]।

**लौकिकास्तावत् गौरश्वः पुरुषो हस्ती ब्राह्मण[१०] इति।**

(इति:)प्रकारार्थः[११]। एवंप्रकारादौ [१२]अधिकृ(त)त्वाच्चान्वाख्यानस्य। लोके [१३]चानियतपौर्वापर्याणि वाक्येष्वथ यस्य नामेव (?) पदान्येवान्वाख्यायन्त इति लौकिकाः पदभूता एव निर्दिश्यन्ते। अपौरुषे(यत्वात्) वैदिकानां 'शम्'-आदयो न केवलाः प्रयुज्यन्त इति वाक्यान्येव निर्दिश्यन्ते[१४]। वाक्यस्थानामेवानुशासनं, न वाक्यानामेव। एतच्च सर्वं[१५] भाष्यकारस्य प्रयोजनानि वक्तुः प्रस्तावनामात्रम्। प्राक्प्रयोजनान्वाख्यानं अध्येतृप्रोत्साहनार्थमिति।

---

[१] Ms दृश्यन्ते
[२] Ms प्रथमा
[३] Ms मनु
[४] Ms-क्तेक
[५] Ms-षंतात
[६] Ms-सनीयया
[७] Ms व्यक्ति
[८] Ms न्येलब्धानुपूर्विकाः
[९] Ms धर्माः
[१०] Edn. हस्ती शकुनिर्मृगो ब्राह्मण
[११] Ms-र्था
[१२] Ms अधिक
[१३] Ms वा
[१४] Ms श्यते
[१५] Ms सर्वे

## अथ गौरिति ।

अवयवशब्दोऽयं बहुष्वर्थेषु अभिधादिषु एव निर्दिष्टः[१] यथा संस्कार-शब्दः शास्त्रान्तरे (एवम)नेकार्थ इति । शब्दानुशासनमिति शब्दशब्दः, तस्य यदि प्रसिद्धार्थे वृत्तिः कल्प्यते अनुशासनवैयर्थ्यमेव; लौकिके कर्तृसिद्ध[२] त्वाद्वै-
५ दिकानां च वेदे । तत्र यथैव कश्चित् "अथातो नि(:)श्वासप्रश्वासानां व्याख्या-स्यामः" एवं [३]ब्रुवन्ननर्थकं ब्रूयात् एवं शब्दानुशासनमपि । तस्मादत्र शब्द-शब्दः प्रसिद्धेऽर्थे न[४] भवति । एवं केषां शब्दानामित्यत्रापि । एवं गौरश्वः पुरुष इति । एवं शब्दशब्दो[५] यदि वार्थे(?) वृत्तः अनेनोपात्त(:) तस्य चाप्यनुशासनं[६] सति प्रयोजने । अथास्य कश्चिदन्यः पारि(भा)षिकः शब्दो-
१० ऽस्ति, यस्यानुशासनं क्रियते । स च न परिभाषां गच्छति ।

## गौरित्यत्र कः शब्दः ?

अथवा द्वौ भागौ शब्दस्य, स्वरूपभागः अर्थभागश्च । रूपभागेऽन्वा-ख्यानवैयर्थ्यात् द्वितीयो भाग आश्रीयते, तदन्वाख्यानात् शब्देन इति । यथा "धर्मं व्याख्यास्याम[७]" इति प्रस्तुत्य [८]द्रव्याद्युपदेशस्तत्प्रतिपत्तेरेव । अथापि
१५ वायं गौरिति शब्देन [९]द्रव्यादयः साहचर्यादुच्यन्ते । तत्र गौरित्येतस्मिन् (ये) सन्निविष्टास्तानुपन्यस्यति—

## किं यत्तत्सास्नालांगूलखुरककुद[१०]विषाण्यर्थरूपम् ।

[११]द्रव्यपदार्थिकस्य हि गोशब्दः केनचिद्धर्मेणासंसृष्टस्य निरुपाख्यस्य[१२] द्रव्यस्य, न तु विषाणादयः संसर्गिणः अर्थभेदकाः । अगोशब्दवाच्यस्य तु;
२० यथा गुडस्य माधुर्यं बाल्यसमान्धकारे(?) द्रव्यान्तरेभ्यो भेदकं गुडोऽयं नान्यद्रव्यमिति । **अर्थरूपं** गोपिण्ड[१३] इत्यर्थः ।

## नेत्याह । द्रव्यं नाम तत् इति ।

नेत्याह, नेदं गोशब्द इत्येव प्रसिद्धम्[१४] । किं तर्हि ? धर्मान्तरेण प्रसिद्धमिति । धर्मान्तरं च दर्शयति—

२५ [१५]**द्रव्यं नाम तदिति ।**

यथा संख्याया एकशेषो[१६] द्वाभ्यां निर्वर्त्यते, "संख्याया [१७]अर्थासंप्र-त्ययादन्यपदार्थत्वाच्चानेकशेष" (वा. १. २. ६४) इत्येवं[१८] किमिति द्रव्यस्य[१९]

---

[१] Ms एव । तच्च सर्वे भाष्यकारनिर्दिष्टो । [२] Ms-र्तृसद्ध [३] Ms ब्रुवन्तमर्थकं
[४] Ms सं [५] Ms-शब्दौ [६] Ms-शासने [७] Vaiśeṣikasūtra I-I-I.
[८] Ms इत्या [९] Ms इत्या [१०] Edn ककुदखुर [११] Ms प्रत्यप
[१२] Ms पार्थस्य [१३] Ms-रूपौ गोपीड [१४] Ms-द्धा [१५] Ms इत्यं
[१६] Ms कदेशेषो [१७] Ms अर्थसं [१८] Ms-त्येव [१९] Ms इत्यस्य

स्वां प्रसिद्धिमुत्सृज्य प्रसिद्ध्यन्तरेण च व्यपदेशः स्यात्? [1]द्रव्यानुशासनं चेद्विवक्षितमभविष्यत् एवमेवावक्ष्यत्, [2]द्रव्यानुशासनमिति।

**यत्तर्हि तदिंगितं चेष्टितं निमिषितमिति।**

इंगितं[3] नामाभिप्रायस्य सूचकः कश्चिदेव शरीरगतो विकारः। चेष्टितं कायपरिस्पन्द(:)। निमिषितमक्षिगताः क्रियाः। कथमासां शब्दत्वं मन्येत? [4]संभवित्वादासां क्रियाणां, संभवन्तीत्येता(:) क्रियाः गवार्थे[5]। अथवा जातेरेव गोत्वस्य क्रियात्वं, यथा सत्वेऽस्याः क्रियाशब्देनाभिधानमस्ति। यथैव गतं[6] गोत्वमेवमिंगितादयोऽप्यर्थत(:) महिषादिषु दृष्टं[7] व्युत्पत्त्यापि कर्मण्याश्रीयमाणे[8] गमिवत् विशेषणं[9] दुराख्यानं उपाददानो गच्छति गर्जति[10] गदति वा गौरिति[11]। एवं निमेषादयोऽपि शब्दत्वेन व्यपदिश्यन्ते। अत्रापि तामेव धर्मान्तरेण प्रसिद्धिमाह—

**नेत्याह। क्रिया नाम सेति। यत्तर्हि शुक्लो[12] नील इति।**

एषामपि संभवित्वात्। विशेषणं[13] चेंगितादिवदस्थानात्(?) भिन्ना(नि) गोविषयाणि शौक्ल्यादीन्यश्वविषयेभ्यः। अतश्च[14] भिन्नानि यदश्वः कर्कः शोणो[15] हेम इत्युच्यते, गौस्तु[16] शुक्लो रक्तो नील इति[17]। तथा [18]करणसाधनोऽप्येवं शक्यते कल्पयितुम्, गम्यते अनेनेति[19]। शुक्लादिभिश्च गम्यते अन्योऽयमस्मादर्थान्तरमिति[20]।

**नेत्याह। गुणो नाम सः।**

अत्राप्यन्यया बुद्ध्या कथनमर्थान्तरमिति[21]। "नेत्याह गुणो नाम स" इति न युक्तं, द्रव्यस्य[22] निर्देशात्। नैष दोषः। उभयवचनात्। शुक्लादयो द्रव्य(व)च(नाः)[23] प्रागुपन्यस्ताः[24], संप्रति गुणपरो निर्देश इति।

**यत्तर्हि [25]भिन्नेष्वभिन्नमिति।**

एकत्वं कथयति।

**छिन्नेष्वच्छिन्नमिति।**

नित्यत्वं जातेराह।

**सामान्यभूतमिति।**

---

[1] Ms इत्यनु [2] Ms इत्या [3] Ms गित [4] Ms संभावि
[5] Ms गतार्थो [6] Ms गत [7] Ms इष्टं [8] Ms श्रियमाणे
[9] Ms-षंण [10] Ms गर्जती [11] Ms गोरिति [12] Edn तच्छुक्लो
[13] Ms विशेषणा [14] Ms-श्चा [15] Ms कर्कशी शोणे [16] Ms गोस्तु
[17] cf MB I. 2. 71. [18] Ms वर्णसा [19] Ms-ते। न नेति [20] Ms-मिदिति
[21] Ms-रादिति [22] Ms इत्यस्य [23] Ms द्रव्यं च [24] Ms-स्तं
[25] Edn तद्भिन्ने

भूतशब्द उपमावाची। तत्र येषामर्थान्तरभूता जातिः तेषां विशिष्टेषु गोपिण्डेषु अनुवर्तमानं गोत्वं, तेषां सामान्यं नाश्वादीनां सर्वेषामिति तदपेक्ष-(या) उपमासम्बन्धः। येषां तत् द्रव्याणि च(?) तेषामपि (ये)भ्यो [1]भेदो नोपपद्यते तेषां परित्यागाद्यस्माच्च शक्या भेदप्रतीतिः तस्य चोपादानात् सामा-
५ न्यभूतमि[2]त्युक्तम्।

**नेत्याह। आकृतिर्नाम सा।**

आकृतिरिति (न) तत्संस्थानम्[3]। किं तर्हि ? जातिरेव। यथा "आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायनः" (वा. १. २. ६४) इति[4]। आक्रियते[5] अनयेति आकृतिः। आक्रियते[6] इति भिद्यते[7] पदार्थान्तरेभ्य
१० इत्याकृतिः। आक्रियेते बुद्धिशब्दावस्या इत्याकृतिः।

संप्रति [8]द्रव्यादिषु निरस्तेषु द्वयमपि स्थितं, समुदायार्थो[9] वा कश्चित्पारिभाषिकः (वा)। तत्र समुदायोऽपि [10]द्रव्यादिवत्समुदाय (इ)ति प्रसिद्धः, अन्यश्च पारिभाषिको नास्ति, प्रसिद्धस्य [11]चोपादाने वैयर्थ्य-मित्यतः पृच्छति—

१५ **कस्तर्हि शब्द इति। येनोच्चारितेनेति।**

अत्रानेकं दर्शनम्। केचिन्मन्यन्ते—यो वायमुच्चार्यते क्रमवाननरः(?) कश्चित्, अन्यः अक्रमः शब्दात्मा बुद्धिस्थो(र्थ) विगाहते तस्मादर्थप्रतिपत्तिः। कुतः ? यथैवार्थान्तरनिबन्धनो नार्थान्तरं प्रत्याययति एवं स्वरूपनिबन्धनो नोत्सहते प्रत्याययितुम्। अन्ये मन्यन्ते—यथा वर्णेषु वर्णतुरीया भागा
२० वर्णजातिं व्यंजयन्ति एवं वर्णा[12] वाक्यान्तरेषु ये क्रमजन्मानः अयुगपत्का-लास्ते[13]तां पदस्थां [14]जातिमभिव्यंजयन्ति। [15]वृक्षशब्दे(न) वृक्षत्वजाते-रर्थस्य[16] प्रतिपत्तिः। एतच्च अर्थस्वरूपं स्फोटोऽयमेव शब्दात्मा नित्यः। ये तु क्रमजन्मानः अयुगपत्काला[17] व्यक्तयो ध्वन्यात्मानस्ते इति। अन्ये मन्यन्ते—द्विशक्तिः[18] शब्दः, आत्मप्रकाशनेऽर्थप्रकाशने[19] च समर्थः यथा
२५ प्रदीपः आत्मानं प्रकाशयति [20]चार्थान् प्रकाश(य)ति। यस्त्वाध्यात्मिक इन्द्रियाख्यप्रकाशः स [21]आत्मानमप्रकाश(य)न् बाह्यमर्थं प्रकाशयतीति। अतो ग्रन्थो "येनोच्चारितेन" इत्युभयथा [22]वर्ण्यते; येनोच्चारितेन प्रकाशितेन, अथवा येनोच्चरितेनेति।

---

[1] Ms भेदेनो [2] Ms-न्यगुणत्वमि [3] Ms-स्थानां
[4] Ms भिव्यंजिका वाजिव्यायनमिति [5] Ms-यंते [6] Ms-येते
[7] Ms-न्ते [8] Ms इत्या [9] Ms-दायेभ्यो [10] Ms इत्या
[11] Ms वोपा [12] Ms वर्ण [13] Ms-गमयत। कलास्ते [14] Ms वर्णजात
[15] Ms वृक्षशब्दो [16] Ms-त्वं जाते अर्थस्य [17] Ms-पत्। काला [18] Ms द्वे शक्ति
[19] Ms नेयप्रकाशने [20] Ms त्वा- [21] Ms आत्मा तमप्र- [22] Ms वर्ण्यतौ

## अथवा प्रतीतपदार्थक इति ।

शब्द इत्येतस्य प्रतीतः पदार्थो ध्वनिः । [1]ध्वनिरस्याभिधेयः । ध्वनावयमर्थप्रकरणशब्दान्तराण्यन्तरेण स्वरूपं प्रतिलभते । [2]एतमेवार्थं पदग्रहणेन व्याचष्टे—पदस्यायमर्थो, नार्थो यो[3] वाक्यगम्य [4]इति । किमर्थं पुनरिदमुच्यते ? निर्णयस्य व्याकरणापाकरणाभ्यां[5] प्रकरणप्रवृत्तिदर्शनात्(?) । तद्यथा "कति भवतः पुत्राः ?" इत्युक्तसंस्थापूर्वं(?) संख्यामुपादाय प्रश्ने कृते[6] तस्या निर्णयो व्याकरणेनापाकरणेन वा । कश्चिदाह एको द्वौ बहव[7] (इ)ति । (अन्य आह)—एकोऽपि मे नास्ति । अयमपाकरोत्येव प्रश्नं, नैवायं प्रष्टव्य इति । एवमिहापि "गौरित्यत्र[8] कः शब्द" इति नैवायं प्रष्टव्यः । प्रसिद्ध्युपरोधात् य एव प्रसिद्धः शब्दस्तस्यैव शब्दशब्देन ग्रहणम् । प्रतीतपदार्थकतां च कथयति—

**शब्दं कुरु, मा शब्दं कार्षीः,**
**शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्[9] उच्यते ।**

तत्र ध्वनिं कुर्वन्नुच्यत[10] इतीदं, शब्दकार्ययमित्यस्य[11] संबन्धित्वेनोपात्तं, पूर्वयोस्त्वन्यत्प्रतिपत्तव्यम् । अथवा यो ध्वनिं करोति स नेष्यते शब्दं कुरु इति; एवं प्रवृत्तक्रियश्च प्रतिषिध्यते इति । ध्वनिमारभमाणश्च[12] प्रतिषिध्यते "मा शब्दं कार्षीः" इति । ननु च "ध्वनि(:) शब्दगुणः"(भा. १. १. ७०), एवं हि उक्तं—"स्फोटः शब्दो ध्वनिस्तस्य व्यायामादुपजायत[13]" इति । उच्यते—[14]द्रव्यादयो न भवन्ति शब्दाः, (इति) एवंपरायां चोदनायां ध्वनिशब्दयोरन्यत्वे प्रयोजनाभावादेकत्वेन व्यपदेशः । इतरः, न चेत् प्रसिद्ध्युपरोधः, य एव लौकिकः शब्दोऽसावेवाश्रीयते[15] । तस्य चेदमनुशासनं शास्त्रम् । शास्त्रे च या प्रवृत्तिरध्ययनं प्रति सा सत्यर्थित्वे (अर्थित्वं) च सत्सु प्रयोजनेषु । न चेदं नित्यकर्मावश्यं कर्तव्यं, नित्ये कर्मण्यप्रवृत्तावधर्मः अनित्ये तु[16] कामचारः । यदि च प्रयोजनान्यस्य न भविष्यन्ति ततः (न) प्रवर्तिष्यत इति पृच्छति—

**कानि[17] पुनरस्य[18] शब्दानुशासनस्य प्रयोजनानि ?**

**रक्षोहागमलघ्वसन्देहाः प्रयोजनम् ।**

सतोऽर्थस्यापायपरिहारो रक्षा नाम ।

---

[1] Ms ध्वनिः ध्वनि-  [2] Ms एवमे  [3] Ms-र्थया.
[4] Ms इति । शब्दः किमर्थं  [5] Ms स्या  [6] Ms प्रश्वेसृता ।
[7] Ms वहव  [8] Ms गोरित्यत्रे  [9] Edn कुर्वन् एवं उ-
[10] Ms-च्यत तत्र ध्वनिं कुर्वन् इतीदं  [11] Ms-स्या  [12] Ms-णे य
[13] Quoted in Bhartṛhari's Commentary on Vāk. I. 23.
[14] Ms इत्या  [15] Ms-श्रियते  [16] Ms-षु
[17] Ms किं  [18] Edn omit अस्य

**लोपागमवर्णविकारज्ञो हि [1]सम्यग्वेदाननुपालयिष्यतीति ।**

लोपोदाहरणं—"पीवोपवसनादीनां[2] छन्दसि लोपः" (वा. ६. ३. १०९)। "[3]पीवोपवसनानां पयोपवसनानाम्" (भा. ६. ३. १०९) इति । आगमः—नीत्वाया दुक् छन्दसि नीत्वा दुह्व[4] इति (?)। तथा "क्त्वो ५ यक्";[5] (सू. ७. १. ४७) "सौभाग्यमस्यै दत्वाय[6] अथा(स्तं) विपरेतन"[7] । [8]विकारः—"हृग्रहोर्भश्छन्दसि" (वा ८।२।३२)। "तत्कन्या सुकन्ये किमिति मां जीर्णमनर्थं जर्भुराणं[9] कृत्यारूपं[10] कामयसे[11]"। तथा "उद्ग्राभं[12] च निग्राभं (च) ब्रह्मदेवा अवीवृधन्[13]" । "[14]मधोः गृभ्णाति"[15]। क्वचित्स्वविकार आहृत्यानास्ततो(?) बाहुलकेन कृतं साधुत्वं, १० यथा[16] "त्रिष्टुभौजः [17]शुभितमुग्रवीरं[18]" सुहितमिति[19] प्राप्नोति। ननु चेह[20] लोपागमवर्णविकारा·····ग्रन्थस्य तथाभूतस्य पाठात् ज्ञाता[21] एव ? उच्यते—प्रयोक्त्रधीनत्वात्[22] प्रयोगस्य; प्रयोक्ता च[23] प्रमादात् करणदोषात्[24] विस्मरणाद्वान्यथोच्चारयेत्, सन्दिह्येत वा[25]। तज्ज्ञाश्चासन्निहिताः। सन्ति चान्यशास्त्रज्ञाः। वेदादन्युदुच्चारयन् [26]म्लिष्ट(मु)च्चारयेत्। अतोऽस्मिन्····· १५ सति नैव कश्चिदुपश्लिष्येत्।·····आत्मसंस्कारार्थं चाध्येयं व्याकरणम्। अतश्च सम्यग्ग्रहणम्। कृतात्मसंस्कारो हि सम्यग्वेदपरिपालने समर्थः।

**ऊहः खल्वपि ।**

प्रकृतौ समर्थानां विकारेषु सामर्थ्याभावा(त्)[27] प्रकृतिरुषादानर्थ-(क्ये)[28](?) प्रसक्ते शब्दान्तरं[29] लिंगवचनान्तरेण क्रियते। तद्यथा प्रकृतौ २० "अग्नय" इत्यग्निशब्दः समर्थो दृष्टः। तत्र विकारेषु(सूर्याय इति)ऊहः। एकदेशानिवृत्तौ[30] अधिक्रियायां मुख्यवृत्तिव्यतिक्रमेण वार्थान्तरोपादाने प्रसक्ते[31] अर्थान्तरवृत्तेरुपादानं क्रियते। तत्र यदि विकारः[32] तूष्णीमुपांशु क्रियते शब्दवती[33] प्रकृतिरशब्दो विकारः स्यात्। अथाप्यग्निशब्द एवोपादीयेत[34]

---

[1] Edn सम्यग्वेदान् परिपा [2] Ms-दिना [3] Ms पीयोपव
[4] Ms दुक्र [5] Ms नायक्, [6] Ms-यी
[7] Ms-परीतेना–; RV. X. 85. 33 [8] Ms-धिकार:
[9] Ms जर्बुराणं [10] Ms वृथारूपं [11] Cf ŚBr. IV. 1.5
[12] Ms उग्राभं [13] TS.I. 1.13 [14] Ms मध्ये
[15] Cf MB. I. 4. 9. [16] Ms कृतसां पुत्वः यया [17] Ms श्रुभि
[18] MS. III. 16. 4. [19] Ms त्रिशुभिनमिति [20] Ms चैह
[21] Ms कृज्ञाता [22] Ms प्रणेत्त्युधीतत्वात् [23] Ms व
[24] Ms कर्णदोषात् [25] Ms या [26] Ms श्लि [27] Ms-भावः।
[28] Ms-दानर्थे [29] Ms-र [30] Ms-देशापादने निवृत्तौ
[31] Ms-क्तिरर्थान्तरि व्या अर्था [32] Ms-रो [33] Ms-वतां [34] Ms-दीयते।

मुख्या वृत्ति(:) सूर्यार्थं न प्रतिपादयेत्। अथाप्यस्य गुणादर्थान्तरे सूर्ये [1]मुख्य-वृत्तिव्यतिक्रमेण प्रयोग[2] आश्रीयेत प्रकृतिविपरीतः शब्दप्रवृत्तिधर्म आश्रितः स्यात्। तस्मादत्र वाक्यान्तरमेतद्विभक्तिकमुपादीयते। आश्रयलिंगवचनभेदेन भवत्यूहः। तद्यथा—"देवीराप(:)[3] शुद्धा[4] यूयम्" "देव आज्य [5]शुद्धं त्वम्"। शुद्धमित्येतत्प्रथमान्तमव्यतिरिक्तप्रातिपदिकार्थं [6]यदामन्त्रितांत-मिति। विभक्त्यन्तराणामपि[7]—"आयुराशास्ते[8]" इति। आयुराशासाते[9] आयुराशासते[10] इति। येषां[11] तु प्रकृता(व)र्थं[12] विना सामर्थ्यं[13] नास्ति, तद्यथा—"[14]वायवस्थोपायवस्थ[15]" इति प्रकृतावेव बहुवचनेनै(को)वत्सो[16] विधीयते, [17]तत्रासामर्थ्यात् विकृतावूहो न भवति। तथैकस्मिन्नेव [18]प्रकृतिपाशे पाशानि(ति) बहुवचनान्तं[19] श्रूयते "अदितिः पाशान् प्रमुमोक्तु[20]" इति, तत्रापि विकृतावूहो नास्ति। वाजसनेयिनां त्वेकवचनान्तं[21] पठ्यते "अदितिःपाश[22]" मिति। तेषामूहः प्राप्नोति। यदि तत्रास्त्यदितिरथवा पाशेषु नोह इति। अनेन तु नैगमविभाषा, बहुवचने सति यथेष्टं प्रयोगो भवति। "जूरसि धृता मनसा[23] जुष्टा विष्णवे तस्यास्ते सत्यसव(स)[24]" इत्येवं वेदे स्त्रीलिंगेन पठितः। तस्मा(द्य)दा साद्यस्क्रेषु[25] "साण्डस्त्रिवत्सः सोमक्रयणो[26] भवति" तदा स्त्र्यर्थवृत्तितामनपेक्ष्यैवं पदानां पुमर्थाभिधायिनामदृष्टं वेदे पुंशब्द-मूहन्ते—"जूरसि[27] धृतो मनसा जुष्टो[28] विष्णवे तस्य ते सत्यसव(स)" इति। तथा राजक्रयणीसंस्तवे "[29]चिदसि मनासि धीरसि[30] दक्षिणासि यज्ञियासि क्षत्रियास्यदितिरस्युभयतःशीर्ष्णी[31] सा नः सुप्राची [32]सुप्रतीची भव[33]", "सा देवि[34] देवम(च्छे)हि[35]" इति स्त्रीलिंगेन पठितः साद्यस्क्रेषु पुंलिंगेनोह्यते[36] "चिदसि[37] मनोऽसि धीरसि [38]दक्षिणोऽसि यज्ञियोऽसि क्षत्रियो(ऽस्यदिर)स्युभयतःशीर्षा स नः[39] सुप्राक् सुप्रत्यग्भव", "(स)देव देवम-(च्छे)हि" इति। वाजसनेयिनस्तथैवैनमूहन्ते। तथा [40]सोमक्रयण्यानयनमन्त्रे

---

[1] Ms मुख्ये [2] Ms-गमाश्री [3] Ms हे वीराप
[4] MS. I. 1.11. [5] Ms शुद्धत्वं [6] Ms यदा मन्त्रे
[7] Ms-रेणामापि [8] Ms-शासत [9] Ms आकराशासने
[10] Ms आकाराशासन [11] Ms प्रेषां [12] Ms-तार्थं
[13] Ms साम्र्थ्यं [14] Ms वायवस्थापय [15] TS. I. 1. 1.
[16] ने तौवसो [17] Ms तत्र [18] Ms प्रकृति आरो
[19] Ms-नान्ते [20] MS. I. 2. 15. [21] Ms-नान्तः
[22] Ms-तिं जन [23] Ms रजरसि वृता मनस [24] MS. I. 2. 4.
[25] Ms-स्काषु [26] Cf TB.16.13 [27] Ms श्रीरसि
[28] Ms वृतोऽसि मनस जुष्टा [29] Ms विदसि [30] Ms धीरासि
[31] Ms शीर्णा [32] Ms षुप्र [33] MS. I. 2. 4.
[34] Ms सदैवि [35] MS. I. 2.4. [36] Ms-गेषु नोद्यते
[37] Ms विदसि [38] Ms रक्षि [39] Ms-तः [40] Ms सोमक्रयिण्या

स्त्रीलिंगानि पदानि—"वरूयसि[1] रुद्रास्यदितिरस्यादित्यासि चन्द्रासि[2]" इति। एतेषां साद्यस्क्रेषूहो भवति "वसुरसि रुद्रोऽस्यदितिरस्यादित्योऽसि चन्द्रोऽसि" इति। तथा[3] पशुप्रकृतौ पुंलिंगेन मन्त्रः पठितः "तरुच्चास्मत्प्रतिमुंचयति" (?)। तत्र यदा मूर्धन्ना(?)स्त्र्या[4] लभ्यते तदा स्त्रीप्रत्ययमूहन्ते—"ता अस्य प्रतिवेदय[5]" इति। तथा पशावेव "हुतो याहि पथिभिर्देवयानैः[6]" इति; ऊहे "हुता याहि पथिभिर्देवयानैः[7] इति। ऊह्यमानानां चामन्त्रत्वात् "मन्त्रे घसह्वर" (सू. २. ४. ८०.) इत्येवमादि न भवतीत्येके मन्यन्ते। कथं[8] तर्हि अ(घस्ता)मिति ? तथा पठितत्वाददोषः "इन्द्राग्निभ्यां छागेनाघस्तां[9] तं मेदस्तः[10] प्रतिपचताग्रभीष्टामवीवृधेतां[11] पुरोडाशेन"[12] इति। तस्मादच्चान्नित्यूहो [13]नास्त्यमन्त्रत्वादिति। एके मन्यन्ते—मन्त्रान्तराण्येवैतान्यूहविषयाणीति। अपरे मन्यन्ते—"अघसदघस्तामघसन्न[14] ग्रभीषु[15]रच्चान्निति[16]" ऊह्यप्रकरणे पठ्यते। तथाम्नाय एव—"घर्मस्य तपसा [17]तप्यध्व" मिति; "तप्यस्व तप्येथा" मिति क्वचिदूहो निर्दिश्यते। शाखान्तरेषु बहव ऊहितव्या भाव्यन्ते। एवमिदमूह्यमिदमनूह्यमिति न्यायादवस्थिते लिंगवचनविभक्तीनां सम्यग्विनियोगे व्याकरणस्य व्यापारः। "अंगानि ज्ञातिनामा(नि उपमा)[18] चेन्द्रियाणि[19] च। एतानि नोहं गच्छन्ति अद्भिगौ[20] विषमं हि तत्[21]"। [22]अद्भिगोस्त्वन्यत्र—"प्रशसा बाहू[23] शला दोषणी[24] कश्यपे [25]वांसाछिद्रे श्रोणी कवषोरू स्रेकपर्णा[26] अष्ठीवन्ता"[27]। तथाव्ययमनेकस्मिन्पशौ[28] द्विरभ्यस्यते[29]। अंगानि—"यत्पशुर्मायुमकृतोरो वा पद्भिराहत[30]। अग्निर्मा तस्मादेनसो विश्वान्मुंचत्वंहसः[31]" इति। "यत्पशू मायुमकृषातामुर(सी) वा[32] पद्भिराहसातां; यत्पशवो मायुमकृषतोरां(सि)वा[33] पद्भिराहसत"इति। ज्ञातिनामानि—"अन्वेनं माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्य[34]" इति। उपमा—"कश्यपे वांसाछिद्रे[35] श्रोणी कवषो(रू)[36]"। "श्येनमस्य वक्षः कृणुतात्[37]" इति। इन्द्रियाणि—"सूर्यं चक्षुर्गमयताद्वातं प्राणमन्व-

---

[1] Ms वरूयसि [2] MS. I. 2. 4. [3] Ms इति एतेषां ·····भवति तथा
[4] Ms-स्त्या [5] MŚS I. 8. 3. [6] MS. II.5.10. [7] Ms-याणेः
[8] Ms वाक्यं [9] Ms-घस्त्री [10] Ms-स्यः [11] Ms-मवावृधेतां
[12] MS. IV. 13. 9. [13] Ms मास्त्यमनुद्यादिति [14] Ms अद्यसदद्यसतामसद्यसन्न
[15] Ms-वक्ष [16] MŚS. V. 2. 9. [17] Ms तपध्व; MS. I. 1. 8
[18] Cf I. 24 [19] Ms चंद्रियाणि [20] Ms अद्विगौ
[21] Ms विषसंहितमम् [22] Ms अद्वि [23] Ms बाह्वे
[24] Ms-षिणी [25] Ms वा [26] Ms पसीं [27] Ms-न्तो; M8.IV. 13.4
[28] Cf MŚS.V.2.9. [29] Ms-स्येति [30] Ms-ते [31] MŚS. I. 8.3. TS.III.1.4
[32] Ms यत्पशुर्मायुमकृषात उरो वा [33] मत्तषातां उरो वा [34] MS. IV.13.4.
[35] Ms-द्रेः [36] Ms कवपेः [37] MS. IV. 13. 4.

वसृजतादन्तरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरीरमेकधास्य त्वचमाछ्यतात्[1] पुरा नाभ्या अपि शसो वपामुत्खिदतादन्तरेवोष्माणं वारयध्वात्[2]" इति। [3]तत्रोहप्रकरण एव "एषां माता पिता भ्राता सनाभिसंसर्गिशब्दा इत्येवमादीन्यनूह्यानि[4]" इति पठ्यते[5]। तथा अंगान्यपि "पाणिपादं शिरोग्रीवं सप्तप्राणा" इत्येवमादीनि परिगणितानि कैश्चित्। अथ अद्भ्रिगुः—"दैव्याः शमितार उत च मनुष्या आरभध्वमुपनयत मेध्यादुर आशासाना मेधपतिभ्यां[6] मेधं प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेनं माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्यः उदीचीनां[7] अस्य पदो निधत्तात् सूर्य चक्षुर्गमयताद्वातं प्राणमन्ववसृजतादन्तरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरीरमेकधास्य त्वचमाछ्यतात्पुरा[8] नाभ्या अपि शसो वपामुत्खिदतादन्तरेवोष्माणं वारयध्वात्[9] श्येनम(स्य) वक्षः कृणुतात्प्रशसा बाहू [10]शला [11]दोषणी कश्यपे वांसाछिद्रे[12] श्रोणी कवषोरू स्रेकपर्णा अष्ठीवन्ता[13] षड्विंशतिरस्य वंक्रयस्ता [14]अनुष्ठ्योच्च्यावयताद्गात्रं गात्रमस्यानूनं कृणुतादूवध्यगोहं पार्थिवं [15]खनतादस्रा रक्षः संसृजतात् वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाना नेद्वस्तोके तनये रविता रवच्छमितारः [16]अद्भ्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमद्भ्रिगो। अद्भ्रिगुश्च विपापश्च[17] देवानां शमितारौ। ता एनं[18] प्रविद्वांसौ श्रपयतं [19]यथास्य श्रपणं तथा[20]" इति ऊहन्ते। "उरुप्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथता[21]" मिति पुरोडाशप्रथनपरत्वात्सप्तदशस्वपि यजमानेषु यज्ञपतयः [22]प्रथन्तामित्यूहो न भवति। तत्रंतिकर्तव्यतोहे गीत्यूहे च नास्ति व्याकरणस्य प्रवृत्तिः। लोकतो लक्षणान्तराच्च[23] प्रातिशाख्यादिभ्यस्तौ[24] व्यवतिष्ठते[25] शब्दविषये तूहे यावान्व्याकरणस्य व्यापारः तत्र निदर्शनमात्रमभिहितम्। प्रकृतिविकारभावश्च प्रसिद्धो यत्र स एव विषय ऊह्यस्य;[26] न तु या दुस्त्यजा दुर्मतिभिस्थिवमजान्तरा(?) भिधानमात्रेण भवत्यूहः ततश्च "उभयेषां[27] त्वा देवमनुष्याणां प्रियां[28] करोमि[29]" इति यदि प्रकृतिकृतौ क्वचिदाम्नातो नैवायमूहस्य विषयः। यज्ञविषये हि काश्चित्प्रकृतयः काश्चिद्विकृतयः [30]काश्चित्प्रकृतयो विकृतयश्च, काश्चिन्न प्रकृतयो न विकृतयः। सर्वसोमप्रकृतिरग्निष्टोमः, [31]दर्शपूर्णमासयोश्च सर्वेष्टिप्रकृतित्वम्।

---

[1] Ms-छतात् [2] MS. वारयतात् [3] Ms ततोह [4] MSS. V. 2. 9.
[5] Ms पद्यते [6] MS-पतये [7] Ms-नं [8] Ms-छतायुरा
[9] MS-यतात् [10] Ms शिला [11] Ms दोषि [12] Ms-द्रेः
[13] Ms-वंसा [14] Ms अनुष्ठचाध्याव [15] Ms श्वन [16] Ms अद्रि
[17] Ms विपाश्शश्च [18] Ms तदेनं [19] Ms तथा [20] MS IV.13.4
[21] VS I. 22. [22] Ms प्रथता [23] Ms-न्नराच्च
[24] Ms-दितस्तौ [25] Ms ति [26] Ms-स्यं [27] Ms उभयथा
[28] Ms प्रियं [29] MS IV. 2. 13 [30] Ms क [31] Ms दर्शपौर्ण

## आगमः खल्वपि ।

पारंपर्येणाविच्छिन्न उपदेश आगमः, श्रुतिलक्षणः स्मृतिलक्षणश्च । कः पुनरसावागमः ?

## [1]ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोऽध्येयः ।

निष्कारण इति कारणमनुद्दिश्य, यथा नित्यानि कर्माणि कर्तव्यानीत्यकरणे तेषां प्रत्यवायः । यानि त्वनित्यानि कर्माणि, तद्यथा काम्यानि—"पुत्रकामो यजेत" इति,[2] "अन्नाद्यकामो यजेत" इति तेषामकरणे नास्ति प्रत्यवायः, अर्थित्वे सति प्रवृत्तेः । इदं तु व्याकरणाध्ययनं नित्यं कर्मावश्यं कर्तव्यमुपनयनादिवत् इत्येतत्प्रदर्श्यते[3] ।

## ब्राह्मणेन (अवश्यं) शब्दा ज्ञेयाः ।

अध्यापनं ब्राह्मणस्य वृत्तिः । [4]अशब्दज्ञश्च विश्लिष्टवाक्त्वे सति अगृहीतवाक्यत्वात् नोपगम्यत इति शब्दा ज्ञातव्याः । तेषां च ज्ञाने व्याकरणादन्यो [5]लघूपायो नास्ति । उपायो नाम कार्यनिर्वृत्ति[6] प्रति यः कारणानां विन्यासविशेषः । तस्माद्व्याकरणम् लघुरुपायः शब्दज्ञानं प्रति, अन्य उपाय एव न संभवति । तस्मादध्येयं व्याकरणम् । अथवा [7]अचिरकालसंप्रतिपत्तिर्लाघवम् । तस्य व्याकरणमुपायः ।

## याज्ञिकाः पठन्ति—[8]स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति

"पृषती क्षुद्रपृषती स्थूलपृषती (ता) मैत्रावरुण्य[9]" इति वेदे पठ्यते । तत्र यः[10] पृषतीसन्निधाने स्थूलशब्दः, पृषतां विशेषणं न प्रतिपद्यते; पृषद्विशेषणे हि सति व्यक्तमन्यपदार्थत्वम् । स्वरभेदा(द)र्थभेदं वैयाकरणाः प्रतिपद्यन्ते[11] । तस्मिंश्च कर्मणि यस्याः स्थूलानि पृषन्ति लभ्यन्ते तत्र वैयाकरणैस्त्वसन्देहेन पूर्वपदप्रकृतिस्वरेण बहुव्रीहिरेवात्र निश्चित इति ।

## इमानि च भूय(:) शब्दानुशासनस्य प्रयोजनानि ।

भूय(श्)शब्दः पुनरर्थः, इमानि पुनरपराणीत्यर्थः ।

## तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः ।

अयमर्थवादो [12]म्लेच्छनस्य निवृत्त्यर्थ उपादीयते । अर्थवादस्तु प्रवर्तको निवर्तको वा निवादः । (प्रवर्तकः)–"[13]सर्वा(वा)इमा दिशः पशुयाज्यभिजयति[14]

---

[1] Ms बाह्मणेन  [2] Ms यनोनति  [3] Ms रसे तत्प्रदृश्यते
[4] Ms अपश  [5] Ms लघु  [6] Ms-निवृत्ति  [7] Ms अविरकाला
[8] Ms स्थूलपृशती  [9] MS III.13.3.  [10] Ms यत्पृ  [11] Ms-पद्येते
[12] Ms म्लेछेन  [13] Ms पूर्वा  [14] Ms पशुव्यासृभिर्जायन्ते

स(र्वाँल्लोकान्) सर्वा एवास्मा इमा दिशोऽभिजिता[1] भवन्ति [2]सर्वे लोकाः[3]"। निवर्तको—"न दतो[4] गमये(त्) यद्दतो[5] गम(ये)त्सर्पा एनं घातुकाः स्युः सर्पानेव[6] शमयत्यहिंसायै[7]"। यस्मात्त एवं कुर्वन्तः पराभूताः,

**तस्माद्ब्राह्मणेन न [8]म्लेच्छितवै।**

न [9]म्लेच्छितव्यं, "कृत्यार्थे तवै" (सू. ३. ४. १४) इति। किं [10]पुनर्म्लेच्छनमिति? अत आह—

**नापभाषितवै।**

अपभाषणं म्लेच्छनम्[11]। किं पुनरत्रासुरैरपभाषितम्? तत्र केचिदाहुः—"हैहेप्रयोगे हैहयोः" (सू. ८. २. ८५.) इति प्लुतो न कृत इति। अपरे ब्रुवते—कृतः प्लुतः, किन्तु स्वरसन्धिः कृतो न प्रकृतिभाव इति। अपर आह—हेलयो हेलय इति (वाक्य)द्विर्वचनं कृतमिति। अपरे—[12]अर्तिर्लृका(रा)दिरयं न भवति [13]शिष्टाप्रयुक्तत्वात्; तेषां तत्र [14]लत्वमपभाषणमिति। अथ किमर्थमेवमुपसंहरति—म्लेच्छा[15] मा भूमेति, न पुनर्मा पराभूमेति? उच्यते—उक्तमेव, अर्थवादोऽयं अम्लेच्छनं[16] विधीयमानमिति। अपरे वर्णयन्ति—यस्मात् हेतोस्तेषां पराभवस्तस्य [17]त्यागादपराभवोऽप्युक्त इति। कः पुनरसुराणां पराभवः? प्रत्यवाययोगः। [18]यद्योगा(द्)द्यापि नोत्तिष्ठन्ति। यैरपि पुत्रपौत्रैरसुराणां न प्रयुक्तः तेऽपि पराभूताः। तस्माद्यथा असुरा एवं वयमपि मा पराभूमेत्यध्येयं व्याकरणम्।

**दुष्टः शब्दः स्वरतो वर्णतो वा।**

आद्यादित्वात्तसिः। स्वरवर्णाभ्यां दुष्टः। [19]यश्चाभ्यां दुष्टः स उच्यते

**मिथ्याप्रयुक्त इति।**

स एवं भूतो

**न तमर्थमाह।**

स

तदर्थमनभि (दध)द्

**वाग्वज्रो यजमानं हिनस्ति।**

---

[1] Ms भिभजिता
[2] Ms सर्व–
[3] Ms III. 9.5.
[4] Ms हनतो
[5] Ms यदृतो
[6] Ms-व चं श-
[7] Ms-सा ये; MS I.8.5.
[8] Ms-म्लेछि–
[9] Ms-म्लेछि–
[10] Ms पुनम्लेंछ–
[11] Ms-छनं
[12] Ms लपिर्ल
[13] Ms शिष्ट
[14] Ms लत्वमपलापण-
[15] Ms-छा
[16] Ms-छनं
[17] Ms त्यागादपरोभावो–
[18] Ms यत्या
[19] Ms पश्वाभ्यांदुष्ठः

[1]वागेव (व)ज्रो वाग्वज्रः। असावेनसो योगात्, तेन [2]चैनसा प्रयुक्तोऽमुत्र प्रत्ययात् हिंसितो भवति; यजमानो हीज्यायां प्रधानम्। अथवा ऋत्विजो हिंसायामयमपि हिंसितः।

## यथेन्द्रशत्रुः

यथायमिन्द्रिशत्रुर्यजमानं हिंसितवानेवमन्योऽपि मिथ्याप्रयुक्तो मा हिंसीदित्यध्येयं व्याकरणम्। दुष्टशब्दप्रयोग इति[3] श्रूयते—"[4]स्वाहेन्द्रशत्रुर्वर्धस्व" इति मन्त्रः। (अत्रान्तोदात्तः) कर्तव्यः, आद्युदात्तः कृतः, ततोऽस्येन्द्र एव शातयिता संवृत्त इति। अत्र चोद्यते[5]—यद्यपि समासान्तोदात्तत्वमेवमपि नायमर्थो व्यावर्त(त) इति, इन्द्र(:) शत्रुरस्येति, यथा "सोमसखो राजसख[6]" इति, इदं चात्र वक्तव्यं—इन्द्रशत्रो वर्धस्वेति कस्मादामन्त्रितप्रथमा[7] न भवति? यत्तावदुक्तमन्तोदात्तत्वेऽपि न तस्यार्थस्य [8]व्यावृत्तिरिति, नैष दोषः। योऽयं शत्रुशब्दो मन्त्रे प्रयुक्त एष रूढिशब्दोऽपि सन्नर्थप्रकरणवशात्त्यक्त्वा निरूढिं[9] निमित्तमपेक्षमाणः प्रयुक्तः। तस्मान्नायमेवाश्रीयते—इन्द्रस्यामित्र, इन्द्रो वामित्रोऽस्येति। कथं तर्हि? क्रियामेव निमित्तत्वेनोपादाय प्रयुक्तः, शातयिता (श)मयिता वा[10] शत्रुरिति। तत्रेन्द्रस्य शातयिता भवेति प्रयुयुक्षितं[11], इन्द्र(:) शातयितास्येति प्रयुक्तम्। [12]यच्चोक्तमा(मं)त्रितविभक्त्या भवितव्यमिति, योऽर्थः स्वेन धर्मेण प्रसिद्धो धर्मान्तरसंबन्धं प्रत्यभिमुखं क्रियते तत्रामन्त्रितविभक्तिः[13], यथा [14]देवदत्तं क्रियान्तरसम्बन्धं प्रत्यभिमुखीकरोति देवदत्ताधीष्व भुंक्ष्वेति[15]। यस्य चाधीयमान एवासौ धर्मस्तस्य कुत आमन्त्रितविभक्तिः? तद्यथा (राजा) भव युद्ध्यस्व पुरुषो भवेति, राजत्वमेवाधीयमानं पुरुषत्वं चेति नास्त्यामन्त्रितविभक्तिः, एवमिहापीन्द्रशत्रुत्वमेवाधीयमानमित्यदोषः। तत्र पूर्वस्मिन् वर्णदोषः प्रदर्शितो, "हेलयो[16] हेलय" इति, संप्रति स्वरदोषः।

## यदधीतमविज्ञातं निगदेनैव शब्द्यत इति।

अनेनैतदाख्यायते—य एवासौ वेदस्तस्यैव व्याकरणानुगतस्य यदि [17]संशब्दनमप्येतदभ्युदयायेति। तत्र निरुक्तकारः अविज्ञातार्थमिति वर्णयति[18]। इह तु स्वरवर्णसंस्काराविज्ञानमविज्ञातमिति[19] परिगृह्यते यच्चैवंभूतं तन्निगदेनैव शब्द्यते, आचार्योपदेशेनैव केवलेनेत्यर्थः।

---

[1] Ms वाग्व [2] Ms चेनसा
[3] Ms-गमिति [4] TS. II. 5. 2. [5] Ms चेद्यते
[6] Cf MB. II. 1. 24. [7] Ms-तः। प्रथमा [8] Ms व्याछोत्ति-
[9] Ms-वशाद्युक्त ति रूढिं [10] Ms-मथिता वा cf. Nir. II. 16.
[11] Ms-क्षित [12] Ms यथोक्तमा [13] Ms-क्तेः
[14] Ms-देवदत्तो देवदत्तांतरे सम्बन्धे प्रत्याभि- [15] Ms-धीद्य भुंक्ष्येति
[16] Ms हेलये [17] Ms संशब्दनमप्यत- [18] Ms-यन्ति [19] Ms-ज्ञातमविज्ञातमिति

**[1]अनग्नाविव शुष्कैधः ।**

यथा ज्वलनसमर्थमपि सत् काष्ठमग्निनानुपगृहीतं न [2]ज्वलनसमर्थमेवमधीतमपि शास्त्रं व्याकरणेनुपगृहीत(म)समर्थं फलनिष्पत्तिं प्रति ।

**तस्मादनर्थकं[3] माधिगीष्महीति) ।**

निष्प्रयोजं माधिगीष्महीत्यर्थः ।

**[4]यस्तु प्रयुंक्त इति ।**

व्याकरणात् प्रत्यवायेनायोगः इष्टेन च फलेन संबन्ध इत्येतदाख्यायते ।

**[5]प्रयुंक्ते**

प्रेरयति ।

**कुशलो**

विद्वान् ।

**विशेषे**

स एव शब्दोऽर्थविशेषे [6]कस्मिंश्चिदसाधुरित्येतदाख्यायते। यथा गोणीशब्दः सास्नादिमत्यसाधुस्तथा [7]अश्वशब्द(:) केसरादिमति साधुर्न नि(र)स्व इति। [8]अस्व इति [9]निर्धने साधु (:) नैकशफादिलक्षणे। यदि तु गोणीशब्दोऽपि निमित्तान्तरात् सास्नादिमति प्रयुज्येत गोणीव गोणीति[10]साधुरेव स्यात् । अश्वे [11]वास्वशब्दं धनाभावद्वारकं प्रयुंजीत [12]स साधुरेव ।

अथवा

**कुशलो(ऽ)विशेष इति ।**

अविशेषेऽपि शास्त्रस्य "तत आगत" (सू. ४. ३. ७४) इति "तेन खनति"-(सू. ४. ४. २) इति साधुरेव विशेष एव प्रयुज्यते, न सर्वत्र "वृक्षमूलादागतोंऽगुल्या खनतीति[13]"। अन्येषां ग्रन्थः—

**कुशलो विशेषैरिति[14]।**

विशेषैः शास्त्रप्रतिपादितैरित्यर्थः। यथा "तदधीते तद्वेद" (सू. ४.२.५९) इत्य(ने)न। व्यवहार(:प्र)वृत्तिः। शिष्टव्यवहारो याज्यैव कर्मविधिः (?)

**कः ? वाग्योगविदेव ।**

---

[1] Ms अनग्न-  [2] Ms ज्वलनसमर्थंनिष्प्रयोजनमेवमधीत  [3] Ms-कमधि-
[4] Ms अस्तु  [5] Ms प्रत्युक्ते प्रेसरयति  [6] Ms कस्मि-
[7] Ms जेश्व-  [8] Ms अश्व  [9] निर्धनि
[10] Ms गोणीते  [11] Ms वाश्व-  [12] Ms सा.
[13] MB. IV. 3. 25  [14] Ms-शेषेरिति

अन्यस्याश्रुतत्वादाह—

**को वाग्योगविदेवेति ।**

एवं मन्यते—यस्मिन्नर्थे आसेव्यमाने धर्मः तस्मात् [1]यः विपरीतः तदासेवाया(ः) तद्विपरीतेन फलेन भवितव्यम् । यथा ब्राह्मणस्य सुखं कृत्वा धर्मः दुःखं कृत्वा अधर्मः, एवं वाग्योगवित् यस्माच्छब्दान् जानाति तस्माद्धर्मः । शब्दज्ञानं [2]चापशब्दज्ञानानुषक्तमेवेत्याह—

**यो हि शब्दान् जानाति ।**

[3]अर्थोपपत्तिमाश्रित्यैवं चोद्यते, न शब्दव्यापारम् ।

**भूयांसो हि [4]अपशब्दाः अल्पीयांसः शब्दा इति ।**

कथं प्रकर्षप्रत्ययः ? उच्यते, परमतापेक्षया परिकल्प्य(ते) समानगुणत्वम् । कथम् ? एवं त्वं मन्येथाः, यद्यपि वाग्योगविदुभयं जानाति तथापि बहवः शब्दास्तेषां बहुत्वात् अल्पे[5] अपशब्दाः तदल्पत्वादल्पः प्रत्य(वा)य इति; एतच्चापि न, अल्पीयांसः शब्दा इति । अपभ्रंशा ये (ते) त्व(र्थ)स्य प्रत्यायकाः न[6] भवन्ति । एष (ए)व पक्षो नैतेऽर्थं प्रत्याययन्तीति ।

**अज्ञानं तस्य शरणम् ।**

काममसौ धर्मेण न युज्येत, प्रत्यवायेन तु तस्यायोगः; [7]यथा तिर्यगादयः अज्ञानात्प्रवर्तमाना न प्रत्यवायेन युज्यन्ते । इदं सर्वमेवमुपन्यस्तं "ज्ञाने धर्मः[8]", [9]प्रयोगतस्तु ज्ञानस्यैवानुमानमिति ।

**नात्यन्तायाज्ञानं शरणं भवितुमर्हति ।**

न हि अज्ञानाद्विषं भक्षितं मारणाय न प्रकल्पते । तिर्यगादिष्वेवाज्ञानं शरणं, न म्लेच्छादीनां ब्रह्महत्यादिषु प्रवर्तमानानामिति ।

**एवं तर्हीति[10] ।**

एतदाचष्टे—प्रत्यासत्तेः सामर्थ्यं बलवदिति अवाग्योगविदभिसंबध्यते । तत्र वाग्योगवित् शब्दापशब्दज्ञः शब्दान् प्रयोक्ष्यते नापशब्दान् ; प्रयोगाच्चाभ्युदयः प्रत्यवायो वा, न ज्ञानादिति । [11]अयं न श्रुतावुपनिबद्धो नापि स्मृताविति आह—

**क्व पुनरिदं पठितमिति । आजा नाम श्लोकाः ।**

अस्याभिप्रायः—यो वार्थः स स्मृतावाम्नातः, ततः प्रमाणं भवितुमर्हतीति ।

---

[1] Ms स्व- [2] Ms चापराश- [3] Ms अथोप-
[4] Edn. omits हि. [5] Ms अल्पा [6] Ms च [7] Ms तथा
[8] Vār. in Paspaśā [9] Ms प्रथमतस्तु [10] Ms तहीति [11] Ms अयन श्रुता-

## किं च भोः श्लोका अपि वै[1] प्रमाणम्?

नायमेकान्तेन श्लोकानामप्रामाण्यमाचष्टे। भवन्ति हि श्लोकाः स्मृत्युपनिबद्धाः प्रमाणं, एवं भूतास्त्वप्रमाणम्। एवंभूतानां प्रामाण्ये सति यः कश्चित् प्रमाणं भवितुमर्हति।

## यदुदुंबरवर्णानामिति।

अयं हि श्लोकः सौत्रामण्या असामर्थ्यमाचष्टे। तस्मात्सौत्रामणीं हित्वा [2]पानागारशालायामेव मद्यं पातव्यम्।

## प्रमत्तगीत एष तत्र भवतः।

असमाहितचेतस इत्यर्थः। कथं ज्ञायते? श्रुतिस्मृतिविप्रतिषेधात्। अयं तु प्रमत्तगीतः। अस्ति हि स्मृतिः—"एकः शब्दः संयक् ज्ञातः सुप्रयुक्त (:) शास्त्रान्वितः स्वर्गे लोके कामधुग्भवति[3]" इति।

## अविद्वांसःप्रत्यभिवादे इति।

[4]अनेनैतत्कथयति—व्याकरणमन्तरेण शिष्टेभ्यः पृथक्कृताः स्त्रीपत्ते भवन्ति। न चाभिवादयितारं शक्नुवन्त्यनुग्रहीतुं[5] प्रत्यभिवादेन हि असौ संस्कृ(तो) धर्मभाग्भवति, स्वयं चाभ्युदयेन युज्यते।

## प्रयाजाः सविभक्तिका इति।

प्रयाजमन्त्रा इत्यर्थः। यास्तावत् प्रजाजशब्देषु प्रतिपदं विभक्तयो न ताभिः सविभक्तिका इत्युच्यन्ते, नित्यं सन्निधानात्तासाम्। तस्मादाम्नातादन्यच्छब्दरूपं प्रयाजेषूपादीयते केवलायाश्च विभक्तेरप्रयोगात्[6] [7]प्रातिपदिकप्रकृतिरर्थगृहीता[8]। तत्रापि "त्वमग्ने [9]प्रयाजानुयाजानां पुरस्तात्त्वं पश्चात्[10]" इति दर्शनात् [11]अर्थान्तरवृत्तिश्रुत्यन्तरं नोपादीयते। विभक्तीनामपि सर्वासां प्रयोगे प्राप्ते "या द्व्यक्षरा वा[12] सत्यश्चतुरक्षरा वा भवन्ति[13]" इति वचनात् अग्निनाग्नय इति[14] न प्रयुज्यते। तथा "न शब्दजामि कुर्यात् शब्दजामि हि [15]तद्भवति [16]यत्पंचम्यन्तम्"। तस्मादग्नेरग्ने [17]इत्यनेन रूपेण षष्ठ्यन्तं प्रयुज्यते। "पुनराधेये[18] प्रयाजानुयाजानां पुरस्ताद्वोपरिष्टाद्वा[19] विभक्तीः कुर्यात्[20]"। "नराशंसो अग्निमग्न[21]" (इति, "आज्यस्य हविषो वेत्वग्निमग्न") इति वा

---

[1] Edn. omits वै. [2] Ms पानायार [3] MB. VI. 1.84.
[4] Ms अनेनतत्क [5] Ms-गृहीतं [6] Ms गात
[7] Ms प्रादिपदिकं [8] Ms तां [9] Ms-यातानु
[10] Quoted by Nagesa in his उद्योत in the same context.
[11] Ms अथांत्तरं [12] Ms ना [13] cf MS. I. 7. 3
[14] Ms ग्नाग्नेनेति [15] Ms तवद्भव- [16] Ms यत्यचम्पंते [17] Ms नित्य
[18] Ms-धेय- [19] Ms ष्टाद्विभक्तीः MSS. V. 1. 2 [21] Ms-मग्नग्न

उभयथा इष्टत्वात्। "समिधः समिधोऽग्नेऽग्न" इति सन्धिर्दृष्टः। "इलो अग्निनाग्न (इ)ति विवृतिर्दृष्टा" इति बह्वृचसूत्रभाष्ये। आश्वलायनसूत्रे "ये यजामहे समिधः समिधोऽग्नेऽग्न आज्यस्य व्यन्तु। तनूनपादग्निमग्न[1] आज्यस्य हविषो वेतु। नराशंसो अग्निमग्न आज्यस्य[2] हविषो वेतु। इलो अग्निनाग्न आज्यस्य हविषो व्यन्तु[3]। बर्हिरग्निरग्न आज्यस्य हविषो वेतु" (आश्व. श्रौ. २.८) [4]आपस्तम्बसूत्रे "[5]अग्नेऽग्नेऽग्नावग्नेऽग्निनाग्नेऽग्निमग्न इति चतुर्षु प्रयाजेषु" (आप. श्रौ. ५.२८.६) इति विभक्तय उक्ताः। "अग्ना (इ)ति यथाम्नात उत्तमः[6]" प्रयाजः तस्योपरिष्टात् (न) क्रियते विभक्तिः। विकृतावप्यं(?) विभक्तिः क्रियते तदा। तद्यथा—"ये यजामहे स्वाहाग्निं स्वाहा सोमं (स्वाहा) अग्निं होत्रात्[7] स्वाहा अग्नीषोमौ स्वाहा देवा अज्यपा जुषाणा अग्न आज्यस्य हविषो[8] व्यन्तु[9]" इति। एतेषु प्रयाजेषु सविभक्तिकेषु कर्तव्येषु वैयाकरणो विभक्त्यन्तान् सम्यगुच्चारयेत्। तस्मादेवमर्थमध्येयं व्याकरणम्।

## स आर्त्विजीन इति।

यश्च ऋत्विजमर्हति यश्च ऋत्विक्कर्म उभावप्यार्त्विजीनौ[10]। "विद्वानेव [11]याजयति" इति, [12]अविदुषोऽनधिकारात्। ब्राह्मणस्य व्याकरणमन्तरेण [13]याजनं याजमानं वा न संभवतीति प्रोत्साह्यते।

## चत्वारि पदजातानि

यानि, तानि अस्य शृंगाणीव[14]। कर्मप्रवचनीया निपातेष्वन्तर्भूता इति चत्वार्युच्यन्ते। अन्येषां द्वे पदजाते, नामाख्यातं[15] च।

## त्रयः कालाः

अभिधायाः, शब्दस्य प्रयुज्यते प्रयोक्ष्यते प्रायोजीति। अभिधानस्य वा, भवति भविष्यति अभूदिति।

## द्वौ शब्दात्मानौ नित्यः कार्यश्चेति।

कैश्चित् नित्योऽयमिति दृष्टः, कैश्चिदनित्य[16] इति। अथवा जातिर्व्यक्तिश्चेति। अथवा स्फोटो ध्वनिश्च।

---

[1] Ms. तनूनपादग्निमधोग्नेग्न इति सन्धिर्दृष्टः। इलो अग्निनाग्नतिविवृग्न
[2] Ms. हवेषो [3] Ms वेतु
[4] Ms. This passage from आपस्तम्बसूत्रे to विभक्तय उक्ताः comes between हविषो वेतु and इलो, above. [5] Ms अग्नाग्ने तावग्ने
[6] MSS. V. I. 2. [7] Ms अग्निहोत्रं [8] Ms अज्यस्य हविषा
[9] Ms. व्यतु; Cf MS. IV. 10. 3; TBr III.3.5. [10] Ms-प्यार्वात्विजीनौ
[11] Ms येजय- [12] Ms अविद्वांसो- [13] Ms यजमानं
[14] Ms शृंगानीव. [15] Ms-ख्याते. [16] Ms-त्यता

## सप्त विभक्तयः

स्वादयः। अथवा सह शेषेण कारकाणि सप्त विभक्तयोऽत्र तु कारकः शेषोऽप्यष्टमः सभवति(?)

## नेंगयन्तीति।

[1]नेंगयन्ति न निमिषन्ति

## न चेष्टन्त[2] इति

सामर्थ्यादिदमभेत्रेनोपादानम्। मनीषिणो ये तैः सह साम्यं गच्छेमेति। तेऽपि हि शास्त्रादेवेमां काष्ठां प्राप्ताः।

## पश्यन्नपि न पश्यति शृण्वन्नपि न शृणोति

व्याकरणाध्यायिनो वाच ईशते, प्रभुत्वं येषां वाचि भवतीति।

## सक्तुमिव तितउना

[3]शोध्यं यद्द्रव्यं दुश्शोधं[4] तस्य (उ)पलक्षणं[5] सक्तवः। एवमपशब्दाः [6]शक्त्या व्याकरणेन शोध्यन्त इति।

## अत्रा सखायः

"[7]ऋचि तुनुघमक्षु" (सू. ६. ३. १३३) इति दीर्घः।

## अत्रा सखायः सख्यानि।

## समानख्यातयः

समानप्रज्ञानाः।

## आहिताग्निरपशब्दं प्रयुज्येति।

एतत् प्रतिपादयति—यथा(ग्नि)मादधदवश्यं[8] जायामानयति तामन्तरेणाग्न्याधानस्याप्रवृत्तेः, एवमनेनाग्निमादधतावश्यं व्याकरणं अध्येयमिति नित्यकर्मतामेव[9] समर्थयते।

## [10]दशम्यां पुत्रस्य। नाम विदध्यात् इति।

एतदुक्तं भवति—नामकरणसंस्कारादारभ्य व्याकरणमुपयुज्यत इति।

## सुदेवो असि वरुण[11]

---

[1] Ms न दुः यंति.  [2] Ms चेष्टत.  [3] Ms साध्यं
[4] Ms दुश्शोध्यं.  [5] Ms-पभक्षणं  [6] Ms-शब्दीः
[7] Ms कृत्वि-  [8] Ms-धतावश्यं.  [9] Ms-मेत.
[10] Cf MG. I. 18. 1.  [11] Ms वरुणा.

बार्हस्पत्ये प्रगाथे[1] वरुणोपस्तुतिरियम्। वरुणस्य येयं स्तुतिः—त्वं सत्यदेव इत्येषा—यस्मात् व्याकरणज्ञानात्, अतः पठितव्यमिति।

**किं पुनरिदमिति।**

नात्र शिष्याचार्याचार्यदेशीयाः[2] प्रतिपत्तव्याः। ग्रन्थकार एवेमं[3] ग्रन्थं विभजते।

**न पुनरन्यदपि किंचित्**

सति हि प्रयोजनाख्याने एवं प्रतिपद्येत—[4]प्रोत्साह्येऽहमनेन प्रकारेण, नैतानि सन्ति प्रयोजनानि। अथवा (न) व्याख्यायन्ते, किमिति निष्प्रयोजनं श्रमकरमध्येष्ये इति नैवाधीयीत।

**(ओ)मित्युक्त्वा**

(न) [5]ओंकारमुच्चार्य [6]इत्यवगन्तव्यम्। किं तर्हि? [7]ओमित्यभ्युपगच्छ(न्ति) [8]अनपेक्षितप्रयोजना एवेत्यर्थः।

**वृत्तान्त(त) इति।**

वृत्तान्ताः प्रपाठका उच्यन्ते। तत्राद्यादित्वात्तसिः। वृत्तान्तैः वृत्तान्तैः प्रपाठकैः पठन्ति। अन्येषां "वृत्तान्तश" इति पाठः। त एवं पठन्ति-वृत्तान्तं वृत्तान्तं पठन्तीति वृत्तान्तशः पठन्तीति[9]।

**पुराकल्प एतदासीत्।**

एतदाचष्टे—यस्यामवस्थायामसौ व्याकरणमध्याप्यते[10] तस्यामसौ परिप्रश्नसमर्थ एव (न)भवति, कुतः प्रयोजनानि प्रक्ष्यति[11]।

**[12]तत्त(त्)स्थानकरणानुप्रदानज्ञेभ्य[13] इति।**

पुराकल्पे स्थानकरणादीन् व्याकरणादेव प्रतिपद्यन्ते[14]।

**ततो वैदिकाः शब्दा उपदिश्यन्ते।**

तत्र वेदाध्ययने प्रयोजनप्रश्नः स्यात्तस्यापि प्रयोजनमाख्यायते[15], वेदांगमपि व्याकरणमवश्यमध्येतव्यमिति।

**तदद्यत्वे न तथा।**

---

[1] Ms तेगाथे. [2] Ms चार्यवैशीयाः [3] Ms एवेदं
[4] Ms प्रोत्साहोह- [5] Ms उकार- [6] Ms रयेत्येव
[7] Ms एवमि [8] Ms अनपेक्षितं [9] Ms-ति वृत्तां पुरा.
[10] Ms तो. [11] Ms प्रवक्ष्यति. [12] Ms तत्र.
[13] Edn-करणनादानुप्रदानज्ञेभ्य [14] Ms द्यात. [15] Ms यतो.

अद्यत्व इति निपातोऽस्मिन्काल इत्यनेन समानार्थः। अद्यत्वे हि बाला एवानधिगतव्याकरणा [1]वेदमध्याप्यन्ते। वेदा अविज्ञातस्थानकरणानु-[2]प्रदाना ए(व)।

**वेदमधीत्य [3]त्वरिता वक्तारो भवन्ति।**

त्वरिता इति, धानोपादाने वा [4]त्वरिता भवन्ति भोगोपभोगे वा। अथवा पुनरध्यायान्तरे पारतन्त्र्यकरणो नियोगो मा भूदिति (?) त्वरिता इदमा-हुर्वेदाध्ययनसमकालमेवेति।

**उक्तः शब्दः।**

स्वभावोऽप्यस्य व्याख्यातः, "ध्वनिः शब्द" इति। रक्षादीन्यपि प्रयोज-नान्युक्तानि।

**शब्दानुशासनमिदानीं कर्तव्यम्।**

आख्यातव्यम् प्रस्तोतव्यमित्यर्थः।

**[5]तत्कथं कर्तव्यमिति।**

आख्यातं निदर्शयति। यमाचष्टे तेन कथं कर्तव्यमिति(?)

**किं शब्दोपदेशः (कर्तव्य आहोस्विद) पशब्दोपदेश (आहोस्वित्) उभयशब्दोपदेश[6] इति।**

स्वलक्षणेन परलक्षणताभावेन यदाख्यायते तद्विस्पष्टतरं भवतीत्युभयोप-देशकरणस्योपादानम्। यद्यपि विस्पष्टतरं भवति अतिगौरवं तु शास्त्रस्येति [7]स्वलक्षणेनैवानुशासनं परिगृह्णाति—

**अन्यतरोपदेशेन कृतं[8]।**

शब्दापशब्दयोरित्यर्थः। यदि ह्युभयोपदेशोऽपि परिगृहीतः स्यात् तमपमेव[9] कुर्यात् अन्यतमोपदेशेनेति।

**तद्यथा [10]भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते।**

भक्ष्याभक्ष्यप्रकरण इदं श्रूयते "पंच पंचनखा भक्ष्या" इति। प्रकरणा-दन्यस्य पंचनखस्य निवृत्तिः। अथवार्थित्वात् बुभुक्षाप्रयुक्तं भक्षणं सर्वविषय-मशब्दकं प्रवृत्तं, तत्रेदं वचनं—पंच पंचनखा भक्ष्या इति। तद्यद्यनेन "पंच पंचनखा भक्ष्या" इत्येतत्प्रतिपाद्येत यदहरेव न भक्षयति [11]तदहरेवायं विहिता-करणात्प्रत्यवेयात्। ये च शल्यकादिभ्योऽन्ये पंचनखास्तेषां च भक्षणं स्वनिमित्त-

---

[1] Ms देवमध्या– [2] Ms न [3] Ms-धीस– [4] Ms तुरिता.
[5] Ms ततः कथं [6] Ms उभयशरेब्दापदेश. [7] Ms स्वलक्षणेनवा–
[8] Ms-ततोपादानेन कृती. [9] Ms तममेव. [10] Ms भक्षनय– [11] Ms तदेह–

[1]प्रयुक्तमप्य(व्या)वृत्तमेव स्यात्। तदेव भक्षणं पौरस्त्यमर्थित्वे सति प्रवृ(त्तं), तदेव पंचसु पंचनखेषूपदिश्यते, क्षुत्प्रतिघात[2] एतैरेव कर्तव्यो नान्यैरिति। इयति शब्दव्यापारे पंचनखान्तराणां[3] निवृत्तिरसौ न शब्दवती। किं तर्हि ? सामर्थ्यलक्षणा। एवं च सति "व्रत[4]" (सू. ३.२.८०) इत्येतस्मिन् सूत्रे अश्राद्धभोजीत्यत्र[5] यदुच्यते "यदि योऽश्राद्धं [6]भुंक्तेऽसावश्राद्धभोजी यदासावश्राद्धं[7] न भुंक्ते तदा(स्य) व्रतलोप" (भा. ३.२.८०) इति। अत्रापि श्राद्धभोजनमर्थात्प्रसक्तम्। तत इदमुच्यते "श्राद्धं न[8] (भो)क्तव्यम्" इति। पौरस्त्यस्यैव[9] श्राद्धभोजनस्यार्थात्प्रसक्तस्य [10]निवृत्तिः क्रियते। भुंजन् श्राद्धं मा[11] भुंक्ष्व[12] इति। पौरस्त्यस्यैव (अ)श्राद्धभोजनस्य विधानसामर्थ्यात् विनिवर्तमानं श्राद्धभोजनमिति कुतो व्रतलोपः ? एवमर्थप्रत्यायनं प्रति शब्दापशब्दयोः प्रवृत्तौ सत्यां शब्दोपदेशेनापशब्द[13] निवृत्तिरिति व्यक्तम्।

## अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः।

## (तद्यथा) अभक्ष्यो ग्राम्यकुक्कुट इति।

अर्थमुख्य(:) प्रतिषेध इति। [14]नह्यत्राप्राप्त्यनुमानं बाधा। किं तर्हि ? बाधैवेयम्। एवमिहाप्यपशब्दोपदेशेन गाव्यादिभ्यश्चान्यः [15]शब्दो गौरिति[16] प्रतिपद्यते।

## किं पुनरत्र ज्यायः ?

उभयोपदेशात् गुरोः, लघुत्वात्प्रशस्यत्वमनुभूय मिथःस्पर्धायां [17](प्र)कर्षप्रत्ययेन संबध्यते।

## इष्टान्वाख्यानं खल्वपि भवति।

कथं शब्दोपदेश इष्टान्वाख्यानम् ? उच्यते—यदि यथाम्नाये शब्दानां स धर्म एवमेषामपि धर्मार्थत्वादिदमुच्यते, "इष्टान्वाख्यान" मिति। अथवापशब्देषूपदिश्यमानेष्वानुमानिकी[18] प्रतिपत्तिः। [19]अपशब्दतो(ऽन्यःशब्दः) इत्यानुमानिक्यां च[20] प्रतिपत्तौ परिकल्पस्यानन्त्यात्[21] किं गौरित्येष गाव्यादिभ्य(श्चा)न्यः[22] शब्द आहोस्विदन्य इत्येतत् दुर्ज्ञानमे(व)भवतीति नैवेदमन्वख्यानं स्यादिति।

## अथैतस्मिन् शब्दोपदेशे सति।

---

[1] Ms प्रयुक्तमप्या [2] Ms तीघात
[3] Ms पापं खश्वां वाराणां. [4] Ms प्रत [5] Ms अश्राय भोजात्सत्र.
[6] Ms भुंक्ते सावश्रा– [7] Ms यदहरेवसाव– [8] Ms ना–
[9] Ms दौरव्यस्येद. [10] Ms तिनतिः [11] Ms भुंजन श्राद्धमा.
[12] Ms-क्ष्वा. [13] Ms-शब्दे. [14] Ms नह्यत्र.
[15] Ms-दिप्यष्वन्य [16] Ms गोरिति. [17] Ms कर्म– [18] Ms निका.
[19] Ms अयं शब्दतो. [20] Ms-क्याव [21] Ms-कल्पः स्या भंत्यात्. [22] Ms-दिष्वन्य

अस्मिन्काले प्रतिपदपाठमेव सुकरं मन्यते; नह्यत्र किंचित् स्मर्तव्यं लक्षणं, केवलं शब्दा एवोच्चारयितव्याः। प्रकृत्याद्युपदेशे[1] हि सति चिरकाल-संप्रतिपत्तिरिति।

**प्रतिपदपाठ इति।**

स्वरूपेण यदुच्चारणं स प्रतिपदपाठः। येनार्थः परिच्छिद्यते तत्पदम्।

**अन(भ्यु)पाय इति।**

[2]उपायशब्दपर्यायवाच्येवाय(म)भ्युपा(य)शब्दः।

**एवं हि श्रूयते, बृहस्पतिरिन्द्रायेति।**

[3]अर्थवादोऽयं प्रतिपदपाठस्य निवृत्तये उपादीयते। ई(इ)शो वक्ता, ईदृशः[4] श्रोता, इयता कालेन नान्तं गतः।

**किं पुनरद्यत्व इति। शब्दानां शब्दपारायणमिति।**

रूढिशब्दोऽयं कस्यचिद्ग्रन्थस्य वाचकः[5], यथा शिरोरोगः कुक्षिं बाधत इति। शिरोरोगशब्द(:) कुक्षिरोगशब्दश्च[6] व्याधिविशेषस्य रूढिः, स शिरः कृत्स्नं कृत्स्नं च कुक्षिं बाधत इति (?) एवं शब्दपारा(य)णं नाम ग्रन्थः।

**शब्दानां प्रोवाचेति (?) चतुर्भिश्च प्रकारैर्विद्योपयुक्ता[7] भवति।**

अथोपयुक्तापि सत्यनुपयुक्ता भवति [8]निष्फलत्वात्। अथवा लोके एकदेशोपयोगादप्युपयुक्त[9] इति गम्यते। तद्यथोपयुक्तं घृतमिति, एवमिदं। नैकदेशोपयोगादुपयुक्त इति। किं तर्हि ? समुदायोपयोगादुपयुक्त इत्येव कथयति।

**आगमकालो**

ग्रहणकालः।

**स्वाध्यायकालः**

अ(भ्या) स (कालः)[10]

**प्रवचनकालः**

शिष्येभ्यः संप्रदातव्यः (?)

**व्यवहारकालो**

याज्ञे कर्मणि विनियोगः, शिष्टमध्ये वा यो [11]विनिश्चयः।

---

[1] Ms-त्याप्युपदेशे
[2] Ms उपायः शब्द–
[3] Ms अनुवा–
[4] Ms इदृश.
[5] Ms वाचकं.
[6] Ms-शब्दः स्व–
[7] Ms-द्योपकल्कोपयुक्ता
[8] नं: फल–
[9] Ms-प्युपयुक्तोपयुक्त
[10] Ms-कालोऽस्य
[11] Ms-योपि

## किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम्।

समान्यविशेषौ यस्मिंस्तत् सामान्यविशेषवत्।

## यथा कर्मण्यणिति।

"(धा)तोः" इत्येतत्सामान्यमस्मिन् लक्षणेऽस्ति।

## आतोऽनुपसर्गे क इति।

एतस्मिंश्च "आत" इति विशेषोऽस्ति। [१]अनेनाल्पेन यत्नेन [२]महतो महतः शब्दौघान् प्रतिपद्यते, कुम्भकारः काण्डला(व) इत्येवमादीन्। एवं [३]पार्ष्णिग्रं गोद इत्येवमादीन्। एवं सर्वत्र योज्यं, स्थान्यादेशभावे विधिप्रतिषेधे च।

## किं पुनराकृतिः पदार्थ आहोस्वित् द्रव्यम्?

आचार्याणां विप्रतिपत्तेः सन्देह(ः)। वाजप्यायनस्याकृतिः, व्याडेस्तु द्रव्यम्। अत्र केचित् वर्णयन्ति—यद्यपीदमविशेषेणोक्तमेवमपि संभविषु शब्देष्विदं पृच्छ्यते[४]। येषूभयं संभवति द्रव्यमाकृतिश्च गौरश्व इत्येवमादिषु, न पुनर्डित्थ[५] इत्येवमादिषु। अपरे पुनराहुः—आकृतिशब्देन यावत्परविशेषणं सत्त्ववदुच्यते। आक्रियते येन परिच्छिद्यते येनेति भिन्नक्रिया परिच्छिद्यते(?)। अन्ये आहुः—सर्वत्रैवाकृतिः संभवति, जातिः सार्धम(भि)धीयत इति। तत्र वाजप्यायनश्च[६] शब्दाकृतिमेव चोदयति, न द्रव्यादीनां। तद्यथा नीलशब्दोऽर्थान्तरनिरपेक्षो गुणसामान्यस्तद्रूपं[७] प्रतिलभते। तत्र प्रतिलब्धस्य स्वरूपस्तदधिष्ठानो यदा गुणवतो न नीलस्य साहचर्यात्(?)नीलत्वेन [८]व्यावेशात्तद्वत्तामनुभवत्येकयोगक्षेमतामापद्यते। विभावाभागादाकृत्य...षूत एव स गुणप्रत्ययमादधाति(?) [१०]यथोपाश्रयवशात्स्फटिकं[११] तद्गुणमुपलभ्यते। एवं द्रव्यमप्ययमभिदधन्नीलशब्द(ः) स्वाभिधेयस्य नीलत्वस्य य आश्रयो गुणस्तस्याधारे[१२] [१३]द्रव्येऽपि समवेतसमवायात् व्यवहितोऽपि गुणो न तदधिष्ठान एव[१४] द्रव्ये प्रत्ययमादधाति। तथा द्रव्यान्तरेणापि रक्ते वस्त्रे संयुक्तसमवेतसमवायादेव पारंपर्येण, याव(त्) "[१४]द्वयो रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते" (भा.१.२.३०)इति। एवं गौरित्यप्ययं शब्दो गोत्वे [१५]प्रतिलब्धस्वरूपः(त)दधिष्ठान एव द्रव्ये प्रवर्तते। एवं पचतिशब्दे यास्ता अधिश्रयणादिक्रियास्तासां यानि प्रत्यर्थनियतानि सामा(न्या)न्यधिश्रयणादीनि तैः सहैकार्थसमवायि यत्सर्वविषयं सामान्यमभिव्यज्यते तत्पचतिशब्दवाच्यम्। यथा भ्रमणत्वमनेककर्मविषयं भ्रम-

---

[१] Ms अनेन ना– [२] Ms यज्ञत्नेन [३] Ms वार्ष्णित्रो
[४] Ms पृच्छते [५] Ms-त्त [६] Ms-नस्य
[७] Ms-न्यंस्तद्रूपं [८] Ms-वेशां तद्वतामनु– [९] Ms यत्वोया श्रय–
[१०] Ms-त्स्फुटिक– [११] Ms-धारो [१२] Ms द्रेव्यपि.
[१३] Ms-ष्ठानदेव [१४] Ms दयो. [१५] Ms प्रतिलभ्यं स्वरूपा.

णमित्युच्यते। एवं [1]डित्थेऽपि, यदुत्पत्तिप्रभृत्याविनाशाद्ये[2] त एव तद्भवत्ययं [3]डित्थोऽयं डित्थ[4] इति। बाल्यकौमारयौवनस्थाविरेष्वभिन्नः स[5] एवायमिति संप्रत्ययः सा आकृतिः शब्दवाच्या। [6]चित्रेऽपि च संप्रत्ययो भवति, डित्थोऽयं लिख्यत इति। तस्मात्सामान्यमत्राप्यस्ति यो वा सन्निवेशविशेषः। संयोगं विशेषणत्वं ह[7] पादिष्विव साकृतिरिव। अस्य तु द्रव्याभिधानं गुणकल्पनया, जातित्वमापादितस्य[7] तच्छब्देनाभिधानात्। [8]द्रव्यपदार्थिकस्य तु—द्रव्यमुच्यते, जात्यादयस्तु भेदिका[9] द्रव्यस्य सत्त्वं वक्तुं, उपाधिभूतास्ते शब्दस्येति। तत्र केषां (चित्, यथा) माधुर्यादयोऽत्यन्तमनभिधीयमाना गुडादिभिः शब्दैस्तानर्थान् इत्येवं गोत्वादयोऽपि। अस्यापि जात्यभिधानं गौणं,[10] द्रव्यतामापादिता जाति(:) तच्छब्देनाभिधीयते। तत्र वाजप्यायनदर्शने[11] पाणिनेः सर्वत्राकृतेर्भावात् सकृद्गतौ[12] विप्रतिषेधबाधनं, शब्दान्तरप्राप्तिश्च नोपपद्यते। अथ द्रव्यमेव पदार्थः, एवमपि सर्वासां व्यक्तीनां सर्वाभिश्चोदनाभिरंगीकरणादुत्सर्गापवादौ[13] न प्रकल्पेते[14]। व्यवस्थितविभाषाश्च न प्रकल्पन्ते[15]।

## उभयमित्याह।

व्यक्तिराकृतिश्च पदार्थ(:। उभय)पर(त्वेन) लौकिकैः (शब्दाः) प्रयुज्यन्ते ये च शास्त्रे उपदेशशब्दाः तेषु कश्चित् जातिमभिदधाति[16], कश्चित् द्रव्यम्। एवं च सति न कश्चित् गौणः पदार्थो(य)स्य यो जातिशब्दस्तस्य जातिरेवार्थो, यो द्रव्यशब्दस्तस्य द्रव्यमेवार्थ इति। उपदेशशब्देष्वपि[17] लक्ष्यवशादिच्छातः पदार्थाश्रयणे सर्वे शास्त्रे प्रक्रियाभेदा दर्शनभेदाश्चोपपद्यन्ते।

## उभयथा (हि) आचार्येणेति।

अत्र चोद्यते—ननु उभयपदार्थिकस्य द्रव्ये पदार्थे बहुषु बहुवचनं सिद्धम्, एकेनानेकाभिधानं जातौ पदार्थे। सत्यमेव मतम्। यदा तु कस्याश्चित् क्रियाया उपदेशे वा प्रतिषेधे वा जातिरेव, प्रकरणे वा जातेः शब्द उपादीयते; तदा तस्या एकत्वादप्राप्तं बहुषु बहुवचनमारभ्यते। एवं यदा द्रव्यविवक्षा भवति तस्य च प्रकरणं तदा वाक्य इव सरूपाणां प्लक्षन्यग्रोधधवखदिरपलाशाश्च(इत्य)नेकशब्दत्वे प्रसक्ते वृक्ष वृक्ष वृक्ष इत्येकशब्दत्वाय यत्नः क्रियते। अपरः प्रकारोऽत्र वक्ष्यते। इह शुक्लवासाः क्रियतामित्यत्र शुक्लवासस्त्वमेव[18] क्रियमाणं [19]द्र०यमक्रियमाणं (क्रियया) स्तु तदा सम्बन्धः। इह तु शुक्लवासा (आनीयता-

---

[1] Ms डित्वेपि. [2] Ms-विनाद्येशा. [3] Ms डित्वोयं [4] Ms डित्व.
[5] Ms सा. [6] Ms तुग्धोपि. [7] Ms-पादे तस्य.
[8] Ms द्रव्य पपार्थि– [9] Ms भेदका. [10] Ms-धान गौण–
[11] Ms-दर्शनं। [12] Ms-गत– [13] Ms-वादो.
[14] Ms-ल्पते [15] Ms-कल्प्यंते. [16] Ms-दधति.
[17] Ms-ष्वतिपि. [18] Ms सत्वमेव [19] Ms द्रव

मिति) शुक्लवाससमान यत्यु[1] पलक्षणमपि क्रियायामन्तर्भवति, परिगृहीतोपलक्षणो[2] हि व्याप्रियते (विवक्षि) तत्वात्। इह तु यः शुक्लवासा दृष्टः स[3] आनीयतामिति तद्वत्, अतः केवलभेदके वाससी न तु तयोस्तत्र क्रियायामन्तर्भावः। एवमिहापि गौरित्यनेन शब्देन गोत्वमेवाभिधीयते न द्रव्यमिति वाजप्यायनदर्शनम्। तथा द्रव्यमप्यभिधीयते,[4] उपलक्षणं गोत्वादय इति व्याडिमतम्। अयं तु भगवान् पाणिनिः, उभयमुच्यते शब्देनेति प्रतिपन्न इत्येतत्कथ्यते। [5]इदं च संबन्धमुपनीयते "उभयथा हि आचार्येण" इति। इह कः सिंहः? अयं श्वेत्युक्ते यदा शौर्यमुपादीयते तदा श्वा सिंहत्वेन विपरिणम्यते। धात्वर्थविवक्षायां सिंहः [6]श्वत्वेन परिणम्यते। एवं व्रीहिः इत्युभयाश्रयणे यदा द्रव्यत्वमापाद्यते जातिस्तदा सिद्धं बहुवचनं, जातितां चापादिते द्रव्ये सिद्धमेकशब्दत्वम्। विपरीतार्थक्रियायां तु एकवचनमनेकशब्दत्वं[7] मा प्रापदिति योगद्वयं पठति। एवमुपदेशशब्देष्वपि योज्यम्। अत एवैतत् उक्तं[8]—"किंचित् प्रधानभूतं किंचित् गुणभूतम्" (भा. १. २. ६४) इति।

## किं पुनर्नित्यः शब्द आहोस्वित्कार्य इति।

अत्रापि विप्रतिपत्तिः, वेदविदां नित्योऽन्येषां[9] अनित्यः। अथवायमर्थः—नित्या एवैते[10] शब्दा गौरित्येवमादयः। येषां तु आकृतिलक्षणः अथवोत्पाद्यवस्त्वेवदं समयोयं वाविकैर्वृत्तः (?) केचिदेवं मन्यन्ते—य एवैते प्राकृताः शब्दाः त एवैते नित्याः। प्रकृतौ भवाः प्राकृताः। अन्ये मन्यन्ते—इयं दैवी वाक्। सा तु पुरुषाशक्तेरालस्याद्वा प्रकीर्णा। यथा [11]अम्बाम्बेति शिक्षमाणो बालोऽन्यथोच्चारयतीति। अथवा यथैवेह[12] वस्तु द्वेधावस्थितं द्रव्याकृतिभेदेनैवं[13] शब्दोऽपि। य एते शब्दा(ः) किं ते शब्दाकृतय आहोस्वित् शब्दव्यक्तय इति। तत्र यदायं वृक्षः (इत्यत्र) वृक्षादयः शब्दाः क्रमजन्मानः अयुगपत्काला[14] वृक्षशब्दत्वाकृतेरक्रमाया (अ)भिव्यक्तिहेतवो भवन्ति, यथा (सा)स्नादयो[15] (गो)त्वस्येति; तदा वृक्षशब्दत्वादर्थप्रतिपत्तिः। सा च नित्या। अभ्यासाच्च साकृति(ः)केनचित् पुरुषेण कतिभिश्चिदेव वर्णव्यक्तिभिरवगृह्यते। येषां(तु)रेखामात्रेणैव चित्रे प्रतिपद्यन्ते पुरुषोऽयं लिख्यते हस्ती नेति एतस्मिन् दर्शने नित्यः शब्दः तत्र चैतदुक्तं—"उभयतः स्फोटमात्रं प्रतिनिर्दिश्यते। रश्रुतेर्लश्रुतिः"[16] (भा. ऐओङ्) इति। यस्यापि शब्दव्यक्तिः तस्यापि नित्य(ः) शब्दः। स तु नादाभिव्यंग्यः, पदनियतो नादः। यथा चक्षुरादयो नियता अभिव्यंजका अभि-

---

[1] Ms-मानमप्यु [2] Ms-तोपि लक्षणो [3] Ms सा [4] Ms धीयेत
[5] Ms इदं इदं च [6] Ms स्वत्वेन [7] Ms-त्व–
[8] Ms एव तत् वक्तुं [9] Ms नित्ये येषां [10] Ms नित्य एव। ते
[11] Ms स्वस्विति, Cf. Vāk. I. 153. [12] Ms यथैवाह
[13] Ms-नैव [14] Ms पत्क्ला [15] Ms स्नादेया [16] Ms–श्रुतेः

व्यंग्येषु [1]रूपादिषु । नादवृद्धिह्रासानुविधायिनश्च । [2]यथादर्शमण्डलादिषु प्रतिबिंबानि दीर्घाणि [3]परिमण्डलानि महान्ति अन्यानि च दृश्यन्ते, एवं शब्दा अपि नादभेदेन भिद्यन्ते । यथा सलिले तरंगभेदेनैकश्चन्द्रोऽनेक उपलभ्यते, प्रदीपभेदाच्च छाया भिद्यते, आदर्शभेदाच्च प्रतिबिंबभेदः । तस्मान्नियतनादा- ५ भिव्यंग्या [4]नादवृद्धिह्रासानुविधायिनो[5] व्यक्तिशब्दा अपि नित्याः । स च नादः श्रोत्रस्यानुग्रहे[6] वर्तते । तदनुगृहीतं श्रोत्रं शब्दोपलब्धौ समर्थं भवति, यथा अक्ष्णोरंजनमित्येके । अपरे शब्दस्यैव, यथा प्रोक्षणं पृथिव्या एव न घ्राणस्य । [7]उभयोरित्यपरे, यथा वर्शेदिकस्य प्रथमश्चक्षुरश्मीन् (?) घटं चानु- गृह्णाति । एवं च सति वर्णः पदं वाक्यं च सर्वं[8] नित्यम् । वेदवाक्येषु त्वेष १० विशेषः, न तत्र विपर्यासेन[9] शब्दस्यार्थे प्रयोगोऽस्ति । लोके त्वस्ति प्रयोगः "आहर पात्रं, पात्रमाहर, त्वं पचसि (पचसि त्वम्)।" "इषे त्वोर्जे त्वा" इत्येवंभूतः प्रयोगोऽस्ति (न) त्वा इषे त्वा ऊर्जे इति । लौकिकवैदिकयोरेष[10] विशेषः, प्रयोगे नित्यत्वं[11] वैदिकानां, अनित्यता[12] लौकिकानामिति । नित्यता चापि द्विविधा, व्यवहाराश्रया परमार्थाश्रया च । परमार्थाश्रया[13] वैशेषि- १५ कदर्शनेन परमाणव आकाशादीनि च । व्यवहाराश्रया— "[14]नागरातिविषा- मुस्ताक्वाथः स्यादामपाचन" (चरक. ग्रहणीचिकित्सित. १६. ६४) इति । न चरकवचनादेषामामपाचनत्वम् । किं तर्हि ? स्वभावात् । एवमिहापि पाणि- निनान्येन वा शब्दा एव (स्मृताः) [15]स्वतोऽर्थप्रत्यायका[16] इति व्यवहारनित्य- तैवेहोपकारिणी ।

२० **संग्रह एतत्प्राधान्येन परीक्षितं[17] नित्यो वा स्यात्कार्यो वेति ।**

चतुर्दशसहस्राणि वस्तूनि अस्मिन् संग्रहग्रन्थे । शास्त्रपूर्वात्[18] प्रयोगा- दभ्युदय इति; उभयथा (ल)क्षणं प्रवर्त्यमित्ये(व), संग्रहे निर्णयः ।

**कथं पुनरिदं भगवतः ।**

कार्यो वा नित्यो वा । अयन्त्वाचार्यः किं दर्शनं [19]प्रमाणी(कृ)त्य २५ प्रवृत्त(:) ? किं वेदविदामुतान्येषामित्येतत्पृच्छति । अथवा "कथं पुनरिद" मिति । यद्यपि पाणिनेरभिरुचिता नित्यतानित्यता वा, इदं तु शास्त्रं कथं प्रस्तुतम् ?

---

[1] Ms तूपा
[2] Ms यत्वा-
[3] Ms मरि
[4] Ms राद
[5] Ms विद्यापिनो
[6] Ms-स्यनुग्रह
[7] Ms उभयोर्नित्य
[8] Ms सर्वे
[9] Ms पर्यासन
[10] Ms रेव
[11] Ms गनित्यत्वे
[12] Ms अनियता
[13] Ms श्रया च वैशे
[14] Ms नागरका अति
[15] Ms सतार्थं
[16] Ms यक
[17] Ms परीक्षते
[18] Ms पूर्वात्त
[19] Ms प्रमाणं

किं तावदवगच्छामः ? अहमेव शब्दार्थसंबन्धानां स्रष्टा यथा [1]ब्रह्मणोऽभिजानतः प्रजोत्पादनं प्रति । अथाप्येवं दर्शनं अवस्थिता[2] एवामी शब्दार्थसंबन्धा, अहं तु वृत्त(ज्ञ)त्वात् बहुश्रुतत्वाद्वा (स्मर्ता) स्यां तेषामिति ।

## सिद्धे शब्दार्थसंबन्धे ॥ वा ॥

परमार्थनित्यता व्यवहारनित्यता वा शब्द...नित्यशब्दवृत्तिः, अनित्यशब्दवृत्तिः कल्पनेति । करणसन्निपातोत्पन्नः प्रतिनियतो वर्णादिविषयो[3] ध्वनिरभिव्यंजक इति आकृतौ व्यक्तौ वा संस्कारः क्रियते । [4]आकृतिर्व्यक्तिर्वा अर्थस्य प्रत्यायिका । आकृतिसंस्कारस्त्वालंभनादिवत् व्यक्तिद्वारकः । तत्र नित्यशब्दवादिन इतरे...द्विषयत्वं सुपरिहारं भवति । प्रतिदेशत्वे शब्दानां नियमः सिद्धः । यथा "हम्मतिः सुराष्ट्रेरे(षु)" इति । तथा अविशेषेणोपदिष्टस्य डित्थ इत्यादेरर्थविशेष एवावस्थानम् । एवं हि एते प्रयुक्ताः, केवलं पाणिनिः स्मर्तेति । अर्थोऽपि, येषामाकृतिरभिधेया सा नित्या । द्रव्येऽपि पदार्थे[5] व्यवहारनित्यता । यदा यदा घटादयस्तदा [6]तदैवैते एव सन्निवेशा एवेति । [7]संबन्धो नि(यत) योग्यता, यथा रूपोपलब्धौ योग्यं चक्षुर्न श्रोत्रमित्येव गृह्यते । अथवा अर्थः शब्दप्रयुक्त[8] इति शब्दार्थयोः कार्यकारणलक्षणः संबन्धः । तत्रार्थस्य नित्यत्वादनिर्दिश्यमाना अप्यर्था वीप्सा [9]कृत्वोर्थादय उपसिक्तादयश्च, सप्तपर्णस्त्रिदशा इति दध्योदन इति [10]चांगीभवन्ति । तथा चोक्तं—"स्वभावतोऽर्थेषु वर्तमानानां निमित्तत्वेनान्वाख्यानं, तद्यथा कूपे[11] हस्तदक्षिण" (भा. २.१.१)इति । संबन्धेऽपि नित्य(त्व)मुक्तं सरूपसूत्रे—"तस्माद्वक्तव्यम्, द्वयर्थो बह्वर्थश्चेति । उच्येत[12] न तु गम्येत । यो हि गामश्व इति ब्रूयात् (अश्वं वा गौरिति) न जातुचित् संप्रत्ययः स्यात् " (भा. १.२.६४) इति ।

## अथ सिद्धशब्दस्य कः पदार्थः ?

नावयवार्थः, पृच्छ्यते । कस्तर्हि ? समुदायार्थो लौकिकः, सामर्थ्यात् रूढिशब्दः ।

## नित्यपर्यायवाची सिद्धशब्दः ।

नित्यस्यार्थस्य पर्यायेण वाचकः । कदाचित् हि नित्यशब्दस्तमर्थमाह, कदाचित् सिद्धशब्दः । यदा स्वरूपमाश्रीयते नित्य इत्यस्य स्वरूपस्य नित्यशब्दस्य यः पर्यायस्तद्वाची सिद्धशब्दः, नित्यशब्दस्य च पर्यायः[13] सिद्धशब्दः, तं चाह सिद्धशब्द इति । तत्र यथैव[14] विभुत्वादात्मनि सर्वगतस्यात्मेति व्यपदेशः प्रवर्तते

---

[1] Ms ब्रा–
[2] Ms-प्येवं दर्शनमेव स्थिता.
[3] Ms विषया.
[4] Ms आकृतिव्यक्तित्वार्थस्य.
[5] Ms पदार्थ-
[6] Ms तदैवेते.
[7] Ms संबन्धानि
[8] Ms अथशब्दप्रयुक्ते
[9] Ms कृत्वा अर्था-
[10] Ms चागी–
[11] Ms कूपो
[12] Ms उच्यते.
[13] Ms पर्यय:.
[14] Ms विभवादा–

प्राप्तिसामान्यान्निष्क्रियेऽपि एवमेव साध्यमानानां यास्थापरिनिष्पत्तिः(?) तत्सामान्यादसाध्येषु सिद्धशब्दस्य प्रवृत्तिः।

## कथं ज्ञायते ?

अभिप्रायः—पर्यायशब्दः शब्दान्तरनिरपेक्षस्तमर्थं ब्रवीति। यथा "इन्द्रः शक्रः पुरन्दरः" (भा. १.४.१) इति। न च शक्रादय इन्द्रार्थादर्थान्तरेषु वर्तन्ते। अयं तु सिद्धशब्दः शब्दान्तरोपसंहितोऽनित्यार्थमाह[1], कार्येषु च घटादिषु दृष्टः।

## [2]यत् कूटस्थेष्वविचालिषु भावेषु वर्तते।

[3]कूटस्थशब्दोऽयं (यत्) न व्ययीक्रियते तत्र प्रवर्तते। तद्यथा कूटस्थं [4]राशिं कुरु नास्मात् व्ययः कर्तव्य इति। अविचालिष्विति देशान्तराप्राप्तिं (अ)विपरिणामं [5]चाह। यस्य हि मात्रा अपनीयन्ते विपरिणम्यन्ते वा तन्नित्यं न भवतीति। अस्याभिप्रायः—पर्यायवाचिनोऽपि[6] सामान्यविशेषभावे[7] सामानाधिकरण्यं दृश्यते। वराहशब्दः पर्वते वर्तते सूकरे च वर्तते, प्रसिद्धतरस्तु सूकरे। पर्वतेन तु सामानाधिकरण्यमनुभवति "वराहो हिमवान्, वराहः पारियात्र[8]" इति। तत्र यथैव वराहशब्दः पर्यायस्सन् शब्दान्तरोपसंहितः प्रयुज्यते विशेषप्रतिपत्त्यर्थमेवं नित्यविशेषप्रतिपत्त्यर्थं पृथिव्यादीनामुपादानमिति न विरुद्ध्यते पर्यायशब्दत्वम्। शुक्लशब्दस्तु पर्यायो भूत्वा प्रवर्तते शुक्लं वस्त्रमिति।

## सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमिति।

[9]आर्हतानां मीमांसकानां च [10]नैवास्ति विनाश एषां, सति वा विनाशे प्रयोक्तृणां शब्दव्यवहारमतिक्रान्ता एत इति नित्या इत्युच्यन्ते। न हि प्रयोक्तृभेदेनोत्पाद्यमाना विनश्यन्तो वा दृष्टा इति।

## ननु च भो(:) कार्येष्वपि दृश्यते[11]।

अभ्युपगच्छामो वयं विशेषप्रतिपत्त्यर्थमुपादानं सत्यपि [12]पर्यायशब्द इति। तत्र किं वा [13]तन्निष्पत्तिरूपमाश्रित्य सिद्धशब्दो नित्येषूपसंह्रियते ? यदि निष्पत्तिरूपमाश्रीयते कार्येष्वपि निष्पत्तिरूपमस्तीति नास्ति सिद्धशब्दात् निर्णयः। [14]अथ मन्यसे, सत्यपि निष्पत्तिरूपे[15](न)तदाश्रीयते। किं तर्हि ? रूढिरेव।

---

[1] Ms-माहु.  [2] Ms य:  [3] Ms कूटस्थ: श–
[4] Ms शशिं.  [5] Ms चेह
[6] Ms, after-नोऽपि repeats from आचार्येण in line 1 on p. 18 to अन्तर्भवति in line 10 on p. 18.
[7] Msविशेषाभावे  [8] Cf. MB VIII. 1. 4.  [9] Ms आहूतानां
[10] Ms नैवारस्ते.  [11] Edn वर्तते.  [12] Ms पर्यास–
[13] Ms तन्निवृत्ति  [14] Ms प्रथमन्यमन्यसे.  [15] Ms-रूपो

तद्यथा गंगादिरूपेणाश्रिता तन्नामिकाणं उत्पादयति गांग इति। देवतादिरूपेणाश्रीयमाणा ढकं, गांगेय इति। एवं वासुदेव इति (यदा) अपत्यत्वेनोच्यते [1]वसुदेवस्यापत्यमिति तदा क्षत्रियाख्या। यदा तु [2]वसन्त्यस्मिन्देवा इति तदा "संज्ञैषा[3] तत्र भगवत" (भा. ४.३.९८)इति। दुर्योधन इति कृच्छ्रेण योद्ध्यत[4] इति तदा कौरवत्वेनाख्यानाद्धि[5] कौरव इति दौर्योधन इति[6] अनुकारि (?) [7]यथैव नित्येषु रूढ[8] एवं [9]कार्येष्वपीति। यदि निमित्तापेक्षो यदि रूढिशब्दः सर्वथा नास्ति नित्यपर्यायवाचिन इति निर्णयः।

## संग्रहे (तावत्) कार्यप्रतिद्वन्द्विभावात्।

इह सामान्यस्य स्वविषयस्मृतिहेतुरनेकः साहचर्यादिः। यथा शिला-
१० शब्दस्य सामान्यं स(ह)चरितैर्भिद्यते। लोहदण्डमानय शिलां चेत्युक्ते व्यायामाप्रतिपत्तिः शिलांगत्वाच्चेति पेषांगे (?) तथा रामलक्ष्मणाविति [11]दाशरथौ, रामकेशवाविति बलदेवे। विरोधे नापि किंचित्साहचर्यं यथा, [12]रामार्जुनाविति जामदग्न्ये कार्तवीर्ये च प्रतिपत्तिः। एवं संग्रह एतत्प्रस्तुतं, किं कार्य(:) शब्द [13]अ(थ) सिद्ध इति। कार्यशब्दसन्निधाने प्रयोगात् सिद्धशब्दो [14]नित्यार्थ-
१५ वृत्तिः। तथा न (।) किं तर्हि ? कार्यो, न कार्यः सिद्ध इति कार्यत्वप्रतिषेधात् [15]सिद्धत्वाप्रतिषेधाच्च निश्चितम् (।) संग्रहे

## नित्यपर्यायवाचिनो[16] (ग्रहणमिति) इहापि तदेव।

कुतः ? संग्रहोऽप्यस्यैव शास्त्रस्यैकदेशः। तत्रैकतन्त्रत्वात् व्याडेश्च प्रामाण्यादिहापि तथैव सिद्धशब्द उपात्तः।

२० **अथवा सन्त्येकपदान्यप्यवधारणानि।**

अनपेक्ष्य ग्रन्थान्तरं संप्रत्युच्यते। इह किंचित् द्विपदमेवावधारणं भवति यत्र एवकारः श्रूयते।

## अप एव भक्षयति वायुमेव भक्षयतीति।

अवधार्यमाणस्यार्थस्य शब्दान्तरेणोपात्तस्यानवद्योतितमवधारणमवद्यो-
२५ त्यत एवशब्देन। यदा त्वर्थप्रकरणादेः [17]सोऽर्थोऽभिव्यज्यते तदा एवशब्दो न श्रूयत इत्यवधारणमेकपदमित्युच्यते। [18]तत्र न कश्चिदपो भक्षयतीति[19] अब्भक्ष-

---

[1] Ms वासु– [2] Ms वसत्य– [3] Ms संज्ञेषा.
[4] Ms योज्यत. [5] Ms-नादि. [6] Ms धमिति
[7] Ms-पथैव. [8] Ms नित्ये प्ररूढ. [9] Ms अधिकार्ये—
[10] Ms नित्यपर्णवा– [11] Ms-पर्णवाचिन. [12] Ms दाशरथ्यौ.
[13] Ms यमा [14] Ms प्रसिद्ध. [15] Ms नित्यस्यार्थ–
[16] Ms सिद्धत्व- [17] Ms चिनुं. [18] Ms–सार्थो–
[19] Ms-तत्र [20] Ms यतांति.

श्रति(:) सामर्थ्यदन्यनिवृत्तिपरा[1], अप एव यो भक्षयति स आनीयतामिति। तथा य(:) संप्रत्यब्भक्षः संपन्न इति प्रागपि तस्यानुप्रवृत्तेरवधार्यन्ते आपोऽन्यनिवृत्त्यर्थम्। यथा पुनरत्र सामर्थ्यमिह सिद्धशब्दे किं सामर्थ्यम्? उच्यते—सिद्धशब्दोपादानात्तावन्नायमुभयार्थो गम्यते। एतावदेव वस्तु, नित्यमनित्यं वा, न किंचिदन्यन्नित्यानित्यमस्ति। तत्र यथैवाभिरूपाय कन्या दातव्येत्यभिरूपस्य प्रकर्षे [2]प्रवृत्तिर्नाभिरूपमात्रे, एवं केवलसिद्धशब्दः; य एवाव्यभिचारिणा सिद्धत्वेनानुगतस्तमेवोपादत्ते ध्रुवाणां [3]चाव्यभिचारि सिद्धत्वं[4] कार्याणां व्यभिचारि इति कार्येषु [5]पदान्तरोपसंहितः प्रवर्तते। तत्रापि च प्रवर्तमानो नित्यविषयमेकदेशमाश्रित्य प्रवर्तत इत्यत इदमुच्यते—

## सिद्ध एव यो[6] न साध्य इति।

एतच्च निष्पत्तिरूपाश्रितायां शब्दप्रवृत्तौ युज्यते, न [7]रूढ्याश्रितायाम्। एवं च सति अब्भक्षो वायुभक्ष इति युज्यते। यदा तु व्रतनामधेयोऽब्भक्षो वायुभक्ष इति च रूढिः[8] तदापि जातिवचनस्तदात्यन्तं रूढौ क्रियायां प्रवृत्तेऽवधारणाभावः।

## अथवा [9]पूर्वोत्तरपदलोपोऽत्र द्रष्टव्यः।

कः पुनरयं पूर्वोत्तरपदलोपः? अपायः। नहि अनुच्चारितस्य देवदत्तशब्दस्य पाणिनिरन्यो वा कश्चित् समर्थो लोपं कर्तुम्। तत्रैके मन्यन्ते—[10]एकदेशेपि लघौ समुदायस्मृतिः तत एवार्थप्रतिपत्तिरिति। एतदसम्यक्। नहि प्रती(य)मानादर्थप्रत्यायनं, न चानुमानि(क)ः [11]संस्कारः। नित्यत्वं च व्याकरण उक्तम्। यस्मादिदं दर्शनं—नामकरणकाले अनुनिष्पादितो नान्तरीयकत्वात् वाजिनवत् सह निष्पद्यते। तद्यथामित्तायै[12] क्षीरमुपाददानस्य एकसाधनसाध्यमामित्तासमकालं[13] वाजिनमपि निष्पद्यते। एवं सत्यभामाशब्देन सह सत्यशब्दो भामाशब्दश्च[14] निष्पाद्यते। तच्च पाणिनिर्लोपद्वारेणैवंभूतानां[15] अनुनिष्पादिनां साधुत्वमाचष्टे। [16]न तु ज्ये इत्येवमादीनां ज्येष्ठ(:)ज्ये इति उच्यते, विशाखा च ख इति। एवमिह सिद्धशब्दोऽत्यन्तसिद्धशब्दोऽनुनिष्पादी[17] यः स निर्दिष्टः, यथा पुनस्तत्रार्थप्रकरणादिति। विप्रतिपत्तिस्तु तस्यासंभवे। दत्तं [18]ह्यमाह्वयति अर्थो वा स तादृशो यो देवदत्तेन कर्तव्य इति दत्तशब्देन देवदत्तः प्रतिपद्येत, एवमिहापि। कथम्? उच्यते—इहापि यदि निष्पत्तिरूपा-

---

[1] Ms-पसं.  [2] Ms-प्रवृत्तिर्वाभि-  [3] Ms वाव्यभिचारिणां
[4] Ms त्व.  [5] Ms-पदान्त रोयसं-  [6] Edn omits यो.
[7] Ms रूप्याश्रि-  [8] Ms रुषिः  [9] Edn omits उत्तर.
[10] Ms एकं परोपि  [11] Ms स्यस्कारः  [12] Ms-मिक्षा। यतः
[13] Ms-मिक्षमेककालं.  [14] Ms-श्चा.  [15] Ms-णैव भूतानां
[16] Ms न दुर्ज्ञेय इ-  [17] Ms-शब्दानु निष्पादी  [18] Ms दायमा-

वाक्ये। किं तर्हि ? संबन्धोपलक्षणत्वेन, यथा नुम्ग्रहणमनुस्वारोपलक्षणार्थम्। एवं हि उच्यमाने, सिद्धे शब्दे संबन्धे [1]चेति, इदमपि गम्येत—शब्दस्य यः स्वयाकृत्या संबन्धस्तस्मिन्नित्य इति। अर्थग्रहणे तु सत्यभिधेयस्य प्रतिपत्तिरिति। अथ कथमनित्येऽर्थे संबन्धो नित्यः स्यात् ? उच्यते—समवायवत्। यथा समवायो नित्यविषयो [2]नित्यानित्यविषयः अनित्यविषयश्च नित्यः, एवमयमपि स्यात्। अथवा घटशब्दस्य या सर्वकालमर्थेनाशून्यता सर्वकालमा-[3]विष्टमेवार्थरूपेण शब्दरूपमित्येवंविषयां योग्यतामपेक्ष्य शब्दधर्मेणाह—

**नित्यो हि अर्थवतामर्थैरभिसंबन्ध इति।**

एतदेव च दर्शनमन्ते वक्ष्यति—"अथवा किं न एतेन इदं नित्यमिदमनित्यमिति"।

**(अथवा) द्रव्य एव पदार्थ एष विग्रहो न्याय्यः। द्रव्यं हि नित्यम्।**

"नित्यः पृथिवीधातुः। पृथिवीधातौ किं सत्यम् ? विकल्पः। विकल्पे किं सत्यम् ? ज्ञानम्। ज्ञाने किं सत्यम् ? ओम्। अथ तद्ब्रह्म"[4]। तदेतदुक्तं भवति—अतः परं शब्दार्थव्यवहारो निवर्तते; व्यवहारातीतोऽयमर्थ इति। तत्र यावन्तो निर्देशा अनित्य इति वा नित्य इति वा, सर्व एवैतेऽवस्थापेक्षाः। ताश्चानन्यास्तस्मादिति। यथैव च स्वमोन्यद्वा(?) ज्ञानं त्रैलोक्यमिति वा गृहमिति वा नाकारं पर्वतादिभेदैरविभक्तं, पर्वतादिप्रदेशेष्वेव मसावर्थ(:) स पुरुषादिः सर्वान् शब्दव्यवहारानतिक्रान्तो नित्यः परिकल्प्यते। तस्य च नित्यत्वे उपपन्ने विग्रहः।

**आकृतावपि पदार्थ एष वि(ग्र)हो[5] न्याय्यः।**

अपिशब्दो द्रव्येऽपि एवंभूत उपपन्न इति प्रदर्शनार्थः।

**न[6] क्वचिदुपरतेति कृत्वा[7] सर्वत्रोपरता भवति।**

यदुच्यते[8] आकृतिरन्योत्पद्यत इति, तदसत्। कस्याश्चित्तिरोभावात् [9]कस्याश्चित्त्वाविर्भावात्। पौरस्त्ये हि दर्शने सति (भावा)भावौ न स्तो जातेः। किं तर्हि ? आविर्भावतिरोभावौ। तौ चानुपलभ्यस्य……र्भवतोऽस्य पाणिनेरुभयं पदार्थ इत्येव सिद्धान्तः। तत्रोभयस्मिन्नपि पदार्थ अर्थस्य नित्यता न व्यावर्तत इति न शक्यतेऽस्या भावा(भावौ कल्प)यितुम्[10]। एवं प्रधानात्मन्यवस्थितमसंवेद्यं नास्तित्वात् प्रच्यवते।

---

[1] Ms वेति [2] Ms नित्यानित्यानि [3] Ms विषमे

[4] Quoted by Helārāja in his Commentany on Jātisamuddeśa, Vākyapadīya Benares Edn. P. 29

[5] Ms-हा. [6] Ms-क्वचित् दु- [7] Ms कृत्वातः

[8] Ms-से. [9] Ms-कस्याश्चित्। स्वावि- [10] Ms-भाव…वितुं

**द्रव्यान्तरस्था[1] (त्)पलभ्यते ।**

द्रव्यान्तरस्थाभिव्यज्यते[2] । तत्र तत्त्वान्यत्त्वप्रख्ययोरविकलयोरेकस्मिन् आश्रये विरोधादाकृतेरेकत्वमविनाशोऽस्तित्वं च[3] कल्पन्ते । अथापि यथोपन्यस्तं दर्शनमात्राप्यनन्यत्वाकृतिरिति (?) तदेव द्रव्यमुच्यते भवता । [4]नै(वं), यदि द्रव्यं नित्यमाकृतिरपि नित्या । अथवेदमपि दर्शनं—एकमपि तद्विरूरूपं (?) सर्वशक्तीनां समुदाय(:) । काचित्तु शक्तिः कदाचित्तिरोभवति[5] इति, कदाचिदाविर्भवतीति । यथा शब्दः प्रवर्तते (?)

**अथवा नेदमेव नित्यलक्षणं-ध्रुवं कूटस्थमविचालीति ।**

अनेन ग्रन्थेन त्रिविधामनित्यतामाह, त्रिविधा हि अनित्यता, संसर्गानित्यता विपरिणामानित्यता वस्तुविरामानित्यता च । अतोपि पयेण नित्यता (?) संसर्गानित्यता यथा—स्फटिकस्योपा(श्र)यविशेषैः संसर्गिभिर्द्रव्यान्तरैः प्रच्छादितं स्वरूपं नोपलभ्यते, स्वतः सच्च तदपि तथा[6](?)परिणामानित्यता यथा, [7]बदरस्य श्यामतातिरोभावे [8]रक्तताप्रादुर्भावेन । [9]वस्तुविनाशानित्यता, यः सर्वेण सर्वप्रध्वंसो निरुपाख्यः[10] । तदा नैतत्प्रतिपत्तव्यं, [11]यत्रैवैते धर्मा न सन्ति तन्नित्यमिति । एवं हि परिकल्प्यमाने सांख्यस्यैव आत्माऽविकारित्वा(त्)[12] नित्यः स्यात्, [13]प्रधान(स्य) तु विकारधर्मादनित्यत्वप्रसंगः[14] । तस्मादिदमपि नित्यलक्षणं—

**[15]यस्मिंस्तत्त्वं न विहन्यते तन्नित्यमिति ।**

स एवायमिति तुल्यबुद्धिहेतुत्वं[16], स एवायमात्मा वस्तुना अविनष्टं चात्मवस्तु घटत्वादि, अथवा स एवायं[17] स तथावस्थयोच्यते(?)

**अथवा किं न एतेन ।**

न हीदं शास्त्रं कस्यचिदेकस्य सहायभूतम्[18] । सर्वसाधारणम् । यथैव [19]सांख्यादीनां [20]द्रव्यादेर्विप्रतिपत्तिः, रूपादिसमुदायो[21] घटोऽर्थान्तरभूतो वेति, यस्य यो घटस्तस्मिन् घटशब्दं प्रयुंक्ते एवं यस्य यादृशी नित्यता अभिप्रेता तां नित्यतामाश्रित्यार्थस्यायं विग्रहः क्रियते । तत्र क्षणिकवादिनामविच्छेदेन

---

[1] Ms-द्रव्यान्तरेस्यो  [2] Ms-रस्याभिव्यज्यते  [3] Ms-स्तित्यव-
[4] Ms ने.  [5] Ms रोभाव इति.  [6] Ms-पि परि तथा
[7] Ms वदनस्य  [8] Ms-नकृता  [9] Ms व्यस्तु-
[10] Ms-रव्यो.  [11] Ms यदेवैते  [12] Ms-त्व-
[13] Ms प्रधानं  [14] Ms-र्मात्परित्यत्वप्रसंगः
[15] Edn तदपि नित्यं and then यस्मिन् etc.  [16] Ms तुल्यं बुद्धि हतुत्वं
[17] Ms-य.  [18] Ms-भूत.  [19] Ms सं-
[20] Ms द्रव्यादेव  [21] Ms-समवायो

प्रकृतिर्या सा नित्यता (?) इतरेषां [1]प्रधानाव्यवस्थानदर्शनेन नित्यता। [2]अथवेदं प्रतिपादयति तत्र।

**किम्न एतेनेदं नित्यमिदमनित्यमिति।**

किमस्माकं वस्तुगतेन विचारेण।

**[3]यत् नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते।**

अर्थश्चास्मकं यः शब्देनाभिधीयते, तत्र वस्तु यदि नित्यं यद्यनित्यं शब्दस्तु न कदाचिदभिधेयश्चानित्य इति शब्दो [4]नार्थप्रवृत्तिपूर्वः, तत्र [5]नित्यं कालस्वरूपेण व्यावेशाद्यश्च घटशब्दो यश्च शशविषाणशब्दः[6] सर्व एते सर्वकालमर्थैरशून्या व्याविष्टा एवार्थरूपेणेत्येवंभूते पदार्थे युक्त एवैष विग्रहः,
१० "सिद्धे शब्दे अर्थे संबन्धे चेति"।

**कथं पुनः ज्ञायते ?**

उपपत्तिं पृच्छति।

**लोकतः ॥ वा ॥**

लोकात् हि प्रसिद्धमिदं नित्यमिदमनित्यमिति, यादृशी लोकप्रवृत्तिः
१५ कार्येषु भावेषु तादृशी न शब्देषु, ये लौकिका [7]अर्था(:) शिक्षापूर्वकाः ते न शिक्षामन्तरेण निर्वर्तयितुं शक्यन्ते, तद्यथा घटेनार्थी[8], न च शिक्षितः, घटकरणे तु कुशलं कर्तारमुपैति कुंभकारं—

**कुरु घटं कार्यमनेन करिष्यामीति।**

एवं यदि शब्दा गौरित्येवमादयः पाणिनिप्रभृतिभिरेव सौरक्रीडावत्[9]
२० व्यवहारार्थेषूत्पादिताः स्युः तत्राशिक्षितः पुरुषः कुशलान् [10]प्रयोज्यान् (वै)याकरणानुपेयात्। न चोपैति[11]।

**तावत्येवार्थमुपादाय[12] शब्दान् [13]प्रयुङ्क्ते।**

[14]बुद्ध्या समीक्ष्यार्थं प्रयुङ्क्ते[15] एव। तस्मादेतदवसेयं, अवस्थिता एवामी शब्दार्थसं(ब)न्धा इति। अन्ये वर्णयन्ति—सोमसौरक्रीडावदुत्पादिताः,
२५ यथा शब्दान् पृच्छति एवमर्थानपि[16]। अस्य शब्दस्य कोऽर्थः? एवं संबन्धमपि करोति। नहि शब्दमवस्थाप्यार्थ(सं)बन्धा[17]वुभावुपश्लेषयति। तस्मा-

---

[1] Ms प्रधानाव्यवस्थावद-
[2] Ms अथवैदं
[3] Ms यदस्माकं नित्यं
[4] Ms-नार्थो प्रवृत्त-
[5] Ms नित्य-
[6] Ms-ब्दो
[7] Ms अथा-
[8] Ms घटो नार्था
[9] Ms सारक्रीडाचेत्
[10] प्रयोज्यत्वेव्याकर
[11] Ms चोपेति
[12] Ms वार्थमर्थमादाय
[13] Edn प्रयुञ्जते
[14] Ms बुद्धो
[15] Ms प्रत्युक्त
[16] Ms-मर्थविन
[17] Ms-वंता-

देतदवसेयं, व्यवस्थिता एवामी शब्दार्थसंबन्धाः। यत एकस्मिन्नेव काले बुद्ध्या निरूप्यन्त इति। अन्ये वर्णयन्ति—यत्तदुक्तं[1] "दर्शनस्य परार्थत्वात्[2]" विप्रवृत्तत्वादिति, तदेवानेन भाष्येणोक्तमिति। कार्याणामवाविनियोगादप्यन्यदृर्शनमस्ति(?) उत्पत्तिं प्रति अस्य तु यदृर्शनं योपलब्धिः या निष्पत्तिः सा परार्थरूप इव नहि अपरार्थताशून्यः कालः क्वचिदस्ति(?) तस्मादेतत्प्रतिपत्तव्यम्—अवस्थित एवासौ प्रयोक्तृकरणादिसन्निपातेनाभिव्यज्यत इति। अस्यां कल्पनायामियं न संबध्यते—

**यदि तर्हि लोक एषु[3] प्रमाणमिति।**
**लोकतोऽर्थप्रयुक्ते[4] शब्दप्रयोगे शास्त्रेण धर्मनियमः ॥ वा ॥**

लोकाल्लोकतः। अर्थेन प्रेरितः[5] अर्थप्रयुक्तः। यस्माल्लोकादयं शिक्षते स लोकः सापराधः। साधूनसाधूंश्च शिक्षयति। यश्चात्मप्रत्यायनार्थः[6] प्रेरयिता स यथैव गौरित्येतं प्रेरयत्येवं गाव्यादीनपि। अतः शास्त्रप्रवृत्तिरेवमर्था[7], कथमसाधवो निवर्तेरन्निति। अथ शब्दप्रयोग इति प्रयोगग्रहणं किमर्थम्? एतावद्वक्तव्यं "लोकतोऽर्थप्रयुक्ते[8] शब्द" इति। उच्यते—अर्थप्रत्यायनं[9] बोधः। तत्र प्रत्याय्योऽर्थः। प्रत्यायनं[10] फलम्। शब्दः करणम्। शब्दार्थयोः (कर्म)करणयोरसति क्रियार्थे संबन्धाभावात् क्रियाभ्युपगन्तव्या। यथा च धान्यानां व्रीहीणामवहनने मुसलोद्यमननिपातनाभ्यां व्यवहितेन सम्बन्धो भवति, ततश्च कणमोक्षतुषविप्रमोक्षः (?) फलं निर्वर्तते एवमिहापि शब्दो द्रव्यभूतः करणं; अर्थः कर्म प्रत्याय्यते, तदवबोधः फलं, तत्फलं क्रियायाः। का पुनः सा क्रिया? उच्यते, प्रणिधिः प्रयोक्तुः शब्दान् प्रेरयतस्तद्विषयः। प्रणिधिश्चेतसो वृत्तिः, अयं योग्य एतमर्थं प्रत्याययितुमिति। सा क्रिया। एवं [11]ह्युक्तं—"आत्मा बुद्ध्या समर्थ्यार्थान् मनो युंक्ते विवक्षया" (पा.शि. ६) इति। यथा सत्येव चक्षुषि सति च रूपे न चक्षुरप्रणिहितमनधिष्ठितं मनसा विषयालोचनेऽसमर्थं भवत्येवं[12] शब्दो व्यवस्थितोऽर्थोऽपि प्रयोक्तुः प्रणिधानमन्तरेण प्रत्यायनेऽसमर्थ इत्येतत् प्रयोगग्रहणेनाचष्टे। अन्येषां दर्शनं—शब्दस्यानेको धर्मः। [13]यथा धातुरित्ययं यदान्वयव्यतिरेकाभ्यामर्थवानिति समधिगम्यते तदार्थवत्त्वात् धातुत्वं प्रतिपद्यते, अयमेव तु यदार्थपरित्यागे "एकाचो द्वे" (सू. ६. १. १.) इति वर्णत्वेनाश्रीयते तदा तस्यार्थपदार्थकस्यायमेकः अजिति, व्यतिरेके अस्येति संबन्धमुपनीयते। तथा ब्राह्मणशब्दा [14]अभ्यासकालेऽनर्थकाः [15]परप्रतिपादने स्वरूपपदार्थकाः एवं पठैवं पठेति; विनियोगकालेऽर्थवन्तः।

---

[1] Ms यतदुक्तं
[2] Mīm. Sū. I. 1. 18
[3] Ms शब्देषु
[4] Ms-र्थः प्रयुक्ते
[5] Ms प्रेरिते
[6] Ms-यवेर्थः
[7] Ms-र्थाः
[8] Ms-र्थः प्रयुक्ते
[9] Ms-प्रत्यायन
[10] Ms-यन-
[11] Ms युक्तं
[12] Ms भवंत्येवं
[13] Ms यथोद्गातरि-
[14] Ms अन्यास-
[15] Ms प्रर-

तत्र यासौ विनियोगकाले परिगृहीतार्थस्यसतोऽर्थेषु[१] प्र(ति)पत्तिः सा संबध्यते[२] [३]यच्चो(प)लक्ष्यते पारतन्त्र्यं स शब्दस्यात्मीयो धर्मः। नित्यः शब्दात्मा स [४]प्रयोगशब्देनोपसंगृह्यते, एवंभूतः शब्दोऽर्थेन प्रेर्यते न सर्व इति। अन्ये वर्णयन्ति—प्रयुज्यत इति प्रयोगः, शब्दश्चासौ प्रयोगश्च शब्दप्रयोगः। न
५ शब्दमात्रे धर्मनियमः। किं तर्हि ? प्रयोगार्थे शब्द इति। अन्ये वर्णयन्ति—कश्चिच्छब्दः प्रयुज्यते, कश्चिन्न प्रयुज्यते। "गुहा त्रीणि निहिता नेंगयन्ति"। न चेष्टन्ते इति, एते न प्रयुज्यन्ते। "तुरीयं वाचो मनुष्या वदन्ति" इति, तुरीयो भागः प्रयुज्यते। ये प्रयुज्यन्ते तेषां नियमः। तस्मात् य उत्कृष्टो धर्मः तस्मात् तेषां त्रयाणां ज्ञानमिति।

१० **धर्माय नियमो धर्मनियमः।**

धर्मनियमो नाम रूढः कश्चित्। तस्य तु नियतं तादर्थ्यमिति चतुर्थ्या विग्रहो[५] दर्श्यते। [६]षष्ठीसमासो हि अयं यथाश्वघासो नाम कश्चित्[७] ईषिकादिवस्तेषामेव(?) रूढः। नियतत्वात् तादर्थ्यस्य चतुर्थ्या विगृह्यते, अश्वेभ्यो घास इति षष्ठीसमास [८]एव। तथा चोक्तम् "अश्वघासादय(:) षष्ठीसमासा
१५ [९]भवन्ति" (भा. २. १. ३६) इति।

**धर्मार्थो वा नियमो धर्मनियम इति।**

शाकपार्थिवादित्वादुत्तरपदलोपः। धर्मार्थत्वादयमेव नियमो धर्म इत्यासन्नं कारणं[१०] धर्मं प्रति व्यपदिश्यते।

**धर्मप्रयोजनो वेति**

२० मीमांसकदर्शनम्। अवस्थित एव धर्मः, स त्वग्निहोत्रादिभिरभिव्यज्यते, तत्प्रेरितस्तु फलदो भवति, यथा स्वामी भृत्यैः सेवायां प्रेर्यते फलं प्रति, एवमयं नियमो धर्मस्य फलनिर्वृत्तिं[११] प्रति प्रयोजक इति।

**यथा लौकिकवैदिकेषु ॥ वा ॥**

**प्रियतद्धिता दाक्षिणात्याः।**

२५ अथ किं प्रियतद्धितत्वादपशब्दोऽयमिति[१२] प्रतिपत्तव्यम् ? नेत्याह। अत्र हि ये ते अवयवा [१३]लोके भवाः (वेदे) [१४]विदिता(:) शक्यास्ते तद्धितमन्तरेणोपसंग्रहीतुं, समुदायशब्देन लोक इति वा वेद इति वा। अयं त्वाचार्यश्चानवय(व)भूता(न्) पृथक्कृत्य लोकवेदयोश्चाधारत्वं[१५] निर्दिशति। तत्र किमन्यत्

---

[१] Ms-र्थसस्यतोऽर्थेषु [२] Ms सं संबधत [३] Ms. यत्त्वो
[४] Ms प्रयोगर्श- [५] Ms विग्रहे [६] Ms षष्टच समास
[७] Ms-त [८] Ms एवं [९] Edn. भविष्यन्तीति
[१०] Ms-सन्न कारण- [११] Ms-न्निवृत्ति [१२] Ms-दयं शब्दोऽयमिति
[१३] Ms लोकभावा: [१४] Ms विदिना [१५] Ms-धरत्वं

प्रियतद्धितत्वात्, यथा कश्चित् वनस्पतय इति भेदेन ब्रवीति, कश्चित्समूहरूपेण वानस्पत्यमिति।

## अथवा युक्त एवात्र तद्धितार्थः।

नात्रावयवावयवि(वि)भागः[1]। किं तर्हि? वाक्य एवानेकदेशभूतोऽर्थोऽभिप्रेतो लोकवेदाभ्यां। कः पुनरसौ कृतान्तः? सिद्धान्तः समयग्रन्थसन्दर्भः। एतदुक्तं भवति—यथैवान्ये[2] ग्रन्थसन्दर्भा धर्मनियमार्था [3]ए(व)मयमपि कस्मात् (न) गृह्यते धर्मनियमार्थमिति।

## लोके तावत् अभक्ष्यो ग्राम्यकुक्कुट इति।

नैष साधर्म्येण दृष्टान्तः। किं तर्हि? पक्षे पक्षे(?) न यो भक्ष्य इति, धर्मनियम इति, अस्मात्सामान्यादिह [4]उपात्तमर्थित्वात् भक्षणं [5]प्रसक्तमेवमेतत् नोपदेशात्।

## तत्र नियमः क्रियते।

एतेन क्षुत्प्रतिहन्तव्या नान्येनेति। अत्र केषांचित् दर्शनं—यदि तद्वचनमभक्ष्यो[6] ग्राम्यकुक्कुट इत्यस्यानुपादानात् धर्म इति। अन्ये मन्यन्ते—यथैव विषभक्षणात् ध्रुवो मृत्युरिति विषं भक्ष्यत एवमुपपातकमिदमिति स्वभावात्, तस्मात् तत्परित्यागात् धर्म इति। एवमर्थावबोधं प्रति सर्वोऽर्थः शब्दमपशब्दं च प्रयुंक्ते। तत्र शब्देनासौ प्रत्याय्यो नेतरेणेति नियमः क्रियते। ननु च [7]क्षुदिति य(दि) स्त्री(समनाधि)करणात् कृत्यः क्षुधि कर्मण्युत्पन्नः, तत्रैवं भवितव्यं—[8]शक्या चानेनेति। नैष दोषः। सामान्येनोपक्रमो विशेषेणाभिधानम्। इह शकेः कृत्यः सा(मा)न्यद्रव्यविषये कर्मार्थे[9] प्रवृत्तः समाप्तलिंग एवाजहल्लिंगं विशेषेण अभि(सम्ब)ध्यते[10]। तत्र विशेषे यः कर्मभावः स उपभुक्तः कृत्येनेति प्रथमा[11]। यथोक्तं "मुखनासिका वचनमस्य" (भा. १. १. ८), नोच्यते मुखनासिका वचनी[12] यस्येति।

## तथा खेदात्।

खेदो नाम [13]यदिंद्रियस्य स्वविषये प्रवर्तमानस्य निग्रहं प्रत्यसामर्थ्यम्। अथवा खेदयतीति खेदः, राग एवोच्यते।

## खेदात्[14] खलु[15] स्त्रीषु प्रवृत्तिरिति[16]।

---

[1] Ms-भाव: [2] Ms-न्यै.
[3] Ms य- [4] Ms-उपात्तमार्थत्वाल्लक्षणं [5] Ms-प्रसक्तमेवमेतरेनोप
[6] Ms ग्राम्य: [7] Ms क्षुद्वितीयस्याकरणात् [8] Ms शक्यं चानानेति
[9] Ms सत्यद्रव्यविषयं कर्माथ [10] Ms लिङ्गविशेषेण भिद्यते [11] Ms प्रथम:
[12] Ms मुखे नासिकावचनो [13] Ms यदिद्रियस्य। सवि- [14] Ms रागात्
[15] Edn.omit खलु [16] Ms त्रव्यतिरिति

अथवा दैन्यं खेदः । एवं तावत् पौरुषेयाभिमतं स्मृतिशास्त्रं स्मृत्वोपनिबद्धं; (वेदे) तदपि प्रदर्शयति ।

**वेदे खल्वपि—पयोव्रतो ब्राह्मण इति ।**

अथ किं पयोव्रतत्वं क्रत्वर्थम् ? नेत्याह । यदि क्रत्वर्थं स्यात्, यथान्येषु अवदानप्राशनादिष्ववश्यं प्रवृत्तिरेवमत्रापि स्यात् । न चावश्यं दीक्षितः पयो व्रतयति । अर्थित्वे हि सति, यथा "कृष्णविषाणया कण्डूयति"[1] इति [2]प्रसक्तमेव कण्डूयनमुपजातायां कण्ड्वां कृष्णविषाणया क्रियते । यदि च क्रत्वर्थमभ्युपगम्यते यस्य[3] प्रकृतभोजनमप्रतिषिद्धं अन्यस्मिन् काले स चास्मिन् व्रते प्रवर्तते । यथा "आज्यमवेक्षत"[4] इति क्रत्वर्थमवेक्षणमिति, न द्रव्यान्तराणामवेक्षणं[5] प्रतिषिद्ध्यते ।

**बैल्वः खादिरो (वा) यूपः स्यादिति ।**

पशोरस्वतन्त्रीकरणार्थं यूप उपादीयते । [6]तत्र हि अस्वतन्त्रीकरणं यत्, दृष्टं फलं निष्पद्यते, यदि शिष्टे कृ(त)चषालेऽष्टाश्रौ काष्ठे पश्वनुबन्धः क्रियते ।

**[7]तथाग्नौ कपालानीति ।**

अत्रापि पुरोडाशानां पाको दृष्टफलं, न चानेन मन्त्रेण कंचित्पाक[8]विशेषमुपलभामहे । ततश्चादृष्टमत्रास्ति फलमित्येतदनेन प्रतिपादयति । यद्यप्येष पक्तिः स्यात्, साधुवदपशब्दा अपि वाचका इति, एवमपि दृष्टं फलं तुल्यमर्थावबोधः । इह तु (अ)दृष्टं फलं अस्त्यभ्युदय इत्यतश्चाह—

**एवमिहापि समानायामर्थो(व)गतौ[9] ।**

**शब्देनैवेति, अभ्युदयकारि च भवतीति,**

च ब्रुवतेदमभ्युपगतं भवति—[10]विहितपरित्यागा(त्) धर्मो नश्यति[11] इति । अन्ये मन्यन्ते—तत्परित्यागादधर्मः केवलश्च भवति । अयमेव चाभ्युदयो यदत्र एनसा न युज्यत इति ।

**[12]अस्त्यप्रयुक्तः ॥वा॥**

एतत्परिगृहीतं—[13]प्रयुज्यमानानां ह्य(न्वा)ख्यानमिति । [14]एते चोषा-

---

[1] TS. VI. 1. 3.
[2] Ms प्रकृतमेव
[3] Ms यत्
[4] Ms-वेक्ष्यत
[5] Es णमिति प्र
[6] Ms-तत्राद्यस्व-
[7] Ms यथा
[8] Ms-विशेषणमुप-
[9] Ms-मर्थगतौ
[10] Ms अविहित-
[11] Ms नश्यत
[12] Ms अथ प्रयुक्त
[13] Ms प्रयुज्य माक्ताना व्याख्यान-
[14] Ms एत्ते चाषा-

दयो न प्रयुक्ता लोके व्याकरणे (वा) ये[1] ग्रन्थेषु च लिखिता न चासाधूनां[2] ग्रन्थे नीतिरुपपद्यते। पूर्वपक्षद्वारेणैतत्प्रतिपादयितुकामो [3]यदेतदप्रयुक्तत्वं शब्दानां नैतद्यस्य कस्यचिद्वचनादेव तिष्ठति, य एव[4] वस्तुश्रुतः [5]शिष्टाः सम्मताः शब्दव्यवहारेषूपरताः स्वतन्त्रास्तेषामेव वचनादिति।

५ **इदं (तावत्) विप्रतिषिद्धम्।**

अयमभिप्रायः—येऽर्था अर्थक्रियामन्तरेण प्रसिद्धास्तेषु इयं वाचोयुक्तिरुपपद्यते। यथा [6]घटो(ऽन्त)रेण स्वामर्थक्रियां [7]अबाद्याहरणादिकां प्रसिद्धः सिद्धः, [8]शब्दस्त्वयं स्वामर्थक्रियामन्तरेण (न) जातु प्रसिद्धः[9] सिद्धः। प्रयोगादे(व) ह्ययमस्तिरूपं प्रतिपद्यते। तत्र यथैव कश्चित् ब्रूयात् अप्रयोगादिति १० तथाजातीयकमिदम्।

**प्रयुंजान एव खल्वपि[10] भवान् इति।**

अनुपरतकरणव्यापार एवाह अप्रयुक्त[11] इति। अचिरनिर्वृत्तं[12] प्रयोगमाचष्टे, संप्रत्येव [13]ह्ययं प्रयुक्त इति।

यथा कश्चित् ब्रूयाद्यावज्जीवं मेद्यो न मतेन ब्रवीदीति तथेवेदं भवता १५ तत्र यदि अप्रयोगानुमन्यन्ते त्वया प्रयुक्त इति प्रयोगान्मन्यन्ते (?)। [14]अथ मन्यसे—अहं प्रयुंजे न त्वन्य इति अन्येनाप्रयोगात् असत्त्वमेषामिति, एतदप्यसत्। अशक्त्या[15] ह्या तेन्यै (?) नोच्चार्येरन् न चैतावतैव[16] न स्युः। वहवो हि शब्दास्त्रिभिर्नोच्चार्यन्ते। अथैषा भवतो बुद्धिः—किं ममोच्चारयतः ? अनाप्तोऽहमितीदमाह[17] प्रोत्साहनार्थं, मा अवमंस्था आत्मानमाप्तो भवानिति।

२० **कश्चेदानीमन्यो भवज्जातीयकः।**

कोऽन्यो भवतो विद्वत्तर इति।

**नैतत् विप्रतिषिद्धमिति।**

एतदाह[18]—द्विधा सत्ता, प्रत्यक्षा आनुमानिकी चेति। तत्र प्रत्यक्षा "दाधर्तिदर्धर्ति[19]" (सू. ७. ४. ६५) इति। आनुमानिकी प्रकृतिप्रत्ययोपदेशेन २५ कर्तव्या[20]। [21]तत्र ऊष इत्येवमादीनां प्रकृतीनां प्रत्ययानां चोपदेशात्, डुशिल्

---

[1] Ms प्रयुक्तलोकव्याकरणा यं
[2] Ms चासाकतर-
[3] Ms यदेवद-
[4] Ms एवं
[5] Ms शिष्टः सम्मतः
[6] Ms घंटारेण
[7] Ms अवाद्या-
[8] Ms शब्दः स्वयं स्याम
[9] Ms-द्धाः
[10] Edn. Omit. अपि
[11] Ms-वाहो प्रयुक्तं
[12] Ms-निवृत्तं
[13] Ms-द्वयं
[14] Ms अप
[15] Ms शक्या
[16] Ms-तेव
[17] Ms मिताद माहा
[18] Ms हा
[19] Ms ददर्थर्ती-;
[20] Ms-व्यादीनां
[21] Ms तत्रैष

शिवश्चैषां(?) नियतविषयत्वान्नोक्तम्, ग्रन्थेषु च लिखितत्वादिदमवसितं—[1]सन्त्येत इति। अथ लोके न प्रयुज्यत इति इदं ब्रूमः "अप्रयुक्त" इति; ब्रुवा(ण)श्चाहं कथं ब्रूयामप्रयुक्त इत्याह—

**[2]न ब्रूमोऽस्माभिरप्रयुक्ता[3] इति।**

**अभ्यन्तरोऽहं लोके न त्वहं लोक इति।**

[4]एतदुक्तं भवति, यथा लोकः शब्दान् प्रयुंक्ते नैवमहमेतानूषादीन् प्रयुंजे इति।

**[5]नार्थे शब्दप्रयोगात् ॥वा॥**

अर्था हि [6]कालपुरुषादयः सन्ति[7]। शब्दस्य चार्थान्तरेषु गुणभावात् प्रधानसन्निहितेन शब्देन भवितव्यम्। अथवार्थोपलब्धि(:) शब्दास्तित्वे[8] अनुमानम्। नहि कश्चिदर्थो[9] शब्द वे……स्त (?) तत्र[10] यथैव स्वर्गापूर्वदेवताशब्दा उपलभ्यमाना अत्यन्तापरिदृष्टानामर्थानां [11]अस्तित्वानुमानं, एवं किं न गृह्यतेऽर्थ उपलभ्यमानः शब्दास्तित्वस्यानुमानमिति[12]।

**अप्रयोगः प्रयोगान्यत्वा (त्)[13] ॥वा॥**

योऽयं शब्दास्तित्वे हेतुरुपादिष्टः, [14]अशब्दकस्यार्थस्य (अ)सत्त्वादिति, अत्र ब्रूमो, यद्येषामर्थानां वाचका न स्युः प्रतिपद्येमहि एषां अस्तित्वम्। यतस्तु सन्ति तस्मादहेतुरयं। ननु चोषेत्यस्य उषिता इति समानार्थो न भवति, [15]पुरुषस्य परोक्षतायाश्चा(न)भिधानात्। नैष दोषः। वाक्यं तथाभूतं प्रयोक्तव्यं, यतः सर्वार्थाभिव्यक्तिर्भवति।

**अप्रयुक्ते दीर्घसत्रवत् ॥वा॥**

आद्यो न समयेत (?) प्रतिपादयत्यस्तित्वम्। यथा पूर्वकालं प्रयुक्तानि दीर्घसत्राणि इदानीं अप्रयुज्यमानान्यपि [16]ऋषिसंप्रदायो धर्म इति कर्मता (त)द्विषये[17] सिद्ध्यति[18] एवमन्यैः प्रयुज्यमानानि सर्वकालमिदानीं अप्रयुज्यमानानामप्यनुविधानं युक्तं (?) ये तु [19]ऋषिसंप्रदायो धर्म इति तेषां व्याकरणेऽयमर्थो न संभवति[20]। नहि इह शब्दोच्चारणात् धर्म इति।

---

[1] Ms सत्येत [2] Ms सत [3] Ms युक्त युक्त इति
[4] Ms एतद्वक्तुमंवति [5] Ms नाद- [6] Ms कल
[7] Ms सत् [8] Ms-स्तित्वानुमानां [9] Ms-दथो
[10] Ms-लत्र [11] Ms अर्थित्वा [12] Ms-मानामिति
[13] Ms-न्यत्वं [14] Ms अशब्दः कस्यार्थस्यरूपादिति
[15] Ms पुरुषस्य परोक्त- [16] Ms दधिमध्वादयो [17] Ms-द्विषय-
[18] Ms द्ध्य [19] Ms दधिमध्वादयो [20] Ms-वाति

## सर्वे देशान्तरे ॥वा॥

अथ यदा[1]याज्ञिकाश्चिरं जीवन्तोऽद्यत्वेऽप्याहरन्ति[2] एवमपि ब्रूमः—स(र्व) एते देशान्तरे प्रयुक्ता[3] इति ।

## वाक्योवाक्यम्

प्र(श्नोत्तर)युक्तो ग्रन्थः, "किंस्विदावप(नं)[4] महत्" इत्येवमादि ।

## इतिहासः

पूर्वचरितसंकीर्तनम्[5] । एतेषु कश्चिदेव शब्दः कस्मिंश्चित् प्रयुज्यते, यथा पुरुषीशब्दः स्त्रीलिंगः कचिदप्रयुक्तोमैत्रायणीयानां[6] कल्पे प्रयुज्यते । "तस्यामनड्वाही पुरुषी च धेनुके दात्रिणे दत्वाकारवनं प्रतिपन्नमायायदध्यवमभ्युपेयु" रिति (?)

## शवतिर्गतिकर्मा सर्वविभक्त्यन्तः[7] कंबोजेष्वेव भाषितो (भवति), विकार [8]ए(वै)नमार्या भाषन्ते, शव इति ।

जीवतः प्रकृतेर्मृता(वस्था)[9] विकारः । मृते नाशयुत[10] इत्यर्थः । अथवा गतेर्विकार(:) गत्युपरमः, [11]उपरतक्रिये भाषन्ते शव इति । निरुक्ते त्वेवं पठ्यते—विकारमस्यार्थेषु भाषन्त इति (नि. २. २.) । तत्रायमर्थः—[12]शवते(:)अच्प्र(त्य)यान्तस्य यो विकार एकदेशः तमेव भाषन्ते, न शवतिं[13] सर्वप्रत्ययान्तां[14] प्रकृतिमिति ।

## किं पुनः शब्दस्य ज्ञाने धर्म आहोस्वित्प्रयोग इति ।

एतावदुच्यते "शास्त्रेण धर्मनियम" इति । स धर्मनियमः किं ज्ञानादथ प्रयोगा(त्) इत्यभिज्ञ एव पृच्छति, कात्र स्मृतिरिति । अथवा स्मृतिज्ञ एव पृच्छति । सा तु[15] स्मृतिः क्वचित् श्रुत्या विरुद्ध्यते । यथा "अष्टाचत्वारिंशद्वर्षाणि वेदे ब्रह्मचर्यं चरितव्यम्[16]" इति । इयं श्रुतिविरोधिनी स्मृतिः । श्रुतौ हि उक्तम्—"कृष्णकेशं [17]जातपुत्रंयाजयेत्" इति । तत्रानुमानपक्षे स्मृतिः नित्यं प्रमाणं भवति । किं चाद्दष्टार्था स्मृतिरप्रमाणं (य)था[18] हंस(:)

---

[1] Ms-यदिका-  [2] Ms-द्यत्वप्याहरिः अरिरिति  [3] Ms-क्त
[4] Ms-दायत-; TS.VII.4.18  [5] Ms-र्तनतोपदेशान्तरे । प्रयुक्त इति । वा कीर्तनं एतेषु
[6] Ms मैत्रावरुणी  [7] Edn.omit this.  [8] Ms एना
[9] Ms मृंतो  [10] Ms-नाषयत  [11] Ms उपरतं
[12] Ms स्तुवते । सुच प्र, See Bhānuji on Amarakośa for derivation
[13] Ms-तीः  [14] Ms-याता  [15] Ms-नु-
[16] cf. MG. I. 2. 6.  [17] Ms-केशः पिता पुत्रं  [18] Ms या-

कैश्चित् भक्त्य इत्य(भ्यु)पगतः[1], कैश्चिन्मातृयोनिसंबन्धानामुद्वाहः। तत्र लौल्याद्रागाद्वेदं प्रवर्तितम्। तत्र पूर्वधर्मं मत्वा शिष्टा [2]आचरन्ति, रयत्वे(?) स्मृतिः "एकः शब्दः सम्यक् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः[3] स्वर्गे लोके कामधुक् भवति" (भा. ६. १. ८४) इति। किंचेदं प्रयुक्ता (?) एवमसौ सम्यक् ज्ञातो भवति यदि सम्यक् प्रयुज्यते। ज्ञानादेव तु धर्मः। अथैवं प्रयुक्तः सम्यक् भवतीति, सम्यक् प्रयोगस्तु सम्यक् ज्ञाने सति भवतीति। तत्र पृच्छामः— [4]का उपपत्तियुक्ता स्मृतिः? कस्याः [5]श्रुतिरनुवादिनीति।

## ज्ञाने धर्म इति [6]चेत्तथाधर्मः ॥वा॥

पृथक् कृत्वेदमुच्यते—यदि शब्दज्ञाने धर्म, एवं सत्यपशब्दज्ञानादधर्मः एतस्मिन्नर्थे एतत्[7] संभवेत् ब्राह्मणवधादधर्मो, जीवनात्तु धर्म इति। न त्वेतच्छक्यते वक्तुं, ब्राह्मणवधादधर्म इति शूद्रवधाद्धर्म[8] इ(ति)। अत्र हीदं युज्येत, शब्दज्ञानाद्यदि धर्मः शब्दस्यैवाज्ञानादधर्मः प्राप्नोतीति। उच्यते—दृष्टार्थया स्मृत्या [9]तुल्यत्वमस्याः स्मृतेराह। दृष्टार्थायां हि स्मृतौ वैद्यके यत् श्लेष्मणः प्रकोपनं तद्विपरीतं [10]रूक्षं वायोः। एवं शब्दज्ञानान्न धर्मो नाप्यधर्मः, अपशब्दज्ञानात्तु अधर्म इति। अन्ये मन्यन्ते—शब्दज्ञानात् धर्मो न त्वपशब्दज्ञानादधर्म इति; यथोत्तरत्र वक्ष्यति "शब्दप्रमाणका [11]वयम्" इति। केचिन्मन्यन्ते—शब्दापशब्दज्ञानाभ्यां धर्माधर्मौ प्रवर्तेते। तस्य तु धर्मेणाभिभवः, यथा कूपखानकमुपादास्यते। तत्रापशब्दज्ञानादधर्म इत्येतत्प्रदर्शयति—व्याकरणाध्ययनादनर्थं आगतः तस्मान्न किंचिदेतत्—"न [12]चान्तरेण व्याकरणं[13] शब्दाः शक्या ज्ञातुम्" इति। अथैतत्स्यात्, [14]भूयान् धर्मोऽल्पीयानधर्म इति, एतच्चासत्; भूयस्त्वादपशब्दानां[15] फलेनापि भूयसा भवितव्यमित्यधर्म एव भूयान् प्राप्नोति।

## आचारे नियमः ॥वा॥

एवं तावत्, उक्तविरुद्धेयं[16] स्मृतिः, श्रुतिश्चैनां नानुवदति। अतोऽप्रमाणम्।

### आचारे

प्रयोगे।

### ऋषिः

मन्त्र (ः)।

### तेऽसुरा इति

---

[1] इत्युपगतं कैश्चिद्भक्षमाणं [2] Ms आचारं- [3] Ms शास्त्राद्विदुषा प्रयुक्तः
[4] Ms कां उपयान्ति [5] Ms श्रुतिः नत्वनादिनीति [6] Ms वेत्तद्वदधर्मः
[7] Ms-र्थेएतस्मिन्सं भ. [8] Ms धादार्य [9] Ms तुल्यतुल्य-
[10] Ms रूक्ष- [11] Ms-वयवमिति [12] Ms वा-
[13] Ms-रणस्य. [14] Ms भूयां. [15] Ms-दयशब्दानां [16] Ms-द्धयं

प्रदर्शयत्येत(त्)[1]—अयन्त्वाचारः। "तस्मान्न [2]म्लेच्छितवै नाप-[3]भाषितवै" इति च। इयं स्मृतिरेवमाह—[4]म्लेच्छनमप(भाष)णं न कर्तव्य-मिति। न पुनरेवमाह—म्लेच्छनमपभाषणं वा न ज्ञातव्यमिति। ननु चात्रैता-वदुच्यते—अयमपशब्दो न प्रयोक्तव्य—इति। (ए)वं च[5] नैवास्ति शब्दस्य ५ प्रयोगात् धर्म इति। नैष दोषः। अपभाषणे प्रतिषिद्धे[6] किं तूष्णींभूतेना-सितव्यम्? तत्रानुगृहीतोऽपि व्याहारः ससाधुत्त्वः[6a] कर्तव्य इत्येतत् विज्ञायते। स न ज्ञाने[6b]।

## [7]प्रयोगे सर्वलोकस्य ॥वा॥

शास्त्रस्योपादानमनर्थकमित्यभिप्रायः। अन्तरेणापि व्याकरणं प्रयोग-१० दर्शनात्। अत्र चोद्यते—यद्यपि अन्तरेण शास्त्रमपि प्रयोगः तथापि न [8]यत्ना नर्थक्यम्। यथा सत्यपि स्वाभावारोगत्वे केषांचित्, [9]वैद्योपदेशं प्रत्याख्याय[10] प्रवृत्ता इति विना वैद्यकं प्रणीयते (?) केचित् [11]व्याधितास्तेन चिकित्स्यन्त[12] एव तथा व्याकरणमपि प्रवर्तयितव्यमध्येतव्यं च यस्मात् शब्दान् प्रयोक्तु-मिच्छति अध्याप्यते तदर्थं च [13]प्रणेतव्यमिति। उच्यते—सत्यमेव। तेषां १५ तु तत्रैवोक्तं—"दीप्ताग्नयः[14] खराहाराः कर्मनित्या[15] महोदराः। ये नराः[16] प्रति [17]तांश्चिन्त्यं नावश्यं गुरुलाघवम्[18]" इति। इह तु न किंचिदेवं[19]भूत-मस्ति। एतावदुच्यते, "न चान्तरेण व्याकरणं शब्दाः शक्याः ज्ञातु(म्)"इति।

## शास्त्रपूर्व(के)[20] प्रयोगेऽभ्युदयः ॥वा॥

शास्त्रहेतुके ज्ञाने सति यः प्रयोगः तस्मादभ्युदयः।

२० **यः शास्त्रपूर्वकं ज्ञात्वा[21] शब्दान् प्रयुंक्ते सोऽभ्युदयेन युज्यते।**

तस्मादसौ[21a] स्मृतिः, "एकः शब्दः सम्यक् ज्ञात[22]" (भा. ६. १. ८४) इति।

## [23]तत्तुल्यं वेदशब्देन ॥वा॥

वेदशब्दितो योऽर्थस्तेन तुल्यम्[24]।

२५ **योऽग्निष्टोमेन [25]यजते य उ चैनमेवं वेद।**

---

[1] Ms-त्येतं. [2] Ms म्लेछ- [3] Ms-भाषतवै. [4] Ms श्लेदनमपाणं [5] Ms तु. [6] Ms-द्ध. [6a] Ms धकः [6b] Ms सामज्ञान- [7] Ms प्रयोगेस्य. [8] Ms यत्रान. [9] Ms वेद्यो- [10] Ms-रव्योय [11] Ms व्यापिता. [12] Ms-त्स्यत [13] Ms प्रणेत- [14] MS.-प्रयः [15] Ms.-हारः। कर्मतिष्य- [16] Ms येन्याः [17] Ms. तां चित्य- [18] Caraka Samhitā, Sūtrasthāna, 27.343 [19] Ms.-देव- [20] Ms-पूर्वे [21] Edn. Omit ज्ञात्वा; Edn. शास्त्रपूर्वकं यः [21a] Ms तस्मादेकः शब्दोसौ [22] Ms ज्ञापन [23] Ms तेत्तु- [24] Ms तुल्यं वेदशब्देनयो- [25] Ms यजति यत्रा चेनमैवं स वेद

(वेद)शब्द ए(त)दर्थमभिदधाति[1], योऽग्निष्टोमं ज्ञा(त्वा)[2] प्रयुंक्ते सोऽभ्युदयेन युज्यते विदुषः कर्मण्यधिकारात्।

## अपर आह।

संप्रति [3]वेदवाक्यान्येवोदाहरणानि। यथा तानि ब्रह्मचर्यादिभि-
५ र्नियमैरधीतानि धर्मसाधनं, एवं प्रयोगस्य धर्मसाधनत्वे शास्त्रपूर्वकं[4] ज्ञानमिति, विशिष्टात्प्रयोगादभ्युदय इति व्यवस्थितम्।

## अथवा पु(न)रस्तु ज्ञान एव।

नेयं स्मृतिर्दृष्टार्थया तुल्या, तत्र [5]पारंपर्येणाविच्छिन्नमिदं स्मर्यते[6], ज्ञानात् धर्म इति। तत्रागमप्रामाण्यात् यद्विहितं प्रतिषिद्धं वा तदेव
१० क्रियते वर्ज्यते वा। नन्विदं वचनं, अपशब्दज्ञानादधर्म इति वा, धर्मो वा न भवत्यपशब्दज्ञानादिति? यच्च न विहितं न च प्रतिषिद्धं न तत्र करणे वर्जने वा गुणदोषाविति।

## आथवाभ्युपाय एवापशब्दज्ञानं शब्दज्ञानस्य[7]।

यश्च यस्याभ्युपायः तमन्तरेण तस्याप्रवृत्तिरेव इति[8] तदपि तस्यां-
१५ गमेव भवति। यथा कश्चित् रम्येताक्षितिगतंशौक्ल्यं तस्य दर्शनात् धर्म इत्यसौ कृष्णा स पश्यन् (?) न तत्र शक्नोति शुक्लं द्रष्टुं। अत उपाय एवासौ शुक्लदर्शनस्य। यथाश्वमेधादिष्वभ्युपाय एव हिंसा[9] धर्मस्यैव मिदमपशब्दज्ञानानुषक्तमेवशब्दज्ञानमिति,[10] नास्य अधर्मेण सम्बन्धः। एवं स्मृतिः समर्थिता भवति। एवमानर्थक्यं न भवति स्मृतेः।

२० **अथवा कूपखानकवदिति।**

इयमुपपत्तिः, यद्यप्यपशब्दज्ञानादधर्मः स्यात्तथाप्यल्पीयान्। शब्द-ज्ञानादेव तूत्कृष्टो धर्मो भूयांश्चेति प्रवर्तत एवाध्ययने विद्यमानेऽपि दोषे। तत्तु स्मृतिप्रणयनसामर्थ्यादेवावगम्यते[11]—शब्दज्ञानात्प्रकृष्टो धर्म इति। तस्योदा-हरणं कूपखानकः[12]। यथासौ[13] भूयसाभ्युदयेन योगं मन्यमानो दोष वत्यपि
२५ कर्मणि कूपखनने प्रवर्तते, शक्त्याम्येनमपि[14] दोषमपनेतुमिति। अनेन च शब्द-ज्ञानस्योपस्तुतिः क्रियते। यथोक्तं, "नावाकिशराः[15] स श्येन(चितं)पचि-(णं)[16] चिन्वीत प्रमायुकोऽस्य यजमानो भवति" इति। नेयमवाकिशरसो

---

[1] Ms-मक्षिदधति [2] Ms मस्तु [3] Ms वेदवाक्यादन्ये [4] पूर्वक–
[5] परंपर्येणावच्छिन्न- [6] Ms स्मर्यत [7] Edn.-ज्ञाने [8] रति
[9] Ms भ्युदय एव हिसा [10] Ms.-षक्तमप [11] Ms-देवबा गम्यते स्मृतिघणवनसामर्थ्या
[12] Ms-खनका: [13] Ms यथासो [14] Ms-म्येनंमंप
[15] Ms नार्वाकशिर: [16] Ms श्येनपक्षं; cf. K.SXXI. 4

निन्दा। किं तर्हि ? [1]अनेन द्वारेणोच्चशिरसः स्तुतिः क्रियते। विद्धि कोरता स्त्रिय इति(?) एवं च कृत्वेदं वचनं[2] याज्ञवल्क्यस्य[3] एवं वक्ष्यते "इमौ[4] स्वित् पलितौ बाहू कस्वित् ब्राह्मणस्य वचो बभूविति(?) यदि हि अवाक्शिरा[5] यजमानं घातयेदहमेव ज्ञात्वा नाभविष्यामिति(?) तस्मादिदमपि कर्म दृष्ट्" इति। अन्येषां दर्शनं—[6]निन्दैवैषावाक्शिरस इति।

## याज्ञे कर्मणि (स) नियमः।

एतदुक्तं भवति—न सामान्यानुवादिनी सा श्रुतिः[7]। किं तर्हि ? प्रकरणानुवादिनी। प्रकरणार्थश्चान्येषां(एवं) भूतोऽपि भवति। अगम्यागमनं गोसवे[8]। सुरापानं सौत्रामण्याम्। सर्वमेधे ब्राह्मणवधः। यथा च कूर्माभावे प्रतिनिधिर्नियत विषय एव[9]। "यदि[10] कूर्मं न विन्देत पिंगलस्य खलतेर्विल्क्रिधस्यात्रेयस्य उदके मग्नस्य जुंबकाय[11] स्वाहेति मूर्धन्याहुतिं जुहोति" पादिति(?) [12]तस्मात्।

## याज्ञे कर्मणि स नियमो नान्यत्रेति

एवमर्थं प्रतिपादयति—

## एवं हि श्रूयत इति।

पुराकल्पे यो(गज)प्रत्यक्षधर्माणः श्लोकधर्मा(?) ये परोक्षा लोकस्य ते प्रत्यक्षास्तेषाम्।

## परापरज्ञा

युक्तायुक्तज्ञाः स्युश्च तावदागमात् प्रत्यक्षधर्माणो न तु युक्तायुक्तज्ञाः।

## विदितवेदितव्याः

यज्ञार्हाः। [13]यज्ञकर्मणोऽन्यत्रापभाषमाणा अपि न पराभूता इति।

## अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थ इति।

किमनेन अभिधीयते ? क्वार्थरूढ इति। [14]पदार्थग्रहणेनैतत्पृच्छति। शब्दो हि कश्चित्तुल्यरूप(:) प्रवर्तमानो भिन्नार्थो भिन्ननिमित्तः परस्परमपेक्ष-

---

[1] Ms-द्वारेणाच्च  [2] Ms पचनं  [3] Ms-क्यस्य
[4] Ms स्वित बलितौ बहुकृत्वः स्वित। See Bhartriharis Vṛtti on Vāk. II Kāṇda; Madras govt. Oriental Mss Library R. No. 5543; P. 182  [5] Ms अवाकशिश  [6] Ms निंदिवै–
[7] Ms स्तुतिः  [8] Ms गोसवो  [9] Ms विष एव
[10] cf. Ms's III. 6 16.  [11] Ms जुच्चुकाय; cf. T Br. III. 9. 15  [12] Ms तास्माद्याज्ञ–  [13] Ms-यज्ञकर्मणो नान्य–
[14] Ms यदार्थग्रहणेनेत–

माणः प्रवर्तते। यथा अश्वशब्दः[1] सुबन्तस्तिङन्तश्च। कश्चित्तु निमित्तस्य तुल्यत्वात्प्रवर्तते। यथा अप्शब्दः समुद्रे बिन्दौ च जातिनिमित्तः। कश्चित् जातिभेदेऽपि रूढिविषया क्रिया तुल्येति वर्तते, यथा "सर्वत्र अश्नोतेरक्षः, पद्यते(ः)[2] पादः, मिमीतेर्मासः[3] इति[4] तत्र क्रियासामान्यात् सिद्धम्" (भा. १. २. ६४ इति
५ कश्चित् तद्भावापादने(न) वाध्यारोपेण वा; यथा वाहीके गोशब्दः रज्जुद्रव्ये च सर्पशब्दः। तत्रायं व्याकरणशब्दः किंभूत[5] आश्रीयत इत्यनेन द्वारेण शब्दप्रवृत्तिनिमित्तमाचिख्यासन्नुपन्यासं करोति। इदं पुनः पुनरुक्तं, "न च अन्तरेण व्याकरणम्",[6] "[7]तां नावैयाकरण" इति; तत्रास्य पदार्थमाचष्टां भवानिति।

## सूत्रम्

१० **सूत्रं समुदायोऽष्टाध्याय्यः,[8] अस्यार्थ इति।**

**षष्ठ्यर्थोऽनुपपन्नः ॥ वा ॥**

ननु च सूत्रे शब्दप्रयोगोऽप्युपपन्नः? उच्यते—सामान्योपक्रमेऽभिधाने सूत्रम्, किं सूत्रमिति। व्याकरणमिति विशेषो युक्तः, "वृक्षः शिंशपेति"[9] यथा। शब्दार्थस्तु भेदाभावादप्रयुक्तः। यदा तु व्याकरणशब्द(ः) समुदायवृत्ति(ः)
१५ सूत्रशब्दः कस्मिंचिदवयवे वृत्त उपादीयते"वृद्धिरादैच्" (सू. १.१.१)"इत्येवमादौ, तदा षष्ठ्यर्थोऽप्युपपन्नः। यदा तु द्वावपि समुदायशब्दौ तदा षष्ठ्यर्थाभाव इति चोद्यते।

**शब्दाप्रतिपत्ति(ः) ॥ वा ॥**

नहि "वृद्धिरादैच्" इत्येतस्माच्छब्दान् प्रतिपद्यामहे।

२० **किं तर्हि? व्याख्यानतः (च)।**

उदाहरणाद्वयं समानजातीयान् शब्दान् प्रतिपद्यामहे।

**ननु च तदेव सूत्रं विगृहीतं व्याख्या(नं) भवति।**

सूत्रार्थस्याभिव्यक्त्युपायो व्याख्या। यथा "वटवृक्षस्थितो दंष्ट्री" इत्यस्यार्थस्याभिव्यक्तिः क्रियते, वटे वृक्षे[10] स्थितो दंष्ट्री।

२५ **न केवलानि चर्चापदानि।**

यथा वटोवृक्ष[11] इति चर्चापदेभ्यः प्रतिपाद्यतेऽर्थो नैवं सूत्रात् विगृहीतात्।

**शब्दे ल्युडर्थः ॥ वा ॥**

भेदे सति षष्ठ्यर्थप्रतिपत्तिरस्ति, शब्दस्य हि [12]अन्वाख्या(प)कत्वेन
३० सूत्रं संबन्धि भवति।

---

[1] Ms खशब्दः [2] Ms पपद्यते: [3] Ms-ते मषिः [4] Edn. Omit इति
[5] Ms किं ब्रूत [6] Ms--कारणं [7] Ms तन्ना [8] Ms-ध्याय्यां।
[9] cf. MB II. 1.57. [10] Ms वृक्ष [11] Ms वदो क्ष क्ष [12] Ms-अन्वाख्य

**ल्युडर्थस्तु[1] नोपपद्यते ।**

संस्क्रियमाणो हि शब्दः परार्थत्वात्प्रधानम्, न च प्रधानस्य करणभावो युक्तः । यथा पुरोडाशस्य उत्पत्तिसंस्कारप्रतिपत्तिषु उत्पाद्यत्वात् संस्कार्यत्वात् प्रतिपाद्यत्वात् प्राधान्यमेव (न) गुणभावः । शब्दप्रतिपत्ति(?) ।

**भवे च[2] ॥वा॥**

ननु चान्वाख्यापकत्वात् तस्मिन् भवाः स्युः । एवं च सति यावान् योगः [3]सर्वो वैयाकरण(त्वं) प्राप्नोति, तस्मादे(वा)वयवादयविभावोऽत्राभिप्रेतः ।

**[4]प्रोक्तादयोऽपि (तद्धिता) नोपपद्यन्ते[5] । नहि (पाणिनिना) शब्दाः प्रोक्ताः । [6]पुरस्तादिदमिति ।**

भाष्यसूत्रेषु [7]गुरुलाघवस्थानाश्रितत्वात् लक्षणप्रपंचयोस्तु[8] मूलसूत्रे-[9]ष्वाश्रयणादिहापि लक्षणप्रपंचाभ्यां प्रवृत्तिः ।

**तद्यथा प्रस्कन्दनं प्रपतनमिति ।**

[10]ननु च "भीमादिषु" (सू. ३. ४.७४) एते पठ्यन्ते । उच्यते—एतदेवाह "कृत्यल्युटो बहुलम्" (सू. ३. ३. ११३)इति तस्य [11]भीमादि प्रपंच इति ।

**अथवा शब्दैरपि[12] शब्दा व्याक्रियन्ते ।**

शब्दो हि [13]उच्चारि(तः)स्वस्वरूपं प्रतिपादयति[14]। विपरीतव्यावृत्तत्वम भिव्यनक्ति । समानजातीयानां शब्दान्तराणां प्रतिपादको भवति, भिन्नजा(ती)-यस्य साधोरपि निवृत्ति(ः)सर्वथा भवति । तत्रैकदेशे भाष्ये कथ्यते—

**नाश्वो न गर्दभ इति ।**

**एवं तर्हि—लक्ष्यलक्षणे व्याकरणम्[15] ॥वा॥**

नैतत्पतिपत्तव्यं, यथान्यो [16]बिल्वशब्दो वनस्पतिमाहान्य एव फलमिति। नाप्यप्शब्दवत् एकशब्दनिमित्तत्वात् नाप्यक्षवत् क्रियासामान्यात् नाप्येक-शेषाश्रयणम् । एवं हि [17]कल्प्यमाने सर्वशब्दो मेव भाष्यमनुघटते यद्व-क्ष्यमाणमन्यश्चेल्लक्ष्यमाहान्यो लक्षणमन्यः समुदायं[18] किमुच्यते (?)

---

[1] Edn. omits तु
[2] Ms भवनं
[3] Ms-सर्व वैयाकरण:
[4] Ms प्रयोक्ता
[5] Ms-पद्यते
[6] Ms पर-
[7] Ms-गुरुलाघवस्वाना–
[8] Ms-पंचेयोस्व–
[9] Ms-ष्वायाश्रय
[10] ननुं व सीमा-;
[11] Ms भाष्यादि-
[12] Ms शब्देरपि
[13] Ms उच्चार–
[14] Ms-प्रति चोदंयति
[15] Ms-णे
[16] Ms विल्व
[17] Ms-कल्प-
[18] Ms-यां

**समुदायेषु च[1] शब्दाः प्रवृत्ता[2] इति ।**

तस्माद्यथैव संच.....फल(?)सेना[3]वनमित्येते शब्दाः समुदायाभिधायिनो नावयवाभिधायिन एवं व्याकरणशब्दो पि समुदायाभिधायी नावयवाभिधायीति । एवमप्ययं दोषः—यथैवेते वनादयो[4] नावयवे वर्तन्ते एवमय-
५ मप्यवयवे न वर्तते ।

**[5]पूर्वे पंचाला इति ।**

समुदायत्वमापादितः समुदायशब्देनापदिश्यते, यथा गोत्वमापादितो वाहीको गोशब्देनेति । नहि शब्दस्येदं सं(भ)वति, समुदायं त्यक्त्वा अवयवमुपसंक्रान्तुमिति । अतः समुदायो यदावयवे कृत्स्नमात्मानं सन्निवेशयति[6]
१० तदा प्रवर्तते समुदाय शब्द एवं व्याकरणशब्दोऽपि समुदायवृत्तिः यदैकदेशे सूत्रे आत्मानं सन्निवेशयति तदा तच्छब्दप्रवृत्तिः केन कर्त्तव्या ।

**तैलं भुक्तं घृतं भुक्तमिति ।**

(यथै)कस्मिन्नुपघातकेऽनुग्राहके वा[7] घृते तैले शब्दः परिकल्प्य(ते) समुदायावयववृत्तिः एवं शुक्लादिष्ववयवस्यैव[8] कस्यचित् शुक्लीकरणा-
१५ (त्) समुदाय एवायं पटाख्योऽन्यरूपः[9] कृत इत्येकदेशे समुदायशब्दो वर्तते । यथा, न च तावत् कात्स्न्र्येन [10]घटमुलभते, भवति चास्य [11]केषुचिदेवावयवेषु घटबुद्धिः, एवमेव [12]सूत्रमात्रात्समुदायं प्रतिपद्यमान एव व्याकरणमिति तावत्येव शब्दं प्रयुंक्ते[13] । यथा तादर्थ्यादधिश्रयण[14]मात्रं दृष्ट्वा पचत्यय-
मिति प्रयुंजानः प्रतिवचनमुच्यते, नायं पचत्यधिश्रयति, किंतूदकं संपादयतीति ।

२० **व्यपदेशिवद्भावेन भविष्यति ।**

[15]व्यपदेशिवद्भावश्च कचित् कथंचित्, इह "एकाचो[16] द्वे प्रथमस्य" (सू. ६. १. १) इत्यस्येवान्वयव्यतिरेकं समधिगम्यमानार्थवत्तया धातुरूपतास्ति वर्णरूपता(च) । तत्रैकेन रूपेणाश्रितस्य रूपान्तरेण युक्तो व्यपदेशः । अथवा समुदायावयवकल्पनायां योऽसौ समुदायः प्रयोगसमवायी स शब्दभेदाय एति
२५ [17]इतः [18]अयनमिति तस्यामेकदेश एतिरिति । यथा शिलापुत्रकोऽयमनेकक्रिया विषयो दृष्टस्तस्येदं शरीरमिति । इह तु स्थूलशिरा राहुरित्यसत्यपि समुदायावयवभावे शब्दव्यापारमात्रादेवास्ति[19] भेदव्यपदेशः । शब्दो हि वस्तुज्ञानः सद्भा-

---

[1] Edn. हि
[2] Ms शब्दः प्रेवृत्त
[3] Ms-यन-
[4] Ms वनावयवो
[5] Ms पूर्वपक्षोक्ता
[6] Ms सन्निरोपयति
[7] Ms या
[8] Ms स्येव
[9] Ms रूपं
[10] Ms घटनुपबोलभते
[11] Ms केषु चित् देवा-
[12] Ms शुभ्रमात्रा-
[13] Ms प्रयुंजत
[14] Ms-श्रवण
[15] Ms अपादशिव-
[16] Ms-एकायोचो-
[17] Ms ततः
[18] Ms अशब्दमिति.
[19] Ms-वासति.

वासद्भवानपेक्षः[1] कंचिदेवार्थभागं निश्चित्य प्रवर्तते। तद्यथाविद्यमानामपि पर्यन्तामंगुलेरंगुलिशब्देन (?) ब्रवीत्येवं विद्यमानामपि शिरोमात्रतां राहो[2] राहुशब्दो न ब्रवीति। यावानेव हि राहुशब्दवाच्योऽर्थ[3]स्तावानेवोच्यते। तस्य शिरसा युक्तो व्यपदेशः। यथा सत्यप्येकत्वे वस्तुनोऽवस्थाया अभिधानात् भवति प्रकर्षप्रत्ययः "परुद्भवान्पटुरासीत्पटुनरश्चैषम[3a] इति "(भा. ५. ३. ५७) एवमिहाप्यस्त्येव[4] व्याकरणस्य ग्रन्थसन्दर्भरूपतास्त्येवावयवरूपता, तत्रावस्थाभेदादुपपन्नो[5] व्यपदेशः। सामान्यविशेषभावाद्वा, इह सूत्रमिति सामान्याभिधा(ना)न्न ज्ञायते कस्येति। विशेषभावे [6]चानन्यत्ववादिनोऽप्युपादीयते व्याकरणमिति। यदा समुदायवृत्तौ व्याकरणशब्द(:) क्वचिदेव च सूत्रे सूत्रशब्दः, तदा मुख्यवदभेदः। तत्र विशेष एव सामान्यमेव वा, तत् नास्ति व्यपदेशिवद्भाव(:) चन्दनस्य चन्दनं रूपादयो रूपादीनामिति। सामान्यविशेषभावे त्वनन्यत्ववादिनोऽपि भवति व्यपदेश(:) चन्दनस्य गन्ध इति।

**अविजानत एतदेवं[7] भवति।**

एतदुक्तं भवति—कश्चित् व्याख्यानतोऽपि न प्रतिपद्यते। किं तर्हि ? अक्षिनिकोचादिभिः। तत्र किं शक्यते वक्तुं, अभिनयात् शब्दप्रतिपत्तिरिति ? तत्रैवं प्रतिपत्तव्यं, प्रतिपाद नोपाया एते, सूत्रात्त्वभिव्यक्तिः; सूत्रादेव त्वभिव्यक्तार्थाच्छब्दप्रवृत्तिरिति[8]। यदेतदुदाहरणादीनामुपादानं एतन्नार्थतन्त्राणां भाष्यस्या ब्रूयात्, शब्दान्तरं प्रतिपद्यतेति (?) किं तर्हि ? अनभिव्यक्तं सूत्रमभिव्यंजयेदिति। एतमेव चार्थम् समर्थयते—

**यो हि उत्सूत्रं कथयेन्नादो[9] गृह्येत[10]।**

न तत् गृह्यते। किमर्थं पुनरुत्सूत्रं न गृह्यते ? उच्यते—स्मृतिशास्त्रमिदं, तत्र यदा कश्चिदेवमेव ब्रूयात्, अयं शब्द इति; सोऽवश्यं पृच्छ्येत[11] कथमस्माभिः प्रत्येतव्यमिति। यदि स्मृतिसूत्रमाह सन्धीयतेथाप्रलापस्तस्य गृह्यते (?) यथा पाणिनीयसूत्र इदं नास्ति "न्यंको प्रतिषेध" इति। तत्रैवं विप्रतिपत्तिः, नैयंक[12] (व)मिति भवितव्यमिति अस्त्वेवं प्रयुंजीत[13] न्यांकवमिति न[14] वयमपशब्द इति प्रतिपन्नाः[15]। यदि त्वसौ स्मृत्यन्तरं प्रदर्शयति तस्य हि प्रतिषेधः स्मृत्यन्तरे। यथेह "न्यग्रोधस्य च केवलस्य" ( सू. ७. ३. ५ ) इति मुक्तसंशयं[16] प्रतिपद्यामहे शब्दोऽयमिति। तस्मादिदमेव प्रतिपत्तव्यम्, सूत्रादेवोदाहरणादीनि ज्ञातार्थात् शब्दप्रवृत्तिरिति(?)।

---

[1] Ms-पेक्षा. [2] Ms रोहो. [3] Ms-र्ष- [3a] Ms. एकवद्भावात्यपुरासीत्यदुतर उद्वेषण
[4] Ms-प्यस्त्येव. [5] Ms-दानुपपन्नो [6] Ms त्वान- [7] Ms-देव.
[8] Ms-प्रावृत्तिरिति [9] Ms कथयत्यदो. [10] Ms गृह्यते [11] Ms-च्छेत
[12] Ms नैय्यायक. [13] Ms-त्. [14] Ms-र्तं- [15] Ms-न्नः [16] P. य

## किमर्थो वर्णानामुपदेशः ?

"अर्थप्रयुक्ते शब्दप्रयोगे (शास्त्रेण) धर्मनियमः", (न) तत्रैतेऽर्थवन्तः तत्रैषामुपदेशोऽनर्थकः। समुदायार्थोऽप्युपदेशो[1] न संभवति; धातुप्रातिपदिकप्रत्ययानामुपदेशे तत्स्थानां[2] वर्णानामप्युपदेश इति।

## वृत्तिसमवायार्थ उपदेशः ॥ वा ॥

नहि एषां[3] स्वरूपावधारणार्थ उपदेशः। किं [4]तर्हि ? आनुपूर्व्यर्थः[5]। अनेनानुपूर्व्येण शास्त्रे किंचित्कार्यं कुर्युरिति, यद्वा शास्त्रांगोपसंहारार्थमेतदित्येवमर्थमाचष्टे—

## वृत्तये[6] समवायो वृत्तिसमवाय इति।

षष्ठीसमासोऽयम्। भेदस्तादर्थ्येन प्रदर्श्यते अश्वघासवत्।

## वृत्त्यर्थो वा समवाय इति।

वृत्त्यर्थ[7]समवायस्य वृत्तिं प्रति निमित्तभाव आख्यायते। यथासंख्यं हि सन्निवेशमात्रादेव प्रवर्तते। [8]वृत्ति(निमित्त)श्चासौ समवायश्चेति [9]वृत्तिसमवाय इति, यथा शाकपार्थिव इति।

## वृत्तिप्रयोजनो वेति।

पारंपर्येण निमित्तभावो निर्दिश्यते। पारंपर्येण शास्त्रप्रवृत्तिः समवायस्य प्रयोजिका। [10]यैषानुबन्धोपलक्षिता शास्त्रप्रवृत्तिः "अकःसवर्णे" (सू.६.१.१०१) इति अस्याः पारंपर्येण[11] समवायो निमित्तमिति। एतच्च भाष्येऽपि [12]वक्ष्यत एव।

## का पुनर्वृत्तिः[13] ? शास्त्रप्रवृत्तिः।

कुत एवं वृत्तिरिति ? [14]क्रिया च साधनाकांक्षिणी[15]। तत्र प्राकरणिकं शब्दानुशासनशास्त्रं [16]साधनत्वे(न) प्रतीयते। शास्त्रप्रवृत्तौ यः समवायः तदर्थो वर्णानामुपदेशः। किंतु (उप)दिश्यतेऽने[17]नेत्युपदेशः। नह्येतैः[18] किंचिदुपदिश्यते। इतरो भावसाधनत्वमाचष्टे—

## उच्चारणम्। कुत एतत् ? दिशिरुच्चारणक्रियः। उच्चार्य हि[19] वर्णानाह, उपदिष्टा मया[20] वर्णा इति।

---

[1] Ms-र्थाप्युपदेशो [2] Ms-शो दुस्थानां [3] Ms एषा. [4] Ms तुहि.
[5] Ms-पूर्व्यार्थो– [6] Ms वृत्तेये. [7] Ms-से– [8] Ms प्रवृत्ति–
[9] Ms प्रवृत्ति– [10] Ms येषा– [11] Ms परपक्षेण. [12] Ms द्रक्ष्यत.
[13] Ms-त्तः [14] Ms क्रिया क्रिया [15] Ms-कांक्ष्णी [16] Ms साधनत्वं.
[17] Ms-तेरे [18] Ms नह्येतिः. [19] Ms उच्चार्यते. [20] Edn. इमे

इह यस्मिन् व्यापारे निवृत्तेऽनन्तरो यः शब्दः प्रयुज्यते तस्य तादर्थ्यं विज्ञायते। यथा भुक्तवत्सु प्रविष्टेषु ब्राह्मणेषु भुक्तं ब्राह्मणैः प्रविष्टा ब्राह्मणा इति; गम्यते एतन्नूनं, अयं भुजे(:) प्रविशेश्चार्थ इति, एवमिहापि[1] वर्णेषूच्चारितेषु अनन्तरं पृच्छति—"किमर्थो (वर्णानां)उपदेश" इति। ते(न) प्रतिपद्यामहे[2] दिशिरुच्चारणक्रिय इति।

## अनुबन्धकरणार्थश्च ॥ वा ॥

अनुबन्धकरणं शास्त्रस्य प्रवृत्त्यंगम्[3], अवश्यं कर्तव्यम्। [4]तच्चोपदेशमन्तरेण न भवति। तत्रानुबन्धा हल एव, अयं त्वेकः अजनुबन्धः लण्[5] इति लकारे अकारः "उरण् [6]रपर" (सू. १.१.५१) इत्यत्रच ऋकारलृकारयोः रलपरत्वार्थः।

## प्रत्याहारार्थम्।

प्रत्याहारो नाम विस्तीर्णस्य यः संक्षेपः। तत्र "आदिरन्त्येन सह" (सू.१.१.७१) इत्ययं प्रत्याहारो न[7] सन्निवेशमनुबंधांश्चान्तरेणास्तीति इदमुच्यते—

**(वृत्ति)समवायश्चानुबन्धकरणं च प्रत्याहारार्थम्, प्रत्याहारो वृत्त्यर्थः।**

"अकः सवर्णे दीर्घः", (सू.६.१.१०१) "एचोऽयवायावः" (सू.६.१.७८) इति।

## इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः।

उपदेशे हि सति यथाभूता उच्चारितास्तथाभूताः साधवो विपरीतास्त्वसाधव इति साधुत्वप्रतिपत्त्यर्थमपि कर्तव्य उपदेश इति।

## उदात्तादीनामप्युपदेशः कर्तव्यः।

एते हि वर्णा एकश्रुत्या पठिता, मात्रिको अच्मात्रिकाः (?) तदत्रोदात्तादिभिन्नानां भिन्नकालानां च साधुत्वं प्राप्नमतः सर्व उपदेष्टव्याः। ननु च सर्व [8]एवैते शास्त्रेणान्वाख्याता[9] उदात्तादयः ? [10]उच्यते—अनुपदिश्यमानानां किंभूता उदात्तादयः प्रतिपत्तव्या इति स्वरूपेणानुपदेशात् अशक्या तेषु प्रतिपत्तिरिति।

## आकृत्युपदेशात्सिद्धम् ॥ वा ॥

आकृत्युपदेशे[11] नान्तरीयको (व्यक्ति)विशेषः। स त्वनाश्रितः

---

[1] Ms वर्णमुच्चा-  [2] Ms-महि.  [3] Ms-त्यंडुः.
[4] Ms त्वच्चो-  [5] Ms र इण्  [6] Ms त्रवत् सकार-
[7] Ms ना-  [8] Ms एवेते.  [9] Ms-ण त्वारव्याता
[10] Ms उच्यन्ते  [11] Ms-शा

तस्मिन्काल इति कालगुणभिन्नेषु आकृतिरस्ती(ति) प्रतिपत्स्यन्ते। अयमे-[1]वासौवर्णोयोऽक्षरसमाम्नाय[2] उपदिष्टः। यथा [3]एकाकृत्युपदेशे भिन्नेष्वपि च य आकृतिषु (?) स एवायमि(ति) प्रतिपद्यते। तत्र यो यथैवाकृतिसद्भावात्कालगुणभिन्नानां [4]साधुत्वमेवं गुणस्वरभिन्नानामप्याकृतिसद्भावा(त्) प्रसक्तं [5]साधुत्वं, अतस्तन्निवृत्त्यर्थं [6]यत्नः कर्तव्य इत्याह—

## संवृतादीनां प्रतिषेधो वक्तव्यः।

संवृतो नाम यो बाह्यः प्रयत्नः। आभ्यन्तरो हि प्रयत्नोऽकारस्य निष्पादकः।

नैवं कलः।

## ध्मातो

य(ः) श्वासभूयिष्ठः।

## (ए)णीकृतो[7]।

अव्यक्तः।

## एताः स्वरदोषभावनाः।

एतानि स्वरदोषगोत्राणि। [8]अवगतो हि [9]वक्तॄणां प्रमादा[10]-शक्तिजः स्वरदोष इति।

## गर्गादिबिदादिपाठात्संवृतादीनां [11]निवृत्तिर्भविष्यति।

एवं मन्यते—नैव क्वचिद्वर्णा उच्चार्यन्ते। किं (तर्हि)? शब्द(स)-मुदाय एव [12]पठ्यते, वर्णात्मकश्च समुदायः। समुदायश्च निवृत्तकलादिकः पठ्यते। अत्र[13] सिद्धा संवृतादीनां निवृत्तिरिति।

## अस्त्यन्यत् गर्गादिबिदादिपाठे प्रयोजनम्।

एतदुक्तं भवति—एवमर्थो गर्गादिबिदादिपाठः। कथमनेन सन्निवेशेन साधुत्वं स्यादन्येन मा भूत्, गर्ग इति। किं वा कर्तव्यम्? स्थितानां कलादिनिवृत्तिः कृता स्यात्। [14]ये तु न पठ्यन्ते शब्दरूपा एतेऽप्यनिवृत्त-कलादय[15] इति।

## एवं तर्हि अष्टादशधा भिन्नाम्।

शास्त्रान्ते प्रत्यापत्ति[16](ः) यां[17] निदर्शनप्रकारेण करिष्यामीति। किमर्थं

---

[1] Ms-वासावर्थो [2] Ms-समात्राये [3] Ms रावा [4] Ms साधकत्व-
[5] Ms यत्नः [6] Ms-तौ- [7] Ms अपगतो
[8] Ms वक्त्रणा- [9] Ms-क्तिजत [10] Ms स्वरनिवृत्ति-
[11] Ms पठ्यंते [12] Ms सिद्धानां [13] Ms यानि तु
[14] Ms एतेथनिवृत्ता क्वलादल [15] Ms प्रतिपत्ति [16] Ms या–

पुनः "निवृत्तकलादिकाम्" इत्युच्यते,[1] न निवृत्तसंवृतादिकामिति ? संवृतत्वाद्-(कारस्य) कार्यार्थं कलादयोऽभ्युपगम्यन्ते । [2]काराङ(दीन्) मा सांक्षीः, कलं ध्मातं [3]चाध्येष्ये, ङकारं ञकारं[4] च नाध्येष्ये, एवं च वक्ष्यामि, कलाध्मातादात्मनेपदं भवति । अत्र त्विदमशक्यं प्रतिपत्तुं, [5] "इकोयणचि" (सू. ६. १. ७७) इत्यनुबन्धेऽसति इत्संज्ञाशास्त्रं च नास्तीदं "आदिरन्त्येन सहेता" (सू.१.१.७१) इति। तत्र यावन्ति प्रत्याहारोपलक्षितानि कार्याणि तेषु सर्वे निर्दष्टव्याः (?)

## एवं तर्हि उभयमनेन क्रियते ।

समुदायश्च[5] साधुत्वेन प्रतिपाद्यते, यथाकारादयस्ते चैवंभूता एव निर्दिष्टाः । [6]कलादिकाः सर्वत्रासाधव[7] इति ।

## कथं पुनरेकेन यत्नेनोभयं लभ्यम् ?

इह सन्ध्यक्षरेषु समुदायपर उपदेश इति नावयवाः स्वयं[8] कार्यं प्रतिपद्यन्ते[9] । तथा वर्णानामुपदेशोऽवयवनिर्ज्ञानार्थ इत्यक्षरसमाम्नायेऽवयवा एवाश्रीयन्ते, न समुदायः । एवं गर्गादिबिदादिपाठे अवयवा एवानिर्जिज्ञासिता स्युः तदनुरोधात्तु समुदायोपादानम् । अथवा समुदाया एव । यदि समुदायास्तत्रावयवानामेवं[10] विषायाणां[11] कलाद्यभावः स्यात् । अन्यत्र निवर्तय एव(?) [12]अथावयवपरं एवं[13] सति समुदायस्य साधुत्वप्रति-[14]पत्तिरशक्या, ततश्च गर्गादयो न निर्वर्तिता वर्व एव(?)

## लभ्यम् इत्याह ।

## कथम् ? द्विगता अपि हेतवो भवन्ति ।

द्वावर्थौ गताः द्विगताः । हेतवः कार्यनिर्वृत्तौ[15] समर्थाः । इह लोके एक एव हेतुर्द्वयोरर्थयोः प्रसाधको दृष्टः[16] । एकमु(द)कं तद्विषया क्रिया त्याग-लक्षणा आम्रमूले कृता, पितृतर्पणे द्रुसेके[17] च सम एको हेतुः[18] । अन्यत्र तदेवोदकं न द्विगतं भवति । यदा देवदत्तयज्ञदत्तौ तर्पयितव्यौ भवतः आम्रा[19] अपि (वि)प्रकृष्टदेशात् सेक्तव्या भवन्ति । तत्र यथैवोदकदानं दृष्टमदृष्टार्थं[20] साधयितुं समर्थमित्येवं बुद्ध्या प्रक्रम्य प्रवर्तमानमुभयं[21] [22]निष्पादयत्येवं

---

[1] Ms-च्येत [2] Ms शीरामासि [3] Msवा- [4] Ms मकारं
[5] Ms समवायश्च [6] Ms काला- [7] Ms सर्वत्रमाधय
[8] Ms-यवो स्वर्ग- [9] Ms प्रति । पद्येते [10] Ms-यवनामेवं
[11] Ms विषमाणां [12] Ms अथायद्यव [13] Ms एयं
[14] Ms साधकत्व [15] Ms-निवृत्तौ [16] Ms-ष्टा
[17] -णं द्रसेके [18] Ms हतु: [19] Ms छाम्रा
[20] Ms-ष्टार्थां [21] Ms-नमभयं [22] Ms निपाद-

गर्गादिबिदादिपाठः समर्थ उभयं कर्तुमवयवान् समुदायं च कार्ये[1] प्रवर्तमान इति। अथवा प्रसंगलक्षणार्थसिद्धिः। यद्यर्थाप्रयोजकोऽन्यद्वारेणार्थम् प्रतिपद्यते स प्रसंग इत्युच्यते। यथा भोजनेनाभीयः प्रयोजको हि श्रपणस्य वा विद्यसासिशिवदप्रयोजकः(?) यो हि निष्टितेऽप्यन्ने पुनः पाचयेत् स एकं भूतः यदा त्वदर्थम् बह्वन्नं प्रसाधितं(?)। (सं)वृतादिषु प्रतिषेधश्चोद्यते। तत्र यद्यवयवाः समुदायोपदेशपरशब्देन[2] स्वरूपं सर्वत्रैव विशिष्टं प्रतिपाद्येरन् को दोषः स्यात्। एवमाम्राः पृथक्सेकस्य प्रयोजकाः पितरोऽप्रयोजकाः तत्र प्रयुक्तमुदकदानं प्रसंगेनानुभवन्तीति।

## तथा द्विष्ठान्यपि[3] वाक्यानि[4] दृश्यन्ते।

एतत्कथयति—न[5] केवलमर्थधर्म एवायम्। किं तर्हि? शब्दधर्मोऽपि। इह कश्चिदेक एव शब्दशक्तिप्रचिता। तस्य(?) केवलं शक्त्यवच्छेदमात्रं क्रियते। यथैक एव पुराशब्द आराच्छ(ब्द)श्च परार्थीसहवचनः (?) [6]सन्निकृष्ट विप्रकृष्टवचनश्चैवं[7] श्वेतशब्दोऽनेकशक्तिप्रचि(तः), तस्य केवलं शक्त्यवच्छेदमात्रं क्रियते, श्वेतो गौरिति। श्वा इत[8] इति प्रयोक्ता प्रयुंक्ते, प्रतिपत्तारः[9] यथा शक्त्यवच्छेदेनार्थं प्रतिपद्यन्ते[10]। अर्थान्तरेण द्वावेतौ[11] शब्दावुच्चारितौ, यथा प्रदीप(:) तन्त्रेण प्रवर्तमानोऽर्थिनां यथाभिप्रेतमर्थं निर्वर्तयति। एकस्येव वा विपादिका दिदृक्षोः (?) च, तन्त्रेण[12] निर्वर्तयत्येवं शब्देषु तादृशी क्रियामापादिता करणपरिष्यदा(?) यया तन्त्रेण द्वावेव[13] शब्दावुच्चार्येते। उपायद्वयं च लोके[14] शब्दप्रयोगे[15], (क्रमो) वा यौगपद्यं वा। कदाचित्क्रमवतः[16] शब्दान् प्रयुंक्ते। स कथम्? (अ)क्षो भज्यतामक्षो दीव्यतामिति। कदाचिदुपसंहृत्य क्रमं यौगपद्येनोच्चारयति, [17]अक्षा भज्यन्तां दीव्यन्तामिति। "द्वावभ्युपायौ[18] शब्दानां प्रयोगे समवस्थितौ। क्रमो वा यौगपद्यं वा लोको नातिनिवर्तत[19]" इति। तस्मादिहापि[20] गर्गादिबिदादिपाठः [21]तन्त्राभ्युपायः समुदायावयवयोः प्रतिपादक इति।

## अथवेदं तावदयं प्रष्टव्य इति।

अयमभिप्रायः—[22]सर्वेष्वेवामी समुदायस्था उपदिष्टाः तत्र सिद्धैव[23] कलादिनिवृत्तिरिति।

---

[1] कार्य- [2] Ms-देशप्रशब्देन [3] Ms निष्टा [4] Edn. वाक्यान्यपिद्विष्ठानि भवन्ति
[5] Ms स [6] Ms सनि- [7] Ms-नश्चेदं
[8] Ms श्वासं इत [9] Ms-पंतारौ [10] Ms-पद्यते
[11] Ms-वेनौ [12] Ms दि। दक्षो हि दक्षोच्चनंत्रेण [13] Ms द्वारेव
[14] Ms लोक- [15] Ms-गो [16] Ms-वंतः
[17] Ms आक्षाततां भुज्यतां [18] Ms भ्युदयौ [19] Vāk. II. 470
[20] Ms-पिवि [21] Ms तन्द्रा- [22] Ms सर्वेष्टे- [23] Ms सिद्धेव

**धातवोऽपि शुद्धाः पठ्यन्ते ।**

[1]चुलुम्पादयोऽपि भाष्य एवोच्चार्यन्त इत्यभिप्रायः ।

**यानि तर्हि अग्रहणानि ।**

डित्थादीनि ।

**५ एतेषामप्यवश्यं [2]स्वरवर्णानु (पू)र्वीज्ञानार्थ[3] उपदेशः कर्तव्यः ।**

अथवा गर्गादिबिदादीनां च स्वरवर्णानुपूर्व्यर्थ[4] उपदेशः कर्तव्यः । एवं स्मर्यते—इह यदेषामुच्चारणं तत्प्रयविद्ध्यर्थमिति(?) । अथवानेनैवं ब्रुवता[5] एतदाश्रितं—व्युत्पाद्यन्ते एते सर्वे इति । (अथ) ये न व्युत्पाद्यन्ते तेषां को वृत्तान्तः ? उच्यते—एतमर्थं प्रतिपादयति—येऽप्येते गर्गादयः
१० पठिताः एतेऽपि न पाणिनिना उत्पादिताः । किं तर्हि ? एवं भूतानीति[6] ते स्मर्यन्ते । यथैव त एवंभूता एव स्मर्यन्ते, एवमन्येऽपि शब्दाः सामान्येन प्रतिपादिता "उणादयो बहुलम्" (सू. ३. ३. १) इति । अनेन "प्रत्यतः प्रकृतेश्च [7]तदूह्यम्" इति (वा ३. ३. १.), शिष्टप्रयोगमभिसमीक्ष्य प्रकृतिरूहितव्या[8]प्रत्ययाश्च । [9]अवश्यं चैतदेवं प्रतिपत्तव्यमिति । तथाहि—[10]सत्यप्युदात्ताद्युप-
१५ देशे[11] कलादिनिवृत्तौ कृतायां डित्थ इत्ययं[12] साधुः न तु डुत्थ इति, सैषा शिष्टप्रतिपत्तिरवलंबितव्या । तस्मान्न शिष्टप्रयोगमन्तरेणैतत् भवति, सर्वत्र कलादि[13]निवृत्तिरुपपन्ना इति ।

इति [14]भर्तृहरिटीकायां प्रथमाध्यायस्य प्रथममाह्निकम्[15] ।

---

[1] Ms युलुपा  [2] Edn. omit. अवश्यं  [3] Ms-नुवीज्ञानार्थमुप–
[4] Ms पूवी अर्थे  [5] Ms क्रवता  [6] Ms भूतांसीति  [7] Ms तदुह्य,
[8] Ms-व्य  [9] Ms अवश्य  [10] Ms सत्यु  [11] Ms-दुपदेशे
[12] Ms इत्यय  [13] Ms-निष्पत्ति-  [14] Ms-भर्तृहर-  [15] Ms-साह्निकं

# अथ द्वितीयमाह्निकम्

## अइउण्

### अकारस्य विवृतोपदेशः ॥ वा ॥

स्पृष्टतादयश्चत्वार आभ्यन्तरा(:) प्रयत्नाः सवर्णसंज्ञायाः[1] प्रवृत्तौ च निवृत्तौ च व्याप्रियन्ते। तत्राकारः संवृतः[2] आकारो विवृत इति सावर्ण्यस्याभावात् आकारोऽसति ग्रहणे कार्यं न प्रतिपद्येत, अतो विवृतोपदेश आश्रीयते। ननु च नियतप्रयत्नत्वात् वर्णानां स्थाननियमवत्, यथा नियतस्थानत्वादशक्य [3]इकारस्त्वोष्ठाभ्यामुच्चारयितुं, अकारो वा दन्तेन,[4] एवं [5]संवृतोऽकारः कथमिव शक्यो विवृत[6] उच्चारयितुम्? उच्यते—कश्चिदेव[7] प्रयत्नो न शक्यते कर्तुम्, वक्त्रा प्रमादात् वर्णान्तरे(?) अयं तु [8]सन्दष्टादिवत् शक्यते प्रमादात्कर्तुमिति। अतश्च शक्यते, यत् विवृतोपदेशश्चोद्यते। तत्राकार इति कारशब्दः प्रत्ययो "वर्णात्कार" (वा. ३. ३. १०८) इति। वर्णवाचिनो वर्णात्स्वार्थे वर्णाभिधायिनो यः[9] प्रत्यय इति। वाक्यस्थेनाकारेण सूत्रस्थ[10] अइउण् इत्यकारो व्यपदिश्यते। अथ ककार इति कथं प्रत्ययः? [11]नह्य(यं) वर्णः। किं तर्हि? वर्णसमुदायः। नैष दोषः। एवमर्थमेवेदमुपन्यस्तं,[12] वर्णाभिधायिनो यः प्रत्यय इति। व्यंजनमशक्यमनच्कमुच्चारयितुमिति [13]साच्कात् वर्णात् वर्णाभिधायिनः कारप्रत्ययः, प्रतिपाद्यमानस्त्वनच्क एव प्रतीयते। यथा जिह्वामूलीयोपध्मानीयानुपस्थितौ[14] खकारः फकारः[15] चोच्चार्येते; प्रतिपन्नैस्तु शुद्धावेव। ननु च कारप्रत्ययस्य नित्यत्वात् "अस्य च्वौ" (सू. ७. ४३२) इति निर्देशानुपपत्तिः, अकारस्य च्वाविति भवितव्यम्? उच्यते—वाच्यवाचकौ[16] भेदेन अविवक्षितौ[17] स एवायमित्येकत्वाध्यवसायि(त्वात्) वर्णवाचित्वं नास्ति इति प्रत्ययाभावः। अथवास्मादेव निर्देशादनित्यः प्रत्यय इति प्रतिपत्तव्यम्।

### अकारस्य विवृतोपदेशः।

विवृतशब्दस्य सापेक्षत्वात् [18]असामर्थ्यादुपदेशशब्देन समासानु-

---

[1] Ms सवर्णा: संज्ञाप्या:
[2] Ms सवृत्त:
[3] Ms-इकारस्वो–
[4] Ms अदंतेन
[5] Ms शब्दतोकार:
[6] Ms शब्दो निवृत
[7] Ms-देवं
[8] Ms संदिष्टा
[9] Ms स्वार्थेवर्णाभिधेयतायां
[10] Ms तत्रस्य
[11] Ms तर्ह्यवर्ण:
[12] Ms-पयस्तं
[13] Ms-साक्व-
[14] Ms-यावुपस्थितौ
[15] Ms खकारं फकारं
[16] Ms-क-
[17] Ms-ते
[18] Ms असामर्थोसत्युप-

पपत्तिः ? उच्यते—विवृतस्य गुणत्वात् गुणस्य गुण्यपेक्षत्वमन्यावृतत्व(?) मित्यपेक्षावान् प्रवर्तते। समुदायविशेषणं वा सत् वृत्तस्यावयवमपि संस्प्रक्ष्यति। किं तु (?) वा गमकत्वं तत्रोक्तं—"इह गम(क)त्वात् वृत्तिर्भविष्यति" (भा. ३. १. ८) अथवा[१] विवृतेनोपदेश इति "साधनं कृता" (वा.२.१.३३) इति[२] समासे कृते स विवृतोपदेशोऽकारस्येति दोषाभावः। अथ किमर्थमिद[३]मुच्यते "अकारस्य विवृतोपदेश" इति; यावता[४] सूत्रोच्चारणादेवाधिगतमनेन विवृतोऽयमकार (उपदिष्ट) इति। कश्चित् विशेषः शब्दगतोऽभ्यासादवगम्यते,[५] यथोदात्तादि(:) वेदाध्यायिनामेव प्रसिद्धः, तथा ऋषभ[६] गान्धार इति गान्धर्वाणामेव; एवमयं [७]विवृतो दुर्वेद्योऽभ्यासादित्यतः[८] कथयति, विवृतोपदेश इति[९]। अन्ये मन्यन्ते—अयमपि प्रत्याहारे कृतप्रत्यापत्तिरेव पठितः। अयं तूच्चार्याश्रवणायमकारं(?)प्रत्याययति, [१०]संवृतः प्रतीयते। यथा "ष्ठा गतिनिवृत्तौ[११]", "धः कर्मणि[१२]ष्टूरन्" (सू. ३. २. १८१) इति च कृतष्टुत्व उच्चार्यमाणो लक्ष्यति(?) विषयं [१३]प्रतीयमानं, स्था इति (त्र)न्निति[१४] चैवं रूपं प्रतिपादयति। तस्मिंश्च प्रयोगविषये एव रूपे ष्टुत्वस्यासिद्धत्वात् धात्वादिविकारः प्रवर्तते[१५]। तत्र कृतप्रत्यापत्तावश्वार्कादिषु[१६] तेषां कस्यचिदेवानुकरणो व्यक्तिपक्षे। आकृतिपक्षे तु सामान्यमनुक्रियते। तत्राक्षरसमाम्नायिकस्य प्रत्या(पत्तौ) सर्वे कृतप्रत्यापत्तय इति नैव भवत्यादिशब्दरूपसिद्धौ[१७] प्रत्यापत्तिमुपादिशन्ति[१८]। अन्ये मन्यन्ते—नैवायमनुकरणो न च[१९] कृतप्रत्यापत्तिः कस्यचित्प्रतिपादकः। किं तर्हि ? अनर्थकव्यवायमकृतप्रत्यापत्ति(:) विवृत उच्चरित इति(?)।

**किं प्रयोजनम् ? आकारग्रहणार्थः।**

न(नु) चैवं निर्देष्टव्यम्, आकारग्रहणमिति ? उच्यते—कदाचिद्धर्मी[२०] धर्मव्यपदेशकः। तद्यथा विषाणी ककुद्मान् प्रान्ते वालधिः (?) सास्नावानिति। तद्भावेव(?) व्यपदिश्यमानो विशेषं प्रतिपद्यते ह्रस्व इति, एवं दीर्घ इति, एवमान्न चतुर्मात्र इति। तत्र यस्यामवस्थायां करणसन्निपाता(त्) ध्वनिः ध्वन्यन्तरमारभते तदोपरत एवास्य व्यापार इति युक्तमुच्यते—

**[२१]बाह्यश्च पुनरास्यात्काल इति।**

अथाबाह्यमेव[२२] यत्नं[२३] प्रतिपद्यते यथा शकरोन्मुक्तरेने रेचकादिकर्मणि

---

[१] Ms अन्यथवा [२] Ms हि [३] Ms-सिद– [४] Ms यवता
[५] Ms-देवगम्यते [६] Ms वृषभ [७] Ms विकृतो दुर्वेद्यो-
[८] Ms स्मदित्यत: [९] Ms-तोयमुपदिष्ट इति. [१०] Ms स वृत:
[११] Ms भ्वादि. ९२८ [१२] Ms कर्मनि- [१३] Ms प्रधीय- [१४] Ms-निति.
[१५] Ms प्रवर्तन्ते [१६] M :-त्तावुश्चार्कादिषु [१७] Ms शब्दे रूपं सिद्धौ
[१८] Ms-मुपांदि संति. [१९] Ms य. [२०] Ms-मी
[२१] Ms बाह्याश्च धुनिरा [२२] Ms-थाप्याद्यमेव- [२३] Ms यत्न:

बाह्य एव य आक्षेपविशेष सत एव प्रवृत्तिरित्येवमर्थप्रयुक्तमाणो नाभिप्रदेश एव वायोः प्रकार प्रयत्नमारभ्यत इति कालस्या[1](स्यात्) बाह्यत्वमस्त्येव (?)। ननु[2] चेदं विरुध्यते, "तप(र)स्तत्कालस्य" (सू.१. १.७०) इति, एवं हि तत्रोक्तम्[3] "स्फोटस्तावानेव केवलं वृत्तिभेदः ततश्च सर्वासु वृत्तिषु तत्कालत्वम्" (भा. १ १.७०) इति। इहापि ह्रस्वदीर्घयोः कालस्य तुल्यत्वात् [4]खट्वाभिरिति भवितव्यमैस्भावेन[5]। उच्यते—नैष दोषः। अभ्युपगमात्, एवमर्थमेव शब्दानां नित्यत्वमभ्युपगम्यते। तस्य नित्यस्य पुन(:) ये अभिव्यंजकास्ते च केचित् प्राकृताः केचित् वैकृताः। यः करणसन्निपातादुत्पद्यते[6] यश्च तस्मात् तौ [7]प्राकृतौ, ताभ्यां विशेषोपलब्धिः। यस्तु [8]ध्वनेर्ध्वनिरुत्पद्यते स वैकृतः[9] ततो विशेषाभावात्, केवलं तु स एवमुपलब्धकृत(?) इति। एष विशेषः—यदि शब्दान्तराभावात् भिन्नकालत्वं द्रुतमध्यविलंबितास्वपि[10] भिन्नकालत्वं; अथ दीर्घप्लुतेषु पुनः पुनः कर[11]णाभिघातः। तद्द्रुतादिष्वसति कालस्यास्या(द्वा)ह्यत्वे[12] दुरुपपादं[13] करणाभिघातस्यानुपरमादिति।

## किं पुनरिदमिति।

किमिदमपूर्वं पाणिनि(ना) विवृतत्वमकृतमुपसंख्यायते, उत कृतस्यान्वाख्यानमिति।

## यदयं अ अ इति प्रत्यापत्तिं शास्ति।

यदिह संवृत एवाकारः प्रतिज्ञातः स्यात् किं तस्य प्रत्यापत्त्या? तत्र प्रत्यापत्तिवचनादवसीयते[14], विवृतोऽकार[15] इति; यश्च प्रत्याहारे, यश्चानुवृत्तिनि(र्दे)शे[16] "अस्य च्वौ" (सू. ७. ४. ३२) "अकः सवर्णे दीर्घः" (सू. ६. १. १०१) इत्येवमादिषु, यश्च प्रयोगशब्देष्वश्रा[17]र्कार्थादिशब्देषु।

## अस्ति[18] हि अन्यदेतस्य[19] वचने प्रयोजनम्।

अयमभिप्रायः—"अ अ इति" योऽयं संस्कारशब्दोऽयं [20]प्रयोगशब्देष्वेवाकारस्योपपद्यते, [21]नानर्थकानां प्रतिपादनशब्दानाम्। अयं च वक्तृप्रमादजो दोषोऽस्त्येव वि(वृ)तत्वमातश्चास्ति[22] यत्पाणिनिना कृतमिति। [23]एवमतिखट्वादिषु प्रयोगशब्देषु विवृतत्वमुच्चारयेत् तस्मात् प्रत्यापत्तिरुच्यते[24]।

---

[1] Ms-स्यां [2] Ms नुनु [3] Ms तन्नेक्तं [4] Ms खट्वादिभि-
[5] Ms-व्यमिसभावेन [6] Ms-त्पदायत्ते [7] Ms प्रवृत्तौ
[8] Ms ध्वजोध्वनि- [9] Ms सै वै कृता [10] Ms-मप्यवलंभितास्वंपि
[11] Ms णाभिघाते। तदुदादि [12] Ms त्वं [13] Ms-पवादं
[14] Ms-वंचनादवसीयते [15] Ms-तौकार [16] Ms नुपपत्तिनित्य
[17] Ms ष्वस्ता [18] Ms असि [19] Ms-न्यत्पदेयस्य
[20] Ms प्रेयोग [21] Ms नानार्थ- [22] Ms तृश्चास्ति
[23] Ms एवमिति [24] Ms-च्येत

अथ च न विवृत उपदिष्ट(:) स्यात् तत्र चोद्यते—न चेत्प्रत्याहारे अनुवृत्तिसंदेशेषु चाकारो विवृतः अत्र प्रयत्नभेदात् नाकारः[1] सवर्णो नापि तदादेशः। [2]असावण्र्यादग्रहणे सति स्थान्यादेशयोरुत्वाभावः[3]। (न) स्थानी(अच्) [4]नाप्यादेश इति कस्य प्रत्यापत्तिः? उच्यते—लिंगादिदमवसीयते, भवत्या- ५ कारस्य अकार इति। यदयमित्वे "आतः स्थाने यकपूर्वाया"(सू० ७. ३. ४६) इत्याह, न "केऽण" (सू० ७. ४. १३) इति [5]ह्रस्वमन्तरेण अकारोऽस्ति; यस्मात् लिंगात् विकलांगा[6] परिभाषा नोपतिष्ठेत[7] इति च, "ऊकालोऽच् ह्रस्व" (सू० १. २. २७) इति च [8]यकपूर्व आ(प्)। (य)द्येवमिदं कस्मान्न कल्पते, लिं(गा)त्सावण्र्यमस्तीति? यदि च सावण्र्यम्[9] किं विवृतेन प्रत्यापत्त्या १० वा? उच्यते—लिंगमनुमानपक्षः, (न) सर्वत्रानुमानात् प्रतिपत्तिरिति विशिष्टविषयमनुमानं प्रतिपद्यामहे। सावण्र्यम् नास्ति लिंगात्। किं तर्हि? आदेशमात्रमिति[10]। अथवा [11]गोस्त्रीग्रहणं तत्र कृतम्, तत्र [12](गो)स्त्रीग्रहण-मनवकाशमिति [13]प्रवर्तेतादेशो, न तु सावर्ण्यमिति।

## [14]अत्रान्तर्य(त) इति।

१५ वक्तु(:) [15]प्रमादजोऽस्त्य(न्त)रतम इत्यभिप्रायः।

## नैव लोके न (च) वेद इति।

एतदुक्तं भवति—मयोक्ता[16] दोषा वक्तृप्रमादजाः सन्ति। तावतां[17] निवृत्त्यर्थं प्रत्यापत्तिर्वक्तव्या[18]। सन्ति दोषाः कलादयः। न च तद्-विषयास्ति[19] प्रत्यापत्तिः। [20]ते हि गर्गादिबिदादिपाठादेव निवर्तिताः। २० [21]एवमकारस्यापि प्रयोगस्थस्य विवृतत्वं निवर्तितं गर्गादिबिदादिपाठादेव। तस्मात्पाणिनिरेव विवृतत्वं प्रतिजानीत इत्यस्यैव लिंगं प्रत्यापत्तिः।

## कः पुनरत्र वि(शे)ष इति।

वाक्यगतं व्यापारं पृच्छति। वाक्ये हि कल्प्यत्वात् वाक्यशेषस्य, कर्तव्य इति वा कृत इति वा नास्ति कश्चित् विशेष इति।

२५ **न खलु कश्चित्, आहोपुरुषिकामात्रन्तु।**

अहंपुरुष इत्युच्यते आत्मसंभावितः। परस्मादुत्कृष्टमात्मानं यो

---

[1] Ms नाप्याकारः [2] Ms असावस्माद- [3] Ms-त्वाभावः [4] Ms नाव्या-
[5] Ms ह्रस्वस्यमतेरे- [6] गान परि- [7] Ms ष्टेता
[8] Ms-अ [9] Ms-र्ण्ये [10] Ms-त्रमित्रमिति
[11] Ms गौणाद् [12] Ms-णादग्र- [13] Ms प्रवर्तता-
[14] Ms तत्रांतर्या [15] Ms प्रमादजोस्ता- [16] Ms याक्ता
[17] Ms तावता [18] Ms-र्वकव्या [19] Ms-यस्ति
[20] Ms त [21] Ms येव

मन्यते अहंका(र)वान्[1] तस्य भाव इति छेदिकादीनां (?) "मनोज्ञादि" दर्शनात् वुञ्। आहोपुरुषिकेति अहंयुत्वमुच्यते।

**भवानाहेति।**

न[2] सम्यक् भवतोक्तं, मयैव तु यदुक्तं तदेव युक्तं[3]; [4]प्रत्यापत्ति-
५ वचनादिति।

**[5]तस्य विवृतोपदेशात् ॥ वा॥**

आक्षरसमाम्नायिक अनर्थको विवृतः कृतप्रत्यापत्तिः, यः[6] शास्त्र एव अइउणित्यस्य प्रतिपादकः—यथा "वर्तमाने लट्" (सू० ३. २. १२३) इति नोच्चार्यमाणस्येत्संज्ञा। किं तर्हि? वर्ण[7]विक्रियाविषयस्य बुद्धिस्थस्य—स
१० त्वनेन प्रतिपाद्यते। अथवानुकरणोऽयं समुदायस्थानां, द्रव्यवच्चोपदेशे[8] कस्य(चि)देवानुकरणं स्यादितीदमुच्यते—

**धात्वादिस्थस्यापि विवृतोपदेशः कर्तव्यः।**

इतरथा हि प्रयत्नभेदात् आक्षरसमाम्नायिकेनाग्रहणात् [9]असति (वि)वृ(त)त्वे अस्थानित्वात् शाम्यतीति दीर्घो न स्यात्। प्रातिपदिकस्या-
१५ न्तोदात्तो भवतीत्येतन्न स्यात्, दृषदिति। प्रत्यये चायक[10] इत्यायादेशो न स्यात्। अवगत इति स्वरेण न स्यात् (?)।

**यदयमकः सवर्णे दीर्घ इति।**

अयमनुबन्धेन चिह्नेन ज्ञायते, स एवायमाक्षरसमाम्नायिक इति। यदि धात्वा(दि)स्थश्च न[11] गृह्येत एतावत् ब्रूयात्, इकः सवर्णे दीर्घ इति।

२० **न हि (द्वयो)राक्षरसमाम्नायिकयोरिति।**

यद्यप्येको नास्ति तथापि [12]द्विविषयत्वा(त्) दीर्घस्येदमुक्तम्।

**(तदर्थम्)।**

आकारार्थमेतत्स्यात्, स हि विवृतत्वात् सवर्णो भवतीति।

**क एष यत्न(ः) चोद्यते विवृतोपदेशो नाम।**

२५ एतदेवाह, कोऽत्रादरो यावता धात्वादयः पठ्यन्त[13] एव, न च ते पठ्यमानाः संचारेण विचारेण (?) वा किंचित् गौरवं लाघवं वा जनयन्तीति।

---

[1] Ms-चान् [2] Ms भ [3] Ms-मुक्तं [4] Ms प्रत्य-
[5] Ms तस्माद्विवृ- [6] Ms यो. [7] Ms-विक्रया-
[8] Ms-शं [9] Ms असत्य- [10] Ms वाचक
[11] Ms-र्थस्याना. [12] Ms दिविषयं- [13] Ms पठ्यत.

**यान्येतानि (प्रतिपादिकान्य)ग्रहणानि ।**

य एते रङ्कादयो (?) लोके प्रयुक्ता एतेषु संवृतोऽकारः प्रयुज्यते । शास्त्रे चैषामुच्चारणं नास्ति । न चोच्चारणमन्तरेण शक्यं विवृतत्वं प्रतिज्ञातुम् । सति [1]चोपदेशे गुरु शास्त्रं भवति ।

**तस्मादिदं पठितव्यम्[2], धात्वादिस्थश्च विवृत इति ।**

अथवा (धा)तुग्रहणं किमर्थम्, यावता पठ्यन्त एव धातवः । उच्यते—प्रतिपदिकार्थं [3]चेदिदमारभ्यते, तत् धात्वर्थमपि भविष्यति । ततश्च उच्चारणे संवृता[4] एवोच्चारयिष्यन्ते, कार्ये तु विवृता इति ज्ञास्यते । एवं च सति करणविरामोऽप्याख्यातुं न भवतीति (?) ।

**दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः ॥ वा ॥**

केचित् वर्णयन्ति—आक्षरसमाम्नायिकस्यैव विवृतोपदेशे द्वितीयं प्रयोजनमन्वाख्यायते[5] । तस्य संवृतत्वात् दीर्घप्लुतावान्तरतम्यात् संवृतौ प्राप्नुतः । केचित् धात्वादिस्थस्य विवृतोपदेशे प्रयोजनमाचक्षते । अत्र त्विदं चोद्यते[6]—संवृतत्वात् दीर्घस्तु स्याणत्वात् (?) स्थानित्वानुपपत्तिरिति ।

**नैव लोके न च वेद इति ।**

शिष्टप्रयोगं हेतुमाह, नहि शिष्टाः दीर्घप्लुतौ प्रयुंजते[7] ।

**स्थानी प्रकल्पयेदेतौ इति ।**

निवर्तकमिदं लक्षणमित्येवं केचित् मन्यन्ते । इह भव(न्त)स्त्वाहुः[8]—यथैव शिष्टा नान्यन्तस्थाः[9](?) सानुनासिकाः प्रयुज्यन्ते ; इह तु स्थानेऽन्तरतमपरिभाषाश्रयणात् भवति प्रतिपत्तिः, अनुज्ञातोऽस्मिन् विषये अनुनासिक इति । एवं यद्यप्यत्र दीर्घप्लुतौ संवृतौ न स्यातां तदान्तरतम्या(त्)स्यादनुज्ञा इति ।

**विषम (उ)पन्यासः (युक्तं यत्) सतस्तत्र प्रकृष्टिर्भवति ।**

अने(ने)दमाह—अशक्यत्वादिति । इह किंचित् [10]शक्यं ; यथा हस्ताभ्यां शक्येत गन्तुं, न तु शिरसा, एवं[11] चाकारो दीर्घः प्लुतो वा अशक्य एव संवृत उच्चार(यि)तुं सर्वेण लोकेन; नियताश्च वर्णदोषाः । [12]एवं हि उक्तं—"स्वरदोषभावना, अतोऽन्ये व्यंजनदोषा" ( भा. पस्पशा ) इति । अन्तस्थास्तु शक्यन्त उच्चारयितुं सानुनासिकाः तत्रापि रेफः अशक्य इति । द्वौ हेतू [13]व्यपदिष्टौ, शिष्टा [14]प्र(यो)गोऽशक्यत्वं च ।

---

[1] Ms चौ- [2] Edn तस्माद्वक्तव्यं [3] Ms चि-
[4] Ms ततश्चौच्चारणं संवृत [5] Ms-मान्वाख्यायते [6] चोद्युते.
[7] Ms प्रयुज्यन्ते [8] Ms-स्त्याहु: [9] Ms नान्यत्रस्था: [10] Ms शक्य.
[11] Ms एव. [12] Ms एव ह्युक्ता [13] Ms अप. [14] Ms प्रगौश-

## एवमपि कुत एतत् ?

[1]अथोच्यते, संवृतश्चेदकार[2] [3]इकारोकारयो(र्वि)वृतत्वात् तुल्यप्रयत्नत्वं कुतः ? एवं हि उक्तं "विवृतं करणं स्वरोष्मणाम्" इति। तत्र वर्णयन्ति—"प्लुतः[4] संवृता [5]अन्यत्राभ्यवसान्नः" इति। ए(त)च्चासत्। [6]पार्षदकृतिरेषा, अस्यामेव [7]शाखायामार्भवं मुक्त्वा सामान्तराणां संवृतत्वं, अन्येषां तु विवृतार्[8] एव। तत्तस्मादयमर्थः "एवमपि कुत एतदिति"। विवृतत्वेऽपि सत्यकारस्य न सिद्ध्यति। अकारो हि विवृतः आकारो हि विवृततरः इकारोकारौ[9] तु विवृततरावपि; तत्र तुल्यप्रयत्नाभ्यामेव भवितव्यम्। यद्येवं ग्रहणमपि न[9] प्राप्नोति। वचनात् ग्रहणं भविष्यति। अथवा विवृतोपदेश एतदुक्तं भवति—[10]वि(वृ)ततरोपदेश इति। तत्कथं "[11]सन्ध्यक्षरेषु यदत्रावर्णं विवृततरं तदन्यस्मात्[12]" (भा. एओङ्) इति ? एतदपि विवृततममिति प्रतिपत्तव्यम्।

## तत्रानुवृत्तिनिर्देशे[13] सवर्णाग्रहणमनण्त्वात् ॥ वा ॥

"अइउण्" इत्यपरः, "अकः सवर्णे" (सू. ६. १. १०१) इत्यन्यः। शुद्ध एव "अस्य च्वौ" (सू. ७. ४. ३२) "यस्येति च" (सू. ६. ४. १४८) इति। तत्रानुबन्धेन प्रतिपद्य(ते) स (ए)वायमिति[14]। शुद्धेषु तु नास्य च्वं (?)। तत्र यथैवाकारः प्रत्याय्य एव नित्यं न तु प्रत्यायकः एवं अयमप्यकारः प्रत्याय्य एव। तेनायमेव कार्यं प्रतिपद्येत, शुक्लीभवति। मालीभवतीति [15]न स्यात्। एवं "चौडिः[16] बालाकिः" इति।

## एकत्वात् (अकारस्य) सिद्धम् ॥ वा ॥

अनुवृत्तादत्वात् (?)।

## [17]अनुबन्धसंकरस्तु।

वस्तुतोऽका(र)स्याभेदाच्च। एवं "कर्मण्यण्" (सू. ३. २. १) एवं च "आतोऽनुपसर्गे क" (सू. ३. २. ३) इति। यथैव च मुण्डेन कृते चौर्ये कुन्तली सम्पन्न[18] इति, न च गृह्यते चोर इति। तत्र गोद इति परत्वात् ठक्[19] स्यात्, उत्तरार्थं कित्करणम्। अथवानवकाशत्वात् पर्यायः स्यात्[20]।

---

[1] Ms वथोच्यंते [2] Ms-दाकर. [3] Ms इकारोकारव्या-
[4] Ms प्लुत: [5] Ms अन्यत्रांतर्भवः वसामू
[6] Ms षपार्षक्षदकृविरषा [7] Ms साधोयामार्भवमुत्कासामान्तरेण विवृ-
[8] Ms सुपिवृता [9] Ms तु. [10] Ms नितततरो-
[11] Ms संत्यक्ष- [12] Ms-स्यात्; [13] Ms-निर्दिशे सवर्ण-
[14] Ms-मायमिति [15] Ms तस्मात्
[16] Ms वोडि:; cf. MB. I. 4.2. [17] Ms अनुबन्धमत्कार
[18] Ms कुतलीं सपन्न [19] Ms कक्ष [20] Ms प्याश

**किरिणा गिरिणेति ।**

अकारो नोदाह्रियते[1] "न [2]गोश्वन्त्साववर्ण" (सू० ६. १. १८२) इति प्रतिषिद्ध(त्वा)त्[3] ।

**घटेन ततरति इति ।**

केवलं द्विरुच्चारणं वस्त्वेकमिति । ठंस्तु[4] [5]बाहु(ल)कादिषु कृतार्थः ।

**द्रव्यवच्चोपचाराः ॥ वा ॥**

**नहि एकेन घटेन [6]एककालमनेकः [7]कार्यं करोति ।**

घृताद्याहरणादि । अकारं अश्नात्कारवर्जितमुच्चारयति (?)

**विषयेण तु नानालिंगकरणात् ॥ वा ॥**

वाक्यकारः सामान्यं करणं निर्दिशति, भाष्यकारो भेदमधिकरणभावं च वीप्सासप्तमीभ्यां कथयति ।

**एकमेवायं[8] सर्वगुणमुच्चारयेत् ।**

कर्मण्युपपदे कणप...भवतीति ब्रूयात्[9] । यावन्तो वा शक्नोत्युच्चारयितुं तावत[10] उच्चारयेत् । [11]अन्यांस्तु लुप्तनिर्दिष्टान् प्रतिजानीत इति ।

**[12]आयम्य हि [12]द्वयोरित्संज्ञा(स्या)त् ।**

इत्संज्ञै चैव शास्त्रापेक्षया [14]आयम्येत्येककर्तृक[15]सिद्ध्यत्वा(?) । तत्रा(पि) द्वयोरित्संज्ञान्तरालपतितानां [16]तु नैव स्यात् ।

**विषयेण (तु) पुनर्लिंगकरणात् सिद्धम् ।**

ननु च नियमार्थमेतत्स्यात् नकृतमेव भवति न क्तिन्कृतमन्तोदात्ता-
२० दिति (?) विधेये सति नियमो विज्ञायत इति इदमेव ज्ञास्यति, अन्यत्र तत्कृत्तन भवतीति (?) इतरथा हि एवं वक्तव्यं , शिवादिभ्य अ इति ।

**लोकत एतत्सिद्धम् ।**

नैवमुच्यते, "एकमेवायं[17] [18]सर्वगुणमुच्चार(ये)त्" । कथं तर्हि ? शब्दवत्यत्र लिंगं कार्यमाश्रीयते तल्लोके तल्लिंगस्येव भवति, चौर्ये तु [19]मुण्डा-
२५ दयः शब्दवन्तः तत्र यथैव मुण्डात् यो न कर्तव्यमिति तत्र शिखी जटी वा

---

[1] Ms मोकारो भोदाह एति [2] Ms-गोश्चसा [3] Ms-द्धात्
[4] Ms घटंस्तु [5] Ms वा- [6] Edn युगपत्
[7] Ms कं. [8] Ms एक एवायं [9] Ms ष्टतुयात्
[10] Ms तावंत [11] Ms अन्यास्तु लुप्तनिर्देष्टचन् [12] Ms आचम्य
[13] Ms द्वयोरेवेत्संज्ञा [14] Ms आयतीत्ये- [15] Ms-कतृक-
[16] Ms दुनैवस्त्यात् [17] Ms एक एवायं [18] Ms सर्वगुणे- [19] Ms मंडा-

कार्यं प्रतिपद्यते (?); एवमिहापि कार्यार्थमनुबन्धासंगस्तेन[1] तस्मिन्ततस्मिन् विषये तत्तत्कार्यं लप्स्यत[2] इति। "अ सांप्रतीक" (सू० ४. ३. ९) इत्यत्र किमर्थं णित्कृतं[3] न भवति नहि अस्मिन् किंचिदस्ति लिंगमित्यनियमः प्राप्नोति। उच्यते—"मध्यान्मोऽसांप्रतीक" इति पर्युदासेन सिद्धे निरनुबन्धाश्रयणमेवमर्थं, अनुबन्धवियोग एव लिंगं कथं स्यादिति; तत्र यथैव कश्चिदुच्यते, इह नग्नो [4]भवेति एवं निरनुबन्धको भवेति नियुज्यते।

## आवृत्तिसंख्यानात् ॥ वा ॥

इह लो(के) यत्र मुख्यः संख्य...शत्वं(?) संपद्यते तत्र [5]चावृत्तावनियतविषयायामुच्यते "त्रिः प्रथमामन्वाह [6]त्रिरुत्तमाम्" इति। प्रथमोत्तमे आवृत्तिसंख्ये इति।

## भवेदावृत्ति(तः) कार्यम्।

यत्रानेकत्वमाश्रीयते। यत्र त्वेकत्वमेव तत्र स्वाश्रयस्यानि[7]वृत्तत्वात्प्राप्नोत्येव[8] स्वरः किरिणा गिरिणेति।

## एतदपि सिद्धम्।

संख्यान्तरेणात्यन्तं निवर्त्यते गौणेन मुख्येन वा; यथा शास्त्रे, नैधेय[9] इति सति [10]स्थानि(व)त्वे त्र्यच्कोऽयमिति द्व्यच्क(त्वे) बाधिते ढकोऽप्राप्तिरितीदमुदाह्रियते, "पूर्वविधाविति किमर्थम्" (भा० १. १. ५७) इति।

## तद्यथा ऋषिसहस्रमेकां कपिलामेकैकश इति।

ऋषिसहस्रमिति सामानाधिकरण्य एकैक[11] इति साक्षात्सम्बन्धः, षष्ठीसमासे वा सामर्थ्यलक्षणः सम्बन्धः भुजिवत् इति। ते हि[12] परस्परं [13]वित्तेन स्वीकृत्य सहस्रकृत्वो दद(ति)। एतच्च दानं[14] स्वीकृतस्य वस्तुनः परित्यागः। तत्रैकस्या अपि दा(ना)त् सहस्रदक्षिणा [15]आनीयन्तामित्ये(ते)ऽप्यानीयन्ते, एकदक्षिणा आनीयन्तामिति नानीयन्ते। यथैवात्र [16]संख्या निवर्तिकैव पूर्वसंख्यायाः एवमिहापि इति दोषाभावः।

## [17]आन्यभाव्यं तु कालशब्दव्यवायात् ॥ वा ॥

साधर्म्यवैधर्म्याभ्यामयं हेतुः। प्रसिद्धिनानात्वैः साधर्म्यम्, प्रसिद्ध्येकत्वैश्च[18] वैधर्म्यम्। इह शब्दव्यवायो येषां सिद्धः[19] नानात्वं तेषां

---

[1] Ms-गास्तेन [2] Ms-त्कालं लप् प्यत्त [3] Ms णिरकृतं
[4] Ms भवति [5] Ms वा– [6] Ms त्रिरुत्तमामन्वाहेति, TS II. 5.7.
[7] Ms-स्याभि- [8] Ms-प्तोत्यव [9] Ms नैधेस [10] Ms स्थानित्वत्यक्कोऽय-
[11] Ms णकेक [12] Ms तर्हि [13] Ms चित्तेन
[14] Ms दानुं. [15] Ms आनीयंत- [16] Ms संख्यां निवर्ति किं व
[17] Ms अन्य- [18] Ms-कं चैश्वावे धर्म्या [19] Ms सिद्धं

दृष्टम्[1]। तद्यथा, दृतिरिति ऋकारेकारयोस्तकारेण। इहापि दण्ड इति दकारे यः अकारः डशब्दे च, [2]तयोर्डशब्देन व्यवायो दृष्टः। एकस्य चात्मनो धर्मो नास्ति यदायमकारः शुद्ध उच्चार्यते अ इति तदा [3]नास्त्यस्य शब्देन व्यवायः। तथा [4]पौर्वापर्यम् कालव्यवेतमसंहितायां प्रसिद्धनानात्वेष्वेव[5] दृष्टः अ इ उ इति। न त्वेकस्यात्मनोऽकारस्य, (न)हि अस्योच्चारणविषये कालभेदो विद्यते। इह तु दण्डाग्रमिति असंहितायामस्ति [6]पौर्वापर्यं कालव्यवेतम्। तस्मात् नाना अकारः। ननु शब्दव्यवायेऽप्यस्ति कालव्यवायः तत्र कालव्यवाय इत्येव सिद्धम्? उच्यते—कालव्यवाय एव द्वेधा प्रदर्शितः, शब्दशून्यः शब्दवांश्च।

**[7]युगपद्देशपृथक्त्वदर्शनात् ॥ वा ॥**

देशपृथक्त्वेनाकारस्य दर्शनं युगपदस्ति, अयमेकत्वविरोधी धर्मः।

**नहि एको देवदत्तो युगपत्**

देशपृथक्त्वेनोपलभ्यते[8], अकारस्तूपलभ्यते। तस्मादनेकोऽका(र)[9] इति। अन्यत्वे हेतुद्वयमुपन्यस्तं, एकस्य परिहारमाह; यदुच्यते भवता "कालशब्दव्यवायात्" इति अत्र ब्रूमः[10]—

**यदि पुनरिमे वर्णाः—**

**शकुनिवत्स्युः इति ॥ वा ॥**

एतदुक्तं भवति—योऽयं व्यवायः परिकल्प्यते[11] भवता कालशब्दाभ्यां नायं वस्तुनो व्यवायः। किं तर्हि? व्यञ्जकस्य निमित्तस्य प्रवृत्तिनिवृत्तिभ्यां उपलब्ध्यनुपलब्धी एते यदभिव्यंजकनिमित्तत्वमका(र)स्य तद्वर्णान्तराभिव्यंजके निमित्ते प्रवृत्ते अप्रवर्तमानं नोपलंभयति अकारं पुनः प्रवर्तमानमुपलम्भयति। तस्मादुपलब्ध्यनुपलब्ध्योः[12] प्रवृत्तिनिवृत्तिभ्यामिदं भवति, न तु वस्तुनो भेदात्। यथा शकुनिः पंजरावस्थित[13] आशुसंपातित्वात् यथा स्थानान्तरं गच्छेत्। किं तत्र शक्यते वक्तुं, स शकुनिः पूर्वः परश्च [14]वस्तुतोऽभिन्नः शकुन्यन्तरेण व्यवहित इति। एतत्तु शक्यते वक्तुं, पूर्वमनुपलब्ध(:) [15]संप्रत्युपलब्ध इति। एवं च कृत्वेदमाह—

**एवमयमकारो द इत्यत्र[16] दृष्टो**

द इत्यत्रोपलब्धः

**ण्ड[17] इत्यत्र [18]दृश्यते।**

---

[1] Ms-ष्टः [2] Ms तयोर्द- [3] Ms नास्मस्य
[4] Ms यौ वपि र्यं [5] Ms-ष्टोव [6] Ms पोर्वा-
[7] Ms युगपद्दृशपृथग्द-; Edn. युगपच्च [8] Ms-लक्ष्यते. [9] Ms-नेकारका
[10] Ms क्रमः [11] Ms-ल्पते [12] Ms-लब्धेः [13] Ms-स्थिता [14] Ms वस्तुनो-
[15] Ms संप्रत्यय- [16] Ms इयत्यत्र [17] Ms णु. [18] Ms दस्येतो-

(उ)पलभ्यते[1] ।

**नैवं शक्यमनित्यत्वमेवं स्यात् ।**

अस्त्ययं तर्कोश्रितः समाधिः । शास्त्रसिद्धान्तस्तु न भवति । शास्त्रे हि अर्थवतः शब्दस्य नित्यत्वं प्रतिज्ञातं पदस्य वाक्यस्य वा; स [2]च समुदायोऽभ्युपगतः शास्त्रे, समुदायश्च वर्णात्मक एव । तत्रैकत्वप्रतिज्ञाने कर्कस्त्वर्णसमुदायो नास्ति ककारो द्विरुपालब्धोऽकारश्च रेफश्च सकृदिति शक्यं वक्तुं करु इत्येवंलक्षण(:) समुदाय इति (?) एवं कारुक इत्ययमपि कारु इत्येवं[3] लक्षणो श्यवप्रयोगाभावादर्थवत्त्वैव नास्ति (?) । तस्मादभ्युपगन्तव्यमेतत्, अवस्थिता एवामी समुदाया अर्थेषु भिन्नैरेव वर्णैरनुगता इति ।

**यदि[4] तु[5] पुनरिमे वर्णा—**

**आदित्यवत्स्युः ॥ वा ॥**

"युगपद्देशपृथक्त्वदर्शना" दित्यस्य व्यभिचारः, एकस्याप्या(दि)त्यस्य देशपृथक्त्वेषूपलब्धिः दृष्टा । तत्राकारो देवदत्ते नरात्मनि, पुनरादित्ये नेति विषमहेतुरिति[6] ।

**विषम उपन्यासः ।**

एतदाचष्टे—एवं मयोक्तं, न देवदत्तमेको द्रष्टा युगपत् देश(पृथक्त्वे)षू[7]-पलभते, आदित्यमपि च नोपलभते । यो हि उपलब्धा साकेते नासावेव सौराष्ट्रिके । यो वृक्षस्योपरिष्टादादित्यं[8] उपलभते (?) ।

**अकारं (पुन)[9]रुपलभते ।**

यस्यापि च क्षणविषयमुपलब्धियौगपद्यं नास्ति तथाप्यादित्यस्योप(ल)-ब्धा विसदृश्युपलब्धिरकारस्यामुहूर्तविषयस्योपलब्धियौगपद्यस्यासंभवात् (?) ।

**अकारमपि नोपलभते ।**

यद्यकारस्य [10]भेदा(:) स्युरुपपद्यते पृथक्त्वम् । तथैक[11] एव देशः शब्दस्याप्याकाशः । तस्मादहेतुरयं, "युगपत् [12]देशपृथक्त्वदर्शनात्[13]" इति ।

**[14]श्रोत्रोपलब्धि(:) बुद्धि(नि)र्ग्राह्य[15](:)प्रयोगेणाभि[16]ज्वलितः ।**

किमर्थमेतदुपादीयते[17] ? उच्यते—(अ)व्यभिचारिणां धर्माणां प्रदर्शनार्थम्, श्रोत्रोपलब्धित्वमव्यभिचरित[18]मिति; न जातुचित् चक्षुषा दृश्यते ।

---

[1] Ms-भ्यते वक्तुं, स शकुनि:···व्यवहित इति. नैचे शक्य [2] Ms-व-
[3] Ms-व- [4] Ms यहि [5] Edn omits तु. [6] Ms तुरितुरिति
[7] Ms मु- [8] Ms-त्य [9] Ms-रूप- [10] Ms भेद्य-
[11] Ms तथेक [12] Ms देहात् पृ- [13] Ms-नार्थ [14] Ms-श्रोत्रे
[15] Ms-ग्राह्य [16] Ms-णाति [17] Ms-यंते [18] Ms-चारंत-

तथा बुद्धिनिर्ग्रा[1]ह्यत्वात् नान्येन निर्गृह्यते[2] । [3]ध्वनिना व्यज्यमानो न[4] प्रदीपादिभिर[5]भिव्यज्यते । एवमाकाशमव्यभिचारि, तस्मान्न चाकाशमेकं, तस्मादे[6]कदेशत्वमकारस्यानुपपन्नम् । या[7] त्वेकदेशस्य सतः पृथग्देशस्योपलब्धिः सा निमित्तकारणवशात् । यथा दूरादे(ः)व्यपदेशः[8] दूरः[9] श(ब्द)[10]स्सन्निकृष्ट(ः) शब्द इति । करणव्यापारजनिता या[11] बुद्धयो(ः) ता[12] एकस्य वानेकत्वमपि दर्शयन्ति, यथाभोगवति स्थाने[13] शब्द उच्चारिते तत्सदृशं शब्दान्तरमिहोपलभ्यते । बुद्धयो हि अनवस्थिताकाराः प्रवर्तन्त एवेति ।

## आकाशदेशा अपि बहवः ।

इदं त्वयोक्तं—"नहि एको देवदत्तो युग(प)त्स्रुघ्ने[14] च भवति" । अत्र ब्रूमः—पृथिव्या एकत्वात्तदिह यो देवदत्तः कस्मान्न स्रुघ्नः कस्मिंश्चिन्मथुरेति (?) एवमाकाशस्याप्येकदेशत्वे सति देशबहु (त्व) व्यवहारः प्रवर्तिष्यते । ननु च पृथिवी [15]स्वैरवयवैरारब्धेति[16] तत्रावयवा देशत्वेन युक्ताः, अनारब्धं च पुनराकाशम् ? [17]सत्यमेवमेतत् । ते[18] त्ववयवा अतदात्मानः सन्तः समवायित्वात् व्यपदिश्यन्ते, एवं किं न गृह्यते वृक्षादिभिः संयोगादिहाकाशमिहाकाशमिति व्यपदिश्यते एतावांस्तु विशेषः, समवायिनो देशाः [19]वस्तुसंप्रमोहहेतुना समवायेनैकात्म्यमिव नीताः; आतश्च नीता यदनित्यत्वमपि केचित् प्रतिपन्ना[20]; अवयवावयविनोः देशव्यवहारे तु नास्ति कश्चित्प्रतिविशेषः । तस्मात् देश[21]बहुत्वात् [22]स्थितो हेतुः, युगपद्देश-[23] पृथक्त्वदर्शनादान्यभाव्यमकारस्येति ।

## आकृतिग्रहणात्[24] सिद्धम् ॥ वा ॥

प्रत्याहारेऽनुवृत्ति[25]निर्देशे च जातिरेव [26]चोद्यते, न व्यक्तिः । व्यक्त्युपादानं तु, यथा नालिकेन द्वीपनिवासिनः इदमुपदिश्यन्ते[27], अयं गौः, एष त्वया न पदा [28]स्प्रष्टव्य इति, स तं बालं[29] कृष्णां कृशं चोपदिष्टो[30] वृद्धं शबलं[31] स्थूलमपि न स्पृशति[32] । तस्यास्त्वाकृतेर्न व्यवधानं, व्यवच्छेदो

---

[1] Ms-ग्रा- [2] Ms-निगृह्यते [3] Ms ध्वनिरावृज्य- [4] Ms-भ.
[5] Ms-भिरभिर- [6] Ms-कदश- [7] Ms-य
[8] Ms व्यपदेव्यपदेशः [9] Ms दूरें- [10] Ms-स्सनि-
[11] Ms ये [12] Ms त [13] Ms स्तान- [14] Ms-त्स्रुघे
[15] Ms सेर- [16] Ms-ब्धेभि [17] Ms सव्यमेवमेव तत्
[18] Ms ने- [19] Ms वक्तु [20] Ms दतियन्ना
[21] Ms-वहु [22] Ms स्थे- [23] Ms-पदेश
[24] Ms-णात्तु [25] Ms-रेतु निवृत्ति- [26] Ms चोद्यं-
[27] Ms-श्यते [28] Ms स्पृष्ट- [29] Ms बलं
[30] Ms-ष्टा [31] Ms शवतं [32] Ms-शन्ति

(वा)। विवृतत्वं, ये चान्ये धर्माः, सर्वे ते व्यक्तिद्वारकाः। तत्र प्रत्याहारे विवृताकृति[1]रुपदिष्टा, तस्या एव च शास्त्रान्ते प्रत्यापत्तिरिति सर्वं सिद्धम्[2]। अत्र [3]त्वाकारग्रहणे जातिनिर्देशादकारग्रहणं [4]प्राप्नोति। तत्तु न च[5] प्राप्नोति, प्रयत्नभेदात्; यथा पूर्ववया[6] ब्राह्मणः प्रत्युत्थेयः। प्लुतस्य तु
५ प्राप्नोति ? तत्रापि परिहारः, "[7]प्लुतश्च विषये स्मृतः" (वा ६· १· ८७) इति।

## तद्वच्च तपरकरणम् ॥ वा ॥

तथा च तपरकरणमित्येतदुक्तं भवति तद्वच्चेति (?)

## (सवर्ण)ग्रहणेनातिप्रसक्तमिति

प्रत्याख्यातेऽपि हि योगे तपरकरणं संगृह्यत एव; किं व्यक्तौ पदार्थे
१० प्रापकं अथवाकृतौ निवर्तकमिति ? अतो यथैव [8]आकृतिग्रहणे प्रत्याख्यानं तथैव तपरेष्वप्याकृते[9]र्ग्रहणमिति।

## हलग्रहणेषु च ॥ वा ॥

तत्र ग्रहण(क)शास्त्रस्याव्यापारः; व्यक्तिनिर्देशकस्तकारो निर्दिष्टः। प्रत्याहारे तत्रत्यानुकरणं, एकस्यासौ स्यात्पूर्वस्य परस्य च। तत्र "[10]झलो
१५ झलि" (सू· ८· २· २६) इति पूर्वपराश्रयो लोपो न स्यात्। क्व तर्हि स्यात् ? यत्र भिन्नरूपौ झलौ[11], अबुद्ध अबुद्धा[12] इति। आकृतिनिर्देशे तु तकाराकृते(:) निर्देशात् सिद्धो लोपः।

## रूपसामान्याद्वा ॥ वा ॥

कथमयं परिहारः ? तत्र केचित् वर्णयन्ति—यद्यप्याकृतिर्नैव स्यादेव-
२० मपि न दोषः। यथा कार्षापणादिषु सत्यां जातौ [12]न च तावत् मधारा कार्षपणसस्त्यथ[13]वार्थवस्त्वेव तत्तथाभूतं यत् तत्वाव्यवाये भवति एवं च तावत् शब्दाकृतिरिति(?)। इह भवन्तस्त्वाहुः—आकृतेरेव[14], 'रूपसामान्यात्सिद्धम्' इत्येवमयमुपात्त इति तत्रैतत् स्यात् वक्तुं[15] तदाकृतिग्रहणात्तु सिद्ध इति। तच्च न। पूर्वमेवमुक्तं—आकृतिः शब्देनाभिधीयत इति; तत्राकृतेश्चो[16]द्यमानत्वात्
२५ सिद्धम्। इदानीं [17]तु व्यक्तीनां चोद्यमानत्वात्[18] यद्यपि व्यक्तय उपदिश्यन्ते नाकृतिरुपदिश्यते, एवमपि सिद्धम्। कथम् ? इदं तावदयं प्रष्टव्यः—यदेतदन्यत्त्वं किमेतदुच्चारणात्[19] शब्दस्य, अकारादयं[20] इकारोऽन्य इति; अथ

---

[1] Ms-तुप-
[2] Ms सर्वेसिद्धां
[3] Ms तूका-
[4] Ms प्र
[5] Ms तंतुनभ
[6] Ms-पूर्वं यथा
[7] Ms प्लुत एव विषय:
[8] Ms प्राकृ-
[9] Ms-ष्वव्याकृति-
[10] Ms ऊलो ऊलि
[11] Ms ऊलौ
[12] Ms भवतावत्
[13] Ms-चार्य-
[14] Ms-रेवं.
[15] Ms कक्तुं
[16] Ms-श्चा-
[17] Ms तु यद्यव्य-
[18] Ms-त् सिद्धमिदानीं तु यद्य-
[19] Ms-त
[20] Ms-दय

विशेषात्[1], कस्माच्चित् ? विशेषादित्याह; स एवायमिति चान्य[2] इति च(?) तत्त्वान्यत्त्वे निमित्तात्[3] कस्माच्चित्[4] (त)दार्थः प्रतिपद्यते (?) एवं चेत् किमर्थमाकारस्य भवान् विशेषादन्यत्त्वं प्रतिपद्यते, न पुनः सामान्यात्स एवायमिति[5] ? स्यान्मतम्। [6]लोके भेदेनैव व्यवहारो [7]नाभेदेनेति। एतच्च
५ न। अभेदेनापि लोके व्यवहार इति।

**तानेव शाटकान्[8] आच्छादयाम इति।**

तस्मादाकृतिरनभिधी[9]यमानापि अस्ति (?) तस्य प्रत्यापत्तौ निमित्तमिति एतदाचष्टे।

## ॥ ऋलृक् ॥

१० **किं विशेषेण लृकारोपदेशश्चोद्यते ?**

उक्तं हि प्रयोजनं सर्व(व)र्णोपदेशे[10] (अ)विशेषेण [11]अतस्तदेवास्य प्रयोजनं भवितुमर्हति। अथवा "विशेषेण[12]" वैधर्म्येणेति। अन्ये हि वर्णा अन्येन प्रकारेण चोद्यन्ते। अकारो [13]विवृतत्वेन, रेफहकारौ [14]पूर्वपरोपदेशेन, (अं)तस्था[15] [16]अण्सूपदेशेन, अयं तु विशेषेणोच्यत इति।

१५ **अल्पीयांश्च[17] प्रयोगविषय इति।**

एतदाचष्टे—वर्णानामु[18](प)देश(:)शास्त्रप्रवृत्त्यर्थः शास्त्रं च प्रयोगार्थम्[19], स च प्रयोगो नास्ति लृकारस्येति। अल्पीयो नित्यवर्णविषय प्रकर्ष (?) (ऋ)कारस्याल्प(:) प्रयोगविषयः तस्मादल्पतरोऽस्येति। स्यादेतत्, योऽसौ प्रयोगविषयस्तदर्थ उपदेशः कर्तव्य इत्यत इदमाह—

२० **यश्चापि प्रयोगविषयः सोऽपि [20]कृत्(पि)स्थ(स्यैव) स्यात्।**
**कृपेश्च लत्वमसिद्धम्।**

तत्र यान्यच्कार्याणि उदात्तादीनि, तानि ऋकारावि(स्था)यामेव[21] लब्धानि।

**नार्थ[22] लृकारोपदे(शे)न।**

२५ **यदृच्छाशक्तिजानुकर[23](ण)मुत्या(द्य)र्थः॥ वा ॥**

---

[1] Ms विषंशेषा- [2] Ms वान्य [3] Ms-त्तात
[4] Ms-चित्- [5] Ms-त्समवाय [6] Ms लोकभेदे
[7] Ms-न्यभेदे [8] Ms शछा [9] Ms-धा-
[10] Ms-पदश- [11] Ms-मत- [12] Ms-षण
[13] Ms-पिवृत- [14] Ms पूर्वयोरापादशे- [15] Ms-तस्या [16] Ms अथस्तूप-
[17] Ms Edn-श्चैव [18] Ms-नाम- [19] Ms-गाहं [20] Ms कस्य; Edn. omit स्यात्
[21] Ms-मामेव [22] Ms ऋकारोपदन् [23] Ms-कष-

यदुक्तं, प्रयोगार्थं[1] शास्त्रं, न च प्रयोगे लृकारो विनिवेशितस्वरूपो विद्यत इति; यदृच्छादिषु अस्ति लृकारप्रयोगः। यदृच्छा नाम या असति प्रवृत्तिनिमित्ते अर्थगतं प्रवर्तकं (निवर्तकं) वा नियमहेतुमन्तरेण[2] प्रवर्तते निवर्तते वा सा यदृच्छा। डित्थशब्दो हि स्वरूपमात्रनिबन्धनो यत्र यत्र प्रयुज्यते, इदं तावदस्य नामधेयं करोमीति, तत्र तत्र, [3]निवर्तते। स्वरूपमात्रनिबन्धनानां च शब्दानां तस्य स्वरूपस्य रूपान्तरेण प्रत्या(य)यितुमशक्यत्वात् नास्ति निवर्तकं शब्दान्तरम्। तत्र लृतक[4]शब्दो नामधेयत्वेन नियुज्यमानोऽनपेक्षित[5]बाह्यनिमित्तोऽसति निवर्तके[6] शब्दान्तरे [7]स्वरूपनिबन्धनः साधुः, स किमिति न प्रयुज्यते? तस्मात्[8] लृकार एवाशब्दस्य(?) प्रयोगादृच्कार्यप्रसिद्ध्यर्थम् कर्तव्य उपदेशः; यदि तन्नास्ति "ऋकारलृकारयोः सवर्णविधिः" (वा. १.१.९) इति। [9]सति हि तस्मिन् ऋकार[10] एव [11]अच्कार्यं प्रतिपद्यते।

## चतुष्टयी शब्दानां प्रवृत्तिरिति।

अनेनैतत्कथयति—केचित् शब्दा नियतार्थाः पर्यायास्तेषां शब्दानां नियताः अनुत्पाद्याः, पुरुषेण कर्तुरस्म(र)णात्[12]। अस्ति तु संशग्रामो (?) यो नामधेयत्वेन नियुज्यमानः कस्मिंश्चिदर्थे अनियतः [13]पौरुषे(ये)ण व्यापारेण नियुज्यते। तत्र जातिशब्दो यदा जातौ प्रवर्तते तदापेक्षितनिमित्तव[14]त्वाच्छक्यते वक्तुं[15] यदृच्छा स[16] शब्द इति। अन्यान्यता [17]पौरुषेयां प्रवृत्तिः यथा जातेरस्तित्वमतेन यावतरवैते न तत्र शक्यते पुरुषेण प्रयासः स्रष्टुमित्येव विशेषः (?) यदा तु द्रव्ये निमित्तापेक्षया प्रवर्तते तदापि [18]जातिशब्दः। यदा [19]त्वभिधेयं द्रव्यमस्य, द्रव्यशब्दः। एवं गुणशब्दोऽपि; शुक्लादिर्गुण-[20] शब्दः, (गुण)सामान्ये यदृच्छाशब्दः गुणनिमित्तापेक्षया जातिशब्दः, गुणाभिधायित्वात्[21] गुणशब्दः[22]। एवं क्रियाशब्दः क्रियासामान्ये यदृच्छाशब्दः, क्रियार्या जातिशब्दः क्रियाशब्दो वा। यावति च शब्दे[23] क्रियानुषंगोऽस्ति सर्वस्य क्रियाशब्दत्वं कृ(दं)तेषु तिङन्तेषु। अन्ये मन्यन्ते—जातिप्रत्यासादेव तेऽर्था(:) ताच्छब्द्यं[24] प्रतिलभन्त इति। अपरे मन्यन्ते—यदृच्छाशब्दा एवामी जात्यादयस्तु केवलं भेदिका इति। अतस्तिसृषु शब्द(प्र)वृत्तिषु नियतशब्दत्वं नियतार्थत्वं च। चतुर्थ्यां तु शब्दप्रवृत्तावस्ति पौरुषेयत्वमिति।

---

[1] Ms-गाथ
[2] Ms-मत रेण
[3] Ms निवर्तात
[4] Ms-का-
[5] Ms-वाह्य-
[6] Ms-कं
[7] Ms-स्यरू-
[8] Ms-त
[9] Ms सत
[10] Ms-ऋकारार
[11] Ms दच्का-
[12] Ms-णोत्रा
[13] Ms पो-
[14] Ms-त्ता-
[15] Ms वक्तु
[16] Ms सं
[17] Ms पो-
[18] Ms जति शब्दः-
[19] Ms-त्र-
[20] Ms-ण:
[21] Ms-यितत्
[22] Ms-शब्दः एवं द्रव्ये···गणशब्द
[23] शब्द-
[24] Ms च्छब्दां

## अशक्तिजानुकरणार्थ इति ।

अथामुकः कः कल्पते (?) यदृच्छाशब्दस्तावन्न भवति नियतप्रयोगत्वात् । तस्माज्जातिशब्दोऽयं, अनुक्रियमाणे या जातिः तया[1]संबन्ध लृतकमाह (?) यथा घट इति घटशब्दो घटत्वविशिष्टमर्थम् ब्रुवन् जातिशब्द इत्युच्यत एवं [2]लृत(क)शब्दो नान्येनानुकरणेन शक्यते प्रत्याययितुमि[3]त्यनिवर्तितं शब्दान्तरेण [4]ऋकारस्येद(म)नुकरणमिति ।

## प्लुत्याद्यर्थः (च) ।

प्लुतिस्वरितद्विर्वचनेषु लत्वस्य[5] सिद्धत्वात् क्लृपिस्थ लृकार उपदेशं प्रयोजयतीति ।

## [6]न्याय्यभावात् कल्पनं संज्ञादिषु ॥ वा ॥

न्याय्योऽस्ति [7]ऋतकशब्दः । कथं पुनरस्य न्याय्यत्वम् ? शिष्टप्रयोगात् । यथैव जात्यादिषु शब्दे(ष्व)विच्छिन्नपारंपर्योपदेशेन एतावन्त[8] एवामी शब्दा [9]इत्येवमिदमपि [10]अविच्छिन्नं, यदृच्छाशब्दा अप्येवं[11]रूपा एवेति । तत्र यथैव जात्यादिषु न स्वयमुत्पाद्यन्ते[12] शब्दा एवं[13] यदृच्छाशब्देष्वपि । नहि शक्यं काकवासितं हंसवासितं वास्य नामधेयं करोमीति । तथापि (अ)यं नाम कर्तुं[14] (शक्यः) शिष्टेनाचरितत्वात् ।

## [15]संज्ञादिष्विति ।

आदिशब्दः [16]प्रकारे । के पुनः संज्ञाप्रकाराः ? या अप्येता गोष्ठीविषया म्लेच्छा उत्पाद्यन्ते, एता अपि न स्वय[17]मुत्पाद्य कर्तव्या इति । अथवा

## सं(ज्ञा)दिष्विति ।

या एता जातिगुणक्रियानिमित्ताः संज्ञाः सर्वासामेवासां यदृच्छाशब्दा एवादिभूताः । नहि अनपेक्षितनिमित्तांतरा अर्थेषु विनिवेशं[18]कुर्वन्ति । अतः संज्ञानामादिभूतेषु यदृच्छाशब्देषु न्याय्यो यः स कल्पयितव्यः ।

## अपर[19] आहेति ।

## अनेनैतत्प्रतिपादयति [20] ।

---

[1] Ms तथा
[2] Ms-च्यन्त सव
[3] Ms-त्यंनिर्वर्ततं
[4] Ms ऋकारवदनुकरेण-
[5] Ms-स्या-
[6] Ms न्यायाभा-
[7] Ms कृतक-
[8] Ms-तावंत
[9] Ms इत्येयमि-
[10] Ms अवच्छि-
[11] Ms-व-
[12] Ms-द्येते
[13] Ms एवं
[14] Ms कर्तु
[15] Ms शब्दादि-
[16] Ms आकारोंका: पुनः
[17] Ms-नुत्पाद्य
[18] Ms-त्वेत् ।
[19] Ms रं आहान्यने
[20] Ms दयंते

अस्मिन्नर्थे सनिबन्धनापि स्मृतिरस्ति। तत्र शास्त्रसमयादपि [1]प्रतिपद्यामहे, एवंभूता शिष्टानां प्रवृत्तिरिति। [2]ए(त)दुक्तं भवति—यत्र प्रसिद्धिरस्ति तस्योपादानं, न त्वस्तित्वमात्रादेव प्रतिपत्तिः युक्ता[3]। न सन्त्येव शब्दा [4]लुतकादय इत्यतस्ते (न) प्रयोक्तव्याः। शिष्टाश्च प्रसिद्धिं शास्त्रं[5] चापेक्षन्ते। भवानुभयं[6] निरस्यास्तित्वमात्र[7]निबन्धन एवेति। आतश्चैवं यदव्यक्तानुकरणं व्यक्तेना[8]नुकुर्वन्ति शिष्टाः, पटपटायतीति[9]; न तथाभूतेन शब्देनेति।

**अयं तर्हि यदृच्छाशब्दोऽपरिहार्य इति।**

अस्येदमुत्तरं, यदुच्यते "शास्त्रान्वितोऽस्ति ऋतकशब्द" इति। अयं ह्यन्ते निष्ठायां(?)[10]क्वुनि चान्वाख्यातः ऋतीयते वा इति ऋतक इति। न चैवं [11]ऋफिडः ऋफिड्डश्चान्वाख्यातः, तस्मादयमप्यस्ति, [12]लृफिड लृफिड्डश्चेति।

**एषोऽपि [13]हि (ऋफिड) ऋफिड्डः (च) इति।**
**अ(र्ति)प्रवृत्तिश्चैव हि लोके[14] लक्ष्यते।**

ऋतकादिष्वर्तिरेव[15] धातुपाठ उपदिश्यते, न [16]लृकारः। शक्येते च फिडफिड्डौ[17] प्रत्ययौ कल्पयितुं, "प्रत्ययतः प्रकृतेश्च तदूह्यम्" (वा. ३. ३. १.) इति। अथवार्तिप्रवृत्तिरिति। [18]अर्तेश्चैव विकृतापभ्रष्टा प्रवृत्तिर्लक्ष्यते[19]। लोके चश्चलो(?)गन्धर्व लृफिड[20] इत्युच्यत इति। एवं हि[21] वर्णयन्ति—एवं चैतदथवा अत्राप्ययं पर्यनुयोगः—न शिष्टा लुतकमेव[22] प्रयुंजते। [23]किं तर्हि? ऋतकमपि[24] प्रयुंजते; लृफिड्ड[25] इत्येवंभूतनामधेयं[26](न) कर्तव्यमित्येतद्दर्शन(म्)। [27]दृष्टार्था हि एषा स्मृतिःहं सतद्धक्षणादिवत्। दृश्यतेस्त्यरोधावेषा कृता स्मरण धद्यताति(?) शिष्टास्तु म्लेच्छनामधेयवदपभ्रंशं[28] नाभिमन्यन्त इति। एवं[29] प्रत्याख्याय यदृच्छाशब्दार्थतामशक्तिजानुकरणार्थतामपि प्रत्याचष्टे—

**[30]अनुकरणं शिष्टा(शिष्टाप्र)तिषि(द्धे)षु ॥ वा ॥**

---

[1] Ms प्रतिपादाभ्यामहे
[2] Ms यदुक्तं
[3] Ms-युंक्ता
[4] Ms ऋत-
[5] Ms-सिद्धां शस्तं
[6] Ms भवारूभयं
[7] Ms-त्रा
[8] Ms-र्ना-
[9] Ms तीभि
[10] Ms कति
[11] Ms लृफिड्ड लृफिड्ड-
[12] Ms ऋफिड्ड ऋफिड्ड
[13] Edn. omit हि
[14] Ms को
[15] Ms ष्वंतिरेव
[16] Ms ऋका-
[17] Ms फिडडफिडडौ
[18] Ms अत्ते-
[19] Ms त्तिर्वक्ष्यते
[20] Ms लृपिदुं
[21] Ms हु.
[22] Ms मेवं.
[23] Ms एवं तर्हि
[24] Ms कर्मपि
[25] Ms लृफिदुर्शपभू
[26] Ms धेर्यं
[27] Ms दृष्टोप्योह्मिषा स्मृतिः हंसतल्लक्ष-
[28] Ms पभूतं
[29] Ms एव.
[30] Ms अनुचतणं

यद्विहितं, यद्वा न विहितं न [1]प्रतिषिद्धं, तदेवानुक्रियते[2] शिष्टैः। यत्तु न प्रतिषिद्धं[3] तदन्येन कृतमित्यनु[4]क्रियते। अपशब्दस्तु दुष्टस्तस्यानुकरणं न कर्तव्यम्। यो वानुक्रियते[5] योनु(?)यद्यप्यर्थोऽपि (लौ)किक[6] स्तथापि शब्दानां लौकिकत्वात् लोक इत्युच्यते इदं तु

५ **विश्वजितः[7] सत्रायणयासते**

इति वेदे च पठ्यते[8]।

**विषम[9] उपन्यासः।**

एतदुक्तं भवति—नानुकरणात् धर्मोऽधर्मो वा। किं तर्हि[10]? त्यागादनुष्ठानाद्वा। शक्यं चैतदुक्तुम्—अनुक[11]रणमेवैतन्न भवतीति। यत्र १० हि अनुकृतमात्रं काचि(त्) क्रिया सादृश्या[12] दृश्यते (?) तदनुकरणं भवतीत्येतत् दर्शयति—

**यस्तु [13]खल्वेवमसाविति। स्नातानुलिप्त इति**

इदं स्वास्थ्योपलक्षणं[14] [15]अशास्त्रं न हि (किं)चित्[16] कार्यमारभ्यते[17]।

**[18]माल्यगुणकण्ठ इति**

१५ [19]प्रकाशोपलक्षणम्। सुरां [20]हि इह पिबन् ब्राह्मणः प्रच्छन्नं पिबेत्, अयं तु [21]माल्यगुणकण्ठ इति। यद्यपि मद्यपानांशकालाव एवमप्यत्र नृदच्छेदः परं च केनचित् सदृशामनुकरणत्वेन चात्र दोषो भवति(?) ब्रुवन्ति हि शिष्टा [22]एवंभूतमनुकरणं। यदि ब्राह्मण्या लूतक[23] शब्दमर्थपदार्थकमुच्चारितमर्थपदार्थकत्वेनानु[24]कुर्वन् प्रयुंजते,[25] स्यात्प्रत्यवायः। यतस्तु[26] २० शब्दपदार्थकं प्रयुंक्ते तस्मात्पयःपानवदिदमपि न दोषायेति।

**अपशब्द इत्यपि[27] तस्यापशब्दः स्यात्।**

अस्य हि यावन्तोऽसाधवः गाव्यादयः स त एवास्याः(?) अतोऽर्थभेदेन[28] नास्त्यपशब्दत्वम्। यथा [29]गोणीशब्दस्य आवपने साधुत्वं सास्नादिमत्यसाधुत्वम्। स्यादेतत्। अपशब्द इत्ययमन्वाख्यातत्वात् २५ साधुरिति, अयमन्वाख्यातः, अर्थवत्प्रातिपदिकमिति।

---

[1] Ms प्राति- [2] Ms नुत्रियतौ [3] Ms द्धं न त- [4] Ms त्यत्र
[5] Ms तै [6] Ms र्थो विहिक [7] Edn. सृजः
[8] Ms पद्यते [9] Ms तुप [10] Ms कितहि
[11] Ms नुरणक [12] Ms दृश्शा [13] Ms खल्विदम-
[14] Ms स्वाल्पोप- [15] Ms अछास्त्र [16] Ms-चितै [17] Ms-मालभ्यते
[18] Ms माला- [19] Ms प्राकाम्यो- [20] Ms ति। रह [21] Ms माला
[22] Ms एव [23] Ms-ह्मणेत्ततक [24] Ms-कं स्वेवानु- [25] Ms-युंजातः
[26] Ms यतः स्तु [27] Edn इत्येव [28] Ms-अतोप्यभोदानां [29] Ms-गोणे-

**अयं खल्वपि भूयः ।**

कोऽस्य विशेषः ? उच्यते—एतदप्यत्र [1]नास्त्येवासाधोरयमनुकरण इति ।

**यदि क्लृपि[2](स्थ)स्येति ।**

५ एतदुक्तं[3] भवति—

[4]आदावेवात्र प्रतिविहितमिति । यः प्रयोगे [5]विद्यते सोऽयं; न च प्रयोग इदमस्ति "पूर्वत्रासिद्धम्" (सू. ८. २. १) इत्याह—

**भवेत्तदर्थेन[6] नार्थ(:) स्यात्, अयं त्वन्यः क्लृपिस्थपदार्थक इति । प्रकृतिवदनुकरणं भवतीति[7] ।**

१० सत्यपि वचने क्वचिदियं परिभाषा न प्रवर्तते । यदा त्व(ब)यवस्य रूपतामाश्रित्य नार्थरूपतामनुकरोति तदा धातुरूपेणाश्रितत्वात् प्रकृतावेवासौ धर्मो दृष्ट[8] इति तत्कृतं कार्यं न भवति । यथा "विपराभ्यां जेः" (सू. १. ३. १९) इति इयङादेशो (न) भवति[9] (प्र)कृतः । यदार्थरूपतामाश्रयते तदा धात्वनुकरण इति प्रकृतौ [10]दृष्टमियङादेशं प्रतिपद्यते "परिव्यवेभ्यः
१५ क्रियः" (सू. १. ३. १८) इति ।

**द्वि(:)[11]पचन्त्वित्याहेति ।**

[12]अयं च तिङ् न भवति, साधनाभिधायित्वाद्धि तिङः[13] । एवमग्नी ज्वालितौ[14] इत्युक्तं, तमनुकरोति [15]अग्नी इत्ययमाहेति; तत्र द्वयोरर्थयोर्वा [16]एकाभिव्यंजकस्य वा द्विवचनम् नान्य[17]स्येति । अत्र त्विदमस्ति[18]
२० वक्तव्यम्, गम्लृ सृप्लृ मुच्लृ[19] इत्येतेष्ववस्थितोऽनुक्रियते, साधु लृकारमधीत इति, तदा नास्त्येतत्प्रकृतिवदनुकरणम् । अथ मन्यसे,[20] क्लृपिश्चायं[21] धात्वादिष्वनुषक्त इति ऋतकेऽपि[22] क्लृपिस्थ एवेति तुल्यं, तत्रैवं ब्रुवतै[23]तदुक्तं भवति—अट्प्रभृतिष्वेकरनुकारो वा संवक्तव्य—इति ष्टदिति लृति[24] (लृ)वाव(च)नं अनेन [25]हीत्संज्ञा भविष्यति(?) ।

२५ **यदि प्रकृतिवदनुकरणं भवति, अपशब्द एवासौ[26] भवति, ब्राह्मण्यलृतक इत्याहेति ।**

---

[1] Ms नास्त्यवसाधारयणम- [2] Ms क्लृपिः । स्येद्येत- [3] Ms-दुक्त
[4] Ms आदारव वा [5] Ms-विद्यति यो यन्न [6] Ms भरवत्त- [7] Ms-वनाति
[8] Ms नष्टे [9] Ms-वत [10] Ms इष्ट- [11] Ms-पचत्वि-
[12] Ms अर्थवति ङ [13] Ms-यिनाद्विति ङः [14] Ms-लित [15] Ms अग्नामित्य
[16] Ms वेका- [17] Ms-नसनोन्य [18] Ms विदमास्त [19] Ms मुच्लृष्ट इ-
[20] Ms-स [21] Ms-श्यायं [22] Ms-केति [23] Ms-ते
[24] Ms नृति [25] Ms-यीत्सं- [26] Msएवस्तो

अनुकरणस्य प्रकृतिरर्थ[1]पदार्थकोऽसावपशब्दः [3]प्रकृतेश्च धर्मान् अनुकरणशब्दो[3] लभत इत्यपशब्दत्वमायातं, अपशब्दश्च न प्रयोक्तव्य[4] इति। शब्द(विद्)व्यवहारः[5] ततः प्रकृतिवदनुकरणं भवतीति प्रामाणिका या प्रकृतिरुपदिश्यते सा[6] प्रकृतित्वेनाश्रीयते यथा "स्थानिवदादेश" (सू. १. १. ५६) इति शास्त्रे यः स्थानी स[7] आश्रीयते। न च व्याकरणे अपशब्द इत्येव कश्चित् ट(?)प्रकृतौ उपदिश्यते साधूनामन्वाख्यानादप्यनुमानात् अपशब्दः इत्येवमन्वाख्यायते। न च सामर्थ्यगृहीता प्रकृतिर्भवितुमर्हतीति[8]। अथवा "प्रकृतिवदिति" [9]शास्त्रपूर्वकं कार्यमतिदिश्यते। न चापशब्दे[10] शास्त्रपूर्वकं[11] किंचित्कार्यमस्ति। नहि शक्यं व्याकरणेनापशब्द[12]त्वमन्वाख्यातुम्। यदपि च कार्ययोगि शब्दरूपं तस्मिन्नपि न शक्यमपशब्दत्वमतिदेष्टुम्। तस्मात्प्रकृत्यभावात् तत् तद्विवयस्यव धर्मस्य शास्त्रेणाना[13]श्रितत्वात्(?) अनुकरणे चातिदेष्टु[14]मशक्यत्वादिदमुच्यते, अपशब्दानुकरणोऽपि नापशब्दः इति। एवम(व) [15]स्थितोऽशक्तिजानुकरणार्थ[16] लृकारोपदेशः। अपरे प्रत्या(ख्या)त एवेति वर्णयन्ति। "अपशब्द एवासौ भवति", यस्मात् "अपशब्दो हि अस्य प्रकृति"(:), न [17]चापशब्दः प्रयोजनं भवितुमर्हति (इति) [18]वाक्यशेष(:)। कुत एतदिति। इतर आह—

**तस्मान्नञप[19]शब्दा उपदिश्यन्त इति। न [20]चानुपदिष्टा प्रकृतिरस्ति।**

यणाद्वनामिति(?) वाक्यशेषः।

**एकदेशविकृतस्यानन्यत्वात् प्लुत्यादयः ॥वा॥**

नात्र गृहीतव्यमादेशग्रहणादिति। [21]एवं हि विज्ञायमाने अल्विधिरयमिति [22]प्लुतिर्नस्यात्; तस्माल्लोक[23]प्रवृत्तिरेवाश्रीयते। ननु च लोके जात्यनुषंगात् शुनि[24] संप्रत्ययः? इहाप्यस्ति जात्यनु(षं)गः। यदा [25]च 'ऋकारलृकारयोः [26]सवर्णविधिः" (वा. १. १. ९), आकृतिग्रहणाच्च ग्रहणकशास्त्रं प्रत्याख्यायते तदा सत्यपि श्रुतिभेदे एकाकृतित्वमेव, यथा ह्रस्व[27]दीर्घयोरिति।

**राज्ञः क चेति[28], अल्लोपोऽन (इतिलोपः) [29a]स्यात्।**

---

[1] Ms-यदार्थाकासावाप [2] Ms प्रकृताश्वध- [3] Msअनक-
[4] Ms प्रयुक्तव्य [5] Ms-व्यविहारः [6] Ms स
[7] Ms-य [8] Ms-महतीति [9] Ms-शास्त्रं
[10] Ms-ब्देकिंचित् [11] Ms-स्त्रप्रवर्तकं [12] Ms-ब्दे- [13] Ms-मा-
[14] Ms-ष्ट- [15] Ms-स्वितो [16] Ms-णाय [17] Ms-वाप
[18] Ms वाक्य-शष [19] Ms-न्नायमप- [20] Ms यानु- [21] Ms एनं
[22] Ms प्लाति- [23] Ms-कं [24] Ms श्वनि-
[25] Ms वरकादयो रत्कारयो [26] Ms सवस्य विधि [27] Ms-दीघाया
[28] Ms राकृका यासिति [29] Edn. प्राप्नोति

एवं मन्यते – कस्यचित् धर्मस्य भावानुषंगात् स्मृत्यनुषंग इति[1](?) स एवायमिति प्रवर्तते बुद्धिः। तत्र ककारे[2] कृते ककारानुषंगात् स्मृत्यनुषंग इति संप्रति वचनमारभते—

**षष्ठीनिर्दि[3]ष्टस्येति ।**

५ यस्य विकारकाले षष्ठीनिर्देशः तस्यानन्यत्वं, अत्र च ककारविधानकाले राज्ञः षष्ठी,[4] न अन इति राजाशब्द स्यात् नशब्दः (?)।

**क्लृप्तशिख इत्यत्र [5]प्लुतो न प्राप्नोति। नह्यत्र [6]ऋकारः [7]षष्ठीनिर्दिष्टः। कस्तर्हि ? रेफः।**

तेन[8] प्लुते नास्त्यनन्यत्वम्।

१० **ऋकारोऽप्यत्र [9]षष्ठीनिर्दिष्टः।**

(ङ)सोऽत्रा[10]निर्देशः "सुपां सुलुक्" (सू. ७. १. ३९) इति। उरिति च संबन्धमात्रमाश्रीयते। स कदाचित् साक्षादवयवं रेफं विशिनष्टि, [11]क्लृप्तादिषु। संबद्धसंबन्धाच्च[12] कल्पकारा[13]दिषु।

**[14]नकारान्तग्रहणमिति ।**

१५ राजकीये नान्तत्वं[15] नास्ति, नहि श्वा पुच्छे छिन्ने पुच्छवानिति व्यपदिश्यते।

**इह तर्हि क्लृप्तशिखः "अनृत" इति प्रतिषेधः प्राप्नोति।**

ऋकारो यथैकदेशविकृत इति।

**अरवत इति वक्ष्यामि ।**

२० ननु च (न) मतुपात्र भवितव्यम् ? उच्यते—विशिष्टार्थप्रतिपत्त्यर्थे मतुप्[16]उपादीयते। अरवत इत्यस्य (वर्त)माने वर्तकेत्यत्रापि प्रतिषेधः स्यात्, अस्यापि रेफोऽस्तीति समीपे[17]। तस्मात् अवय(व)त्वेन[18] तद्वत्ता प्रदृश्यते,[19] यथा विषाणी[20]त्यत्र द्विदमुच्यते[21](?)। बहुव्रीहिरप्यनन्तरादिषु प्रतिषिद्धस्तस्मात् "सर्ववीजी[22]सर्वकेशी" इत्यत्र प्रक्षेप्तव्यः।

---

[1] Ms-पंगाग्रिति [2] Ms-रे क्षते [3] Ms-दि-
[4] Ms षष्ट्या [5] Edn. omit अत्र [6] Ms लृकारस्य
[7] Ms-षष्टचा [8] Ms तन [9] Ms-षष्टचा
[10] Ms सोरत्रा [11] Ms कृ- [12] Ms सबधसंबद्धाच्च
[13] Ms-दि श्रु [14] Ms च कारात् ग्रह [15] Ms-न्नत्व
[16] Ms मृतुप् [17] Ms समापे [18] Ms-नेन [19] Ms-श्येते
[20] Ms- ण- [21] Ms-च्याते [22] Ms सवबाजा; cf MB. II. 1. 69

## स एष सूत्रभेदेन ।

एतदुक्तं भवति—अन्यार्थोऽयमन्य [1]उपदेष्टव्य इति ।

## सैषा (महतो) वंशस्तंबादिति[2] ।

रूपस्य साम्यात् तया क्रियया [3]साम्यमस्येति(?) ।

## ॥ ऐ ओ ड् ॥ ऐ औच् ॥

उपदिश्यमानता[4] तपरातपरविषया सन्ध्यक्षराणां भाष्यवाक्येनोच्यते[5] । तस्याश्चासत्त्वभूतत्वात्[6] इदमा संबन्धस्यानु[7]पपत्तिः । नैष दोषः । यो हि शब्दोपादानस्स[8] तथाभूतेन शब्देनोच्यमानः [9]संबद्धुमशक्यो, यथा पचत्ययमिति[10] । यदा वस्तुरूपं बुद्धावुपस्थापयति तदा सर्वोऽर्थो विद्यत आत्मरूपेणेति किमिति [11]न संभन्त्स्यते पचतिस्तस्यापत्यमिति, स एव वाक्यार्थो सत्वभूतोऽयमर्थ इत्यसत्त्वशब्देनोच्यमानः सत्वभूत उच्यते(?) । न यावदेवमाप्रातदिशश्यते(?) । एवमिहामि वाक्यार्थोपाश्रितशब्दोपादानः आत्मरूपे अवस्थित इदमा[12] संबध्यते ।

## कश्चात्र विशेषः ?

कार्यगतं विशेषं पृच्छति—किं क्रियमाणेषु तपरेषु लभ्यते, अक्रियमाणेषु चेति ।

## सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम् ॥ वा ॥

कथं[13] वाचोयुक्तिः, तपरोपदेशश्चेत्तपरोच्चारणमिति,यावता "[14]दिशिरुच्चारणक्रिय"(भा. पस्पशा) इत्युक्त(म्) ? तत्रैतदुक्तंभवति[15]— तपरोच्चारणं चेत्तपरोच्चारणमिति । [16]उच्यते—एतत्प्रतिपादयति, यथान्येषामुपदेशश्च तावदस्ति । अथ लक्षणेन [17]निर्वर्तन्ते, न श्रूयन्ते यथा [18]यादी चुंचुप्चणपौ । एवं तकारस्योपदेशे असति निर्वर्तकं[19] लक्षणं नास्तीति इदमुच्यते—तपरोच्चारणं[20] कर्तव्यम् । अथवा गुणैरपि परिप्रापणमुपदेशः;[21] सन्ध्यक्षराणि चेत्तपराणि, तपराणि न च ता(नि) प्राप्यन्ते (अ)तपराणि उच्चारितानीति ।

अथवा,

---

[1] Ms-दुप- [2] Ms-स्तम्भमिति [3] Ms साष्टमस्येति [4] Ms उपादशमानता
[5] Ms-न्ते [6] Ms-सस्यत्व- [7] Ms-न्धत्वानु-
[8] Ms-नस्य [9] Ms-संबधु- [10] Ms-यत्वमिति-
[11] Ms मसंमंस्त्यति [12] Ms इदं आसं [13] Ms कथ
[14] Ms दिश- [15] Ms-वन्ति [16] Ms-नुप्यते
[17] Ms निवर्तते [18] Ms वादी वुंवुंप्वणयो [19] Ms-क-
[20] Ms रणंकता न श्रुति इति अरणं कर्त [21] Ms-शा

## तपरोपदेश इति,

तपरफलं[1] प्रति निर्देश(:) तपरफलं[2]चेदिष्टं [3]मन्यते, सन्ध्यक्षरेषु तपरोच्चारणां कर्तव्यमिति । सन्ध्यक्षराणीति पूर्वाचार्यसंज्ञैषा । तेषां चान्वर्थ(त्वं), सन्धीयमानावय(व)त्वात्, सन्धीयमानौ[4] पूर्वापरावयवौ ५ एषामिति । अत्र च ग्रन्थे विप्रतिपत्तिः । कश्चित् सर्वाण्येव तपराणि कर्तव्यानीति प्रतिपन्नः । कश्चित् एकारैकारावेव तपाविति । ओकारौकारौ तु[5] "तादपि परस्तपर" इति तपरत्वं प्रतिपद्ये(या)तामिति[6] । यदिह सर्वाण्येव तपराणि स्युः ओत् ङ् औत् च् इति इत्संज्ञैव न स्यात् । (न) ह्युपदेशे च तकार इति । किं पुनस्तकारस्येत्संज्ञाया(:) प्रयोजनम् ? यावता [7]तकार-१० स्येत्संज्ञा न स्यात्, इयं [8]विकल्पेतेति(?) प्रत्ययग्रहणमिह मा भूत् "दिव उत्"(सू.६.१.१३१) इति । तस्मादस्ति[9] तपरेष्वित्संज्ञा इत्यभ्युपगन्तव्यम् । अतो "दिव उत्" इति यदुच्चार्यते तस्येत्संज्ञा तत्र तिता यः प्रत्याय्यते[10] स तत्कार्यं प्रतिपद्यते, संज्ञी कार्यं[11] प्रतिपद्यते । अस्ति[12] तत्र तित्करणस्यानन्यार्थ[13]त्वात् इ(ह) तु तपरत्वमन्यार्थम्, तत्कालप्रतिपादन उपयुक्तमस्तीति[14] तद्व्यपदेशस्य १५ निमित्तं कथमिव स्यात् ? अनेकार्थत्वादनुबन्धस्यादोषः । दृष्टो हि एकोऽनुबन्धोऽनेकार्थः । यथा ठगादिषु ककारो वृद्ध्यर्थः स्वरार्थश्च । सर्वत्रैव च इत्संज्ञा वक्तव्या । इतरेषां हि तपरं[15] सन्ध्यक्षरं तत्कालान्[16] प्रतिपादयत्[17] स्वस्वरूपं प्रतिपादयति । स त्वटिदेव यः[18] टितः कार्यं[19] प्रतिपाद्यते । कुतः ? तत्प्रतिपाद्याना(म)नुच्चारणा(त्) नास्त्येतदुच्चारणोपाय[20] इति । एवमपि २० सन्ध्यक्षराणां तकारस्ये(त्सं)ज्ञा वक्तव्या । इतरथा हि तप(रं) सन्ध्यक्षरं तत्कालान् प्रतिपादयति सतकारकं संज्ञारूपं, प्रतिपादिते च स्वरूपे[21] इत्संज्ञा नास्त्युपदेशाभवात् । अथेह कस्मान्न भवति स्वरूपग्रहणमिति ? एके[22] वर्णयन्ति—का पुनरत्र संज्ञा ? आदिरित्याह, तस्य तूपलक्षणमन्त्य[23](इति) । यद्ये(व)मादिरेव[24]संज्ञार्थेना[25]र्थवाननुबंधस्तु काकवासितवदिति । विमरत्य- २५ भावः(?) इकः अचीति । तस्मात्समुदायः संज्ञा यद्यपि समुदायस्तथाणा अतपरा एव तथापि इत्संज्ञयान्त्यो[26] निवर्त्यते(?) । इह त्वनन्यत्वात् असत्यपि(?) इत्संज्ञायामतकारकं स्वरूपं प्राप्नोति; प्रत्याय्यस्तु तत्प्रमाण

---

[1] Ms-फल- [2] Ms रवदिष्टं [3] Ms-मन्यसे
[4] Ms-मानो [5] Ms-तु [6] Ms-पद्यत इति [7] Ms तपर
[8] Ms-विकल्प [9] Ms-दास्त [10] Ms तत्रातता यः प्रत्योप्यते
[11] Ms संज्ञायार्थं [12] Ms आस्त- [13] Ms-न्य-
[14] Ms युक्तं संति नि [15] Ms तेपर- [16] Ms-लात्
[17] Ms-यत- [18] Ms या- [19] Ms कार्यघ्र [20] Ms-पात्य
[21] Ms वस्य रू- [22] Ms एको [23] Ms-मन्ये
[24] Ms-सिदिनेव [25] Ms सज्ञार्थेनेना- [26] Ms-न्यो

अतपर[1] एव। तथा शुक्लवाससा तुल्यपरिमाणमानयेदिति अन्योपलक्षणं, पार वाससा[2]शुक्ल अन्तर्भवत स्वव्यापार[3] तु(?) तद्गुणवि[4]ज्ञानमस्त्येव। तपरत्वमन्येषु उपलक्षणं, स्वव्यापारे तु तपर इति तकारोऽप्यन्तर्भवति। अत [5]एव इत्संज्ञायां प्रतिविधीयते[6]। समुदायाव(यव)भेददोषः[7]। ङकारो हि एओ इत्यस्यानुबन्धः, तकार ओकारस्य। एवं[8] चकार ऐऔ[9] इत्येतस्य, तकार औकारस्यैव; यथास्तुतष्टकारः(?) समुदायस्योङ इति तदेकदेशस्येति। यस्य द्वौ तपरौ स पर्यनुयुज्यते—कथमितरयोस्तपरत्वमिति। स आह "तादपि परस्तपर" इति। ननु च नात्राद्याप्येतदवतिष्ठते, आतश्च नावतिष्ठते यद्वक्ष्यत्युत्तरत्र—नैष दोषः, स्थितमपि पुनःपुन(:) स्थपतवत्(?) उपन्यस्यते, यथैतदेव पुन(:) "वृद्धिरादैच्"[10] (सू. १. १. १) इति। वक्ष्यति च वप्येव(?)। तस्मात्प्रतिज्ञाभेदमात्रमेव सर्वाणि[11] वा तपराणि, द्वे[12] वा तपरे इति। अथ किमर्थं "अतो भिस ऐस्" (सू. ७. १. ९) इति[13] प्रत्याहारो न भवति सन्ध्यक्षरे तकारे? यथा "अचि" इति। किंच[14] स्यात्? अग्निभिर्वायुभिर्गोभिर्नौभि[15]रित्यैस्भावः स्यात्। अथ कस्मात्स्वरूपग्रहणं न भवति? किं च स्यात्? भवद्भिरित्यैस्भाव[16](:) स्यात्। अथ "व्याख्यानतो विशेषप्रतिपत्तिः" इहापि तपरोऽयमिति व्याख्यास्यामः।

## प्लुत्यादिष्वज्विधिः ॥ वा ॥

अभ्युपगम्य प्लुतं [17]द्विर्वचनादयो दोषा उच्यन्ते, यथाभ्युपगम्य "ह्रस्वयलोपौ[18]" "धातुविधितुक्प्रति[19]षेध" उच्यते।

## ( प्लुतसंज्ञा च ) ॥ वा ॥

संप्रति प्लु(त)मेव चोदयति। त्रिमात्रो हि कालभेदादप्रत्यायितस्तमयारणा(?) [20]च्त्वमप्रतिपद्यमानोऽशक्यः प्लुत इति निर्दष्टुम्। तत्र यः प्लुतोऽस्ति [21]कथंचिदासन्नः स प्राप्नोति [22]ईकार ऊकारश्च। एवं सति [23]गोत्रेत्यादिषु सिद्धं च द्विर्वचनमनिष्टस्तु त्रिमात्रः श्रूयेत।

## अतपर एच[24] इग्घ्रस्वादेशे ॥ वा ॥

तपरत्वे पुन(:) सत्यर्धस्य[25] एकारस्य भिन्नकालत्वादसत्यच्त्वे[26] ह्रस्वसंज्ञायाः अभावः।

---

[1] Ms-परा [2] Ms-क्लै [3] Ms-पार
[4] Ms-णधि [5] Ms सवङुत्सं- [6] Ms-त
[7] Ms-ददाषः [8] Ms-एव [9] Ms एओ [10] Ms-रादेव
[11] Ms सवाण [12] Ms धद्वे [13] Ms भिसा एग्निति [14] Ms किस्वि
[15] Ms भिर्गाभिर्त्तौभि [16] Ms यवद्भिरितौस्ताव- [17] Ms द्विव- [18] Ms-पो
[19] Ms-स्तुक्येति- [20] Ms-घ्रम- [21] Ms कयचि- [22] Ms इकार उका-
[23] Ms गौत्रेत्रादि- [24] Ms एव [25] Ms सत्यध्वव [26] Ms-च्चे

## ननु च यस्यापि तपराणि ।

एतदुक्तं भवति—योगारम्भं[1] प्रति साम्यं, एष तु विशेषः, [2]एच इत्यु-(क्तं) संप्रति ऐच[3] इग्घ्रस्वादेशे इति वक्तव्यमिति । [4]ऐचोस्तु विश्लिष्टावर्णत्वात् संश्लिष्टावर्णौ अर्धैकारार्धौकारौ न भवत इति ।

## प्रत्याख्यायत (ए)तत्-ऐचोश्चोत्तरभूयस्त्वा[5]दिति ।

अर्धमात्रा अवर्णस्य, अध्यर्धमात्रेवर्णोवर्णयोरिति एष प्रतिविभागः । तत्र[6] "ब्राह्म(ण)ग्रामः [7]सालवनम्" इति यथा भूयस्त्वा(त्)[8] ए(व) व्यपदेश एवमिहापीति ।

## इदमपि प्रत्याख्यायते—सिद्धमेडः सस्थानत्वादिति ।

कथमिदं तत्र प्रत्याख्यातम् ? न स्त एवार्ध[9]कारार्धौ[10]कारौ इति । एतौ चेन्नस्तः, [11]तालव्यस्य तालव्यः[12] सस्थानः[13] ओष्ठ्यस्य[14] ओष्ठ्य[15] इति । एवं [16]शिक्षाकाराः प्रतिपन्ना[17] ओष्ठ्यतालव्याविति । अत्र[18] चार्धौकारादर्शनेन शिक्षाभेद इत्येतत्प्रति(प)द्य(ते) । कथं तालव्यत्वे सत्येकारस्य श्रुतिभेदः ओष्ठ्यत्वे [19]च ओकारस्यौकारस्य च ? तेषां हि स्थानप्रयत्नकाः(?) सर्वे अभिन्ना [20]इति दर्शनभेदाददोषः । [21]एके मन्यन्ते—योऽसौ वर्णस्य[22] निष्पादको वायुः[23] स एकारस्य निर्वृत्तौ[24] स्वरसमीपे[25] यः [26]कण्ठस्तमुपश्लेषयति केवलं स्थानं तालवेव । एवमोष्ठावेव स्थानमोकारस्य, केवलं तु वायुः कण्ठमभि-हन्तीति[27] । इतरे तदपि स्थानमभिमन्यन्ते श्रुतिभेदोऽ(पि) श्रोत्राग्रमध्यमूल-भेदात् भवति यथाश्रयशानां(?) ।

## ननु चैडः सस्थानतराविति ।

एवं विद्यते, विद्यमानत्वमेतयोरनेन सस्थानत्वमुक्तमिति चेत् तावेव सस्थानतरौ । न तौ स्तः । लाघवात्प्रत्याहारे[28] तावेव पठितौ[29] स्याताम् । ननु च गुणवृद्धिसंज्ञा ज उपदेश(?) स्यात् ? [30]दीर्घग्रहणं संज्ञायां करिष्यते । तथा च "सहिवहोरोत्" ( सू. ६. ३. ११२ ) इति तपरकरणं वर्णग्रहणं च कर्तव्यं भवति ।

---

[1] Ms-म्भ- [2] Ms एव इत्युं [3] Ms एच [4] Ms ए-
[5] Ms-यस्वा- [6] नत्र [7] Ms सान; cf. MB.I. 1, 49
[8] Ms-यस्ता [9] Ms-र्धे- [10] Ms-र्धो [11] Ms ताभव्य-
[12] Ms ताभव्यः [13] Ms सस्वानः [14] Ms तुष्ठ्यस्य [15] Ms तुष्ठ्य
[16] शक्षा- [17] Ms-पिन्ना तुष्ट्य [18] Ms यार्ध ओका [19] Ms चोका
[20] Ms-रति [21] Ms एकेन मन्य [22] Ms यस्य स्थ- [23] Ms वापुः
[24] Ms निवृत्ते [25] Ms-समाये [26] Ms कं वस्त- [27] Ms कं वमभिहतीति
[28] Ms-रे एवं वि……वेव पठि- [29] Ms यवितौ [30] Ms दार्घ-

**ननु च [1]भो(:) छन्दोगानां सात्यमुग्रिराणायनीयाः[2] ।**

किमर्थम् छन्दो(ग)ग्रहणम् ? सात्यमुग्र्यादीनामप्रकाशत्वात् ।

**सुजाते [3]एश्वसूनृते ।**

अं(तः)पादमन्यपरस्यैवैकार[4]मादेशं विदधति ।

५ **[5]पार्षदकृतिरेषा[6] तत्रभवताम् ।**

प्रातिशाख्यान्ते कुर्वंति(?)। ननु [7]चैकचरणविषयमुपलक्षणं क्रियते यथा "देवसुम्नयो[8]र्यजुषि [9]काठके" (सू. ७. ४. ३८) इति सत्यमेवमेतत्। "पार्षदकृ[10]तिरिति" एतदुक्तं भवति—पार्षदमुच्चारणमेषां स्वस्था(न)मेव पार्षदव्यवहार एष ना(न्य)त्रेति[11] एवं प्रकाराश्च[12] तेषां बहवो व्यवहाराः [13]किक्किटाकारा(:)
१० स्तोभादयः, एवमर्थ(मे)वेदमुक्तं[14]—

**छन्दोगानामिति । [15]आन्तर्य(त)स्त्रिमात्रचतुर्मात्राणाम् ।**

अन्यस्याभावात्[16] इदमप्यत्र नास्ति "प्लुतश्च विषये स्मृति" (वा. ६. १. ८७) इति ।

**इह तावत्पशुमिति[17], (अमि)एक[18] इतीयता सिद्धम् ।**

१५ एतदपि वा न कर्तव्यं, सिद्धो हि दीर्घः "प्रथमयोः पूर्वसवर्णः[19]" (सू. ६. १. १०२) इति। सत्यमेवमेतत्। [20]किन्त्वारभ्यमाणे [21]अमीत्येतस्मिन् "वा छन्दसि" (सू. ६. १. १०६) इत्येतत् कथमारंभादनुवते[22]त्येवमर्थमप्येक इत्येतत्स्यात्। तस्मात्पूर्वग्रहणं पूर्वरूपार्थं क्रियते। तथापि द्वित्वमप्यनुवर्तते(?)। ननु चैवमर्था पूर्वानुवृत्तिः, पूर्वो दीर्घो यथा स्यात्।
२० परं [23]तूभयान्तरतमो (मा) भूत्, इदमप्यत्रानुवर्तयितव्य(म्) द्वितीयं पूर्वग्रहणं "प्रथमयोः पूर्वसवर्णः" इति ।

**अथवाचार्यप्रवृत्तिर्ज्ञापयति ।**

ननु च[24] नियमार्थमेतत्स्यात्, इह मा भूत् उत इति। इदं तर्हि ज्ञापकं "सौ च" (सू. ६. ४. १३), "संप्रसारणस्य" (सू. ६. ३. १३९) इति।
२५ एतदपि [25]ह्रस्वनिवृत्त्यर्थं स्यात् "[26]इको ह्रस्वोऽङ्यो" (सू. ६. ३. ६१) इति। [26]तस्यैवेदं लिंगं, संप्रसारणपूर्वाय(?) द्वौ[27] पूर्वशब्दावनुवर्तेते इति।

---

| | | | |
|---|---|---|---|
| [1] Ms यमो | [2] Ms-नाया: | [3] Ms अश्व | [4] Ms-व्ययरस्यौवैकार- |
| [5] Edn. पारि | [6] Ms-रषा | [7] Ms चेकयरण- | |
| [8] Ms-म्म- | [9] Ms कावके | [10] Ms-दप्रकृ- | [11] Ms-त्रोति |
| [12] Ms-कानाश्च | [13] Ms कित्कि | [14] Ms-वदमुक्त | [15] Ms आतर्य- |
| [16] Ms-न्यव्यातावात् | [17] Ms-वत्यसुमिमिति | [18] Ms इति । यता | [19] Ms किवार- |
| [20] Ms अपीत्ये- | [21] Ms-वर्तते- | [22] Ms तु भया- | [23] Ms य |
| [24] Ms रूत्वनि- | [25] Ms इका; | [26] Ms तस्ये- | [27] Ms द्वो |

## अतो [1]गुणे पर (इतीयता) सिद्धम् ।

तत्र [2]एकार ओकारश्च दीर्घावेव, किं रूपग्रहणेन ? [3]तदकारार्थमेव विज्ञायते ।

## इह तावत्[4] खट्वश्यं इति ।

[5] अयमभिप्रायः—"[6]आद्गुणः" (सू. ६. १. ८७) इति सर्वेषु स्थानमुपस्थितेषु एकारौकारौ [7]खट्वेन्द्र खट्वोढा[8] इति [9]अवस्थित आकारश्च श्रूयते गुणसंज्ञ इत्यतो विगृहीतः श्रूयते, यथोक्तं "झकारभकारावपि पदान्तौ न स्तः" (भा. झभञ्) इति ।

## तप(रे) [9]गुणवृद्धी ।

[10] यद्यपि संज्ञिनो[10] भिन्नास्तथापि[11] संज्ञारूपेणोच्यमानास्तल्लिंगसंख्या उच्यन्ते, यथा "तरप्तमपौ घः" (सू. १. १. २२) इति । अथवा तपरसहिते शास्त्रे तपरे । यद्वा तपर इति सप्तमी (अ)नन्तरे[12] विषये संज्ञिनि, तपरे गुणवृद्धिसंज्ञे इति । कस्य पुनस्तपरत्वम् ? उच्यते, संज्ञिनाम् । कस्मात् ? संज्ञायाः परार्थत्वात् । तत्रोपायं संज्ञायास्तपरत्वमिति संज्ञाया-
[15] मप्यासक्तं लिंगं[13] संज्ञिनामेव[14] विज्ञायते । यद्येवं संज्ञिनां [15]कालावधारणं नास्ति, अनु(च्चा)र्यमाणत्वात् । तत् किं कालतामिदं(?) तपरत्वमित्यज्ञाने सति तपरकरणसामर्थ्यात् सवर्णानां न स्यात् । इदं तु नास्ति, द्विमात्राणां न [16]पुनस्त्रिमात्राणामिति । अथ मन्यसे [17]संज्ञैव तपरेति, एवमप्येकारस्तपरः ऐकारश्च सवर्णं तत्कालं प्रतिपादयेत्, न[18]त्वोकार [19]औकार(:)चेति ग्रहणमेव
[20] वा[20] न स्यात् । अपि वा[21] सर्वकालेऽस्य प्रतिपत्तिः स्यात् । संज्ञायास्तावत्तपरत्वे न दोषः । अत्र हि एच्च[22] ऐच्च समुदायो न भवति(?) । तत्रान्त्य[23]-वर्णस्य [24]विकलांगा परिभाषा नोपतिष्ठते । तत्र "तपरस्तत्कालस्य" (सू. १. १. ७०) इति इदमेतावति व्याप्रियते । यस्य ग्रहणमस्ति तस्य तत्कालस्येति, तच्च ग्रहणं तपरत्वात्, ततस्तर्हि "आदिरन्त्येन सहेता" (सू. १. १. ७१),
[25] "तन्मध्यस्य च" (वा. १. १. ७१) इति [25]अणेकारोकारयोर्ग्रहणं [26]यथाणित्यडिति वा [27]आदिभूतेनाकारेण प्रत्यायिता(अ)[28]श्रू(य)माणा अपि इकारादयो

---

[1] Ms गुणं परत्व- [2] Ms इकार उका- [3] Ms तदा- [4] Edn. तर्हि
[5] Ms अ- [6] Ms खट्वंद्र [7] Ms-द्वाट [8] Ms आव-
[9] Ms णुण- [10] Ms-ज्ञिनि नो- [11] Ms-थाहि [12] Ms-मंतरे
[13] Ms-क्तलिङ्गा [14] Ms-मेवि [15] Ms काल- [16] Ms पुनरस्त्रि-
[17] Ms संज्ञे- [18] Ms वौकार [19] Ms औकारौ [20] Ms या
[21] Ms चा- [22] Ms एश्च [23] Ms-त्य- [24] Ms-तिकलां-
[25] Ms अशोका- [26] Ms र्यथा नित्य [27] Ms आवि भू- [28] Ms श्च-

ग्राहकाः। यदापि संज्ञिनो तपरा[1] तदाप्यादिरन्त्येन सहेतेति यः सन्निविष्टः स गृहीत उत्तरकालं तत्कालान्[2] (प्रतिपा)द(य)ति;[3] द्विमात्रयोश्च सन्निहित इति युक्ता तत्कालप्रतिपत्तिरिवस् (?)।

**तादपि (प)रस्तपर इति।**

अनयोरुपादानमेकशेषात्[4], प्रवृत्ति(नि)मित्त[5]स्यानुपादाने स्वरूपमात्राश्रयणात् "सहिव(हो)रो[6]दवर्णस्य" (सू. ६. ३. ११२) इति लिङ्गात् द्वौ योगौ तन्त्रेणोच्चारितौ विप्रतिपत्तेर्यथा(?) विभक्तिविशेषनिर्देशात् "इग्यणः संप्रसारणम्" (सू. १. १. ४५) इत्येकस्यैव वा शब्दस्य द्व्यर्थाभिधानयौगपद्यादिति।

**किं दकारे[7] प्रयोजनमिति।**

[8] ऋकारान्तानां सर्वेषामुदात्तत्वात् अनुनासिकत्वाच्च प्रवर्तकं नोपपद्यते तपरकरणं, नापि निवर्तकमनण्त्वा[9]दिति, [10]दकारेण तुल्यस्तकार इति।

**[11]य एते (वर्णेषु) वर्णैकदेशा [12]वर्णा(न्तर)समानाकृतयः।**

सन्ध्यक्षरेषु अकारेकारोकाराः अवयवा वर्णान्तरे[13] एकाकृतयस्तथा [14]आकारादिषु मात्रिका [15]एवावयवा, एवमृकारे रेफ, लृकारे लकार(ः), किमेते अणादयो दतास्वन्तर्भूतास्ता(?)।

**(अ)वयवा अपि। अभ्यन्तरश्च समुदायेऽवयवः।**

तद्यवस्वय(?) ग्रहणाग्रहणयोर्हेतुमाह —

**इह (हि) समुदाया अप्युपदिश्यन्ते, अवयवा अपि।**
**अभ्यन्तरश्च समु[16]दायेऽवयवस्तद्यथा वृक्षः प्रचलन्**
**सहावयवै(ः) प्रचलतीति।**

[17]पूर्वो हेतुर्ग्रहणे, अपरो[18] हेतुरग्रहणेऽर्थस्य निर्दिष्टो[19] भाष्ये। हेतुस्तु ग्रहणे ग्रहणमग्रहणेऽग्रहण(म्) "अक(ः)सवर्णे दीर्घः" (सू. ६. १. १०१) इत्येवमादिष्ववयवागृह्यन्ते[20]। कुतः? इहाग्रहणात्।

**इह**

प्रत्याहारे।

**समुदाया अप्युपदिश्यन्ते[21],**

ए ओङ् ए औच् इति।

---

[1] Ms तपणे [2] Ms-लात् [3] द्राति [4] Ms-करोषात् [5] Ms-सित्त- [6] Ms-रा-
[7] किम्मकारेण [8] Ms कृका- [9] Ms-णत्वा- [10] अका- [11] Ms यदेते
[12] Ms-वर्ण- [13] Ms-न्तारे [14] Ms अ- [15] Ms एव- [16] Ms-दाय-
[17] Ms पूर्वे [18] Ms अपरे [19] Ms-दिष्टा [20] Ms-ह्यात [21] Ms-श्यात

## अवयवा अपि,

अइउण् इति। [1]यत्र [2]चावयवपर उपदेशस्तत्र विद्यमानोऽपि समुदायो नोच्यते। उपदिष्ट इति यथा अइउणि(ति) न समुदायः(?)। अद्वानड्वा(?)। के तर्हि ? अवयवा एव, यथा हयवरडिति अकारस्यात्रोपदेशात् ५ .....लघ्वा उच्चारयितुमशक्यो नायमकारस्योपदेश इति वलादिष्वनच्का एव हलोऽभिधीयन्ते[3]। एवमेङ्[4] इति [5]ऐजिति चोपदेशे "आदिरन्त्येन सहेता" (सू. १. १. ७१) इति समुदाय[6] एवोपदिश्यते, नाकारादयोऽवयवाः तेषामन्यत्रोपदेशात्। इ(ह) उपदिष्टा अपि तु "एचोऽयवायावः" (सू. ६. १. ७८) इति समुदायीऽव[7]यवादेशं प्रतिपद्यते अनुमाना(द)वयवाः नं(?) नहि १० शब्दवाच्या[8]। [9]किं तर्हि ? समुदायाः यथा वृक्षशब्दो न फलादिवचनः तत्रैमपास्यति(?) यत्र समुदायकार्यं च[10] सन्निपतत्यवयवकार्यं च तत्र केन भवितव्यम् ? अवयवकार्येण। कुतः ? तस्मिन्नवयवस्य चोदितत्वा[11](त्) समुदायकार्ये हि अवयवास्तेनैव पारतन्त्र्य(मा)पादिताः[12] समुदायानुरोधात् निवर्तन्ते[13] अग्र आयाहि" इति। यथा [14]घृतमस्मै दीयतामिति [15]भोजने १५ हस्तप्राप्तमपि ददातौ नान्तर्भवति तदेव (दत्त)मपि न दत्तं प्रतिगृहीतमपि न प्रतिगृहीतमेवमन्तर्भूतोऽप्यवयवो नान्तर्भूत इति। अग्र [16]इन्द्र इत्यानुमानिकं समुदायकार्यं न प्रतिपद्यते, प्रत्यक्षचोदितमेव प्रतिपद्यते "अकः सवर्णे"(इति) दीर्घत्व(म्)। सत्वत्र वर्णे अत्काच्चादिषु समुदायेषु अवस्थितां कं चोदनायां गृह्यमाणात्कार्यभाज इति(?)। यथैव पदादिसमु(दा)यस्था[17] कार्यं प्रति- २० पद्यन्ते,[18] एवं वर्णसमुदायस्था[19] अपि इत्यतः प्रत्याहारग्रहणात्कार्यदेशेषु[20] ग्रहणमिति। [21]संप्रत्यग्रहणे हेतुरुच्यते—

### [22]अ(भ्यं)तश्च समुदायेऽवयव इति।

यन्मन्यसे प्रत्याहारे[23] समुदाया एवोपदिष्टा इति, एतत्कथम् ? सत्यपि समुदायोपदेश एतच्चिन्त्यं[24], किं तावदवयवोऽनुपात्त(:)[25]। नहि २५ शक्यतेऽन्यथा समुदायरूपं निष्पादयितुमिति समुदायस्थ[26]गतैवास्य उपदेष्टुः प्रवृत्तिरित्यपि अभ्यन्त[27]रीकृत्यावयवानिति। वयं ब्रूमः, अभ्यन्तरीकृत (इ)ति। तत्र यथैवादेशमन्तर्भावात्प्रति[28]पद्यते एवमेत्वमपि(?), कार्येषु तु

---

[1] Ms तत्र [2] Ms वा- [3] Ms-यते
[4] Ms-मेङ [5] Ms एजि- [6] Ms यमुदाग्र [7] Ms-याव-
[8] Ms शब्दयाप्या [9] Ms कि तहि [10] Ms य [11] Ms-त्व
[12] Ms-स्तेनिचपारते अपादितः [13] Ms निवर्तत [14] Ms-ष्टत-
[15] Ms भाजनं [16] Ms इत्सु [17] Ms-यास्या [18] Ms-द्यते
[19] Ms-स्या [20] Ms-दिशेषु [21] Ms स [22] Ms आं-
[23] Ms-हारोपदेशे [24] Ms-त्य [25] Ms-यवावुपात्त [26] Ms-यवस्थ-
[27] Ms-रीयकृ- [28] Ms-यात्प्रति-

मुख्य एव व्यपदेश इति। यथा [1]प्रष्ठ्यां क्रियासंगः गौणः [2]संज्ञालाभस्तु मुख्य एवमिदमपि कार्यमवयवानां यदुत संज्ञालाभ इति एतामपि क्रियां प्रतिपद्यन्ते अवयवाः(?)। एतत् प्रतिपादयति—[3]समुदायसंज्ञालाभा(त्पार)तंत्र्यं[4] प्रतिपद्यमानोऽवयव प्रत्याख्याय प्रवर्तते यथा स(मु)दायोप्यंति वर्णान्तरमेवेदं जात्यन्तरयुक्तं (?) यथा नरसिंहजातेः सदृशः कश्चित्पुरुषजातेः समुदायान्तरं च[5]। तत्र हि सिंह(मांस)मानीयतां पुरुषमांसं[6] वेति [7]तन्मांसानयनं भवति। तस्मा(त्) समुदायेष्वसन्तोऽवयवाः [8]कथमिव निर्दिश्येरन्? कथं[9] वा प्रतिपद्येरन्? इति। अपरः प्रकारो गृह्यते—समुदायसमुदायिनोः भेदमाश्रित्योच्यते। अन्ये—अवयवाः समुदायः[10], उभयं चोपदिश्यते; तत्र यः सन्ध्यक्षरेषु अवयवोऽस्ति स कथमिव कार्यं न प्रतिपत्स्यते (इ)ति।

## अभ्यंतरश्च समुदायेऽवयव इति।

एकत्वं समुदायसमुदायिनो(:) नान्यः समुदायोऽस्ति, तथैवावयवा(:)[11] तथा सन्निविष्टा चेत्[12] व्यपदेशं[13] लभन्ते[14] यथा एतदेव प्रचलनं यदवयवानामिति। अथवा, "इह समुदा(या) अप्युपदिश्यन्ते[15] अवयवा अपि" इति, एकविषयत्वमुच्यते एओङिति ऐऔजिति। अस्मिन्नुपदेशे उभयमप्युपदिश्यते, तात्पर्येणेति शेषः। यथा गर्गादिबिदादिपाठः समुदायसाधुत्वप्रतिपत्त्यर्थः अवयवानां च कलादिनिवृत्त्यर्थः। इह "अभ्यन्तरश्च समुदायेऽवयव" इति समुदाया(र्थ)[16] एवोपदेशो नावयवार्थः। यथा पूर्वपक्षे गर्गादिबिदादिपाठात्।

## समानाक्षरविधिप्रतिषेधः ॥ वा ॥

## अग्ने इन्द्र इति।

समुदायावयवाश्रयौ विधी[17] प्राप्नुतः। अयादेशस्य अवकाशः, "अग्न आयाहि" इति। [18]दीर्घ इत्यस्य दधीन्द्र इति। इहाग्ने इन्द्र इति विप्रतिषेधा(त्) दीर्घत्वं प्राप्नोति। अथवायादेश [19]आनुमानिकः संप्रतीयः, [20]दीर्घस्तु साक्षादिति साक्षाच्छिष्टो[21] बलीय इति। यणादेशे कथम्? तत्राप्यवयवः साक्षात् शिष्ट इति। सत्यमेवमेतत्। अनवकाशत्वात् स बाध्यते "येन नाप्राप्त" इति "मध्येऽपवादा(:) पूर्वान्" इति वा।

---

[1] Ms प्रद्यां  [2] Ms शब्दला-  [3] Ms नमु-
[4] Ms भारतं अप्र-  [5] Ms व  [6] Ms मासं-
[7] Ms तन्मा  [8] Ms कथामव  [9] Ms काथं
[10] Ms-दोयः  [11] Ms-वौ  [12] Ms-वेष्टा
[13] Ms-देश  [14] Ms लभेते  [15] Ms-श्यात
[16] Ms-य  [17] Ms श्रयो विधा  [18] Ms दार्घेत्य-
[19] आMs नुनासिकः  [20] Ms-दार्घात्व  [21] Ms-ष्टा

[1]यदयं दीर्घाच्छे तुकं शास्ति ।

दीर्घात्परो[2] य(:) छस्तस्मिन् तुग्भवति । कस्य ? "[3]तस्मिन्निति निर्दिष्टे[4] पूर्वस्य" (सू. १.१.६६) इति । ननु चैकारौकारार्थः स स्यात् ? तत्र हि उत्तरा भूयसी मात्रा । तत्रापि शक्यमर्धमात्रामपनीय[5] पूर्वस्य कर्तुमिति । योगविभागो[6] लिंगं तुक् न भवतीति ।

तपरकरणसामर्थ्यात् न भविष्यति ।

अत्र हि प्रवृत्तिः कृतार्था वृद्धैरिति; निवृत्तिरकृता(र्था), निवृत्तेश्च लिंगं तपरकरणमिति साक्षात् श्रुतिर्बाध्यते, दीर्घो न भवतीति अनुमानश्रुत्या ।

[7]यदयं "आतोऽनुपसर्गे" इति ।

अत्राप्यनुबंधस्यासंगो[8]ऽनवकाश इति आकारस्य निवृत्तिरुच्यते । अत्र चोद्यते—यदि कित्करणं न क्रियते[9] इह दोषः "मीनातिमिनोतिदीङां ल्यपि च" (सू. ६.१.५०) । [10]यद्ययं "आतोऽनुपसर्गे क" इति अकार उच्येत एज्विषयोऽयमिति मीनात्यादीनामाकारे कृते, अकारे च प्रत्यये[11] क्षतानाफगाकरस्वराणा अप्राप्तदोषः स्यात् (?) । नैष[12] दोषः । [13]दीङस्तावदकर्मकत्वात् [14]कर्मोपपदत्वं [15]नास्ति । सोपसर्गः सकर्मकः स्यात् । तत्राप्यनुपसर्ग इत्युच्यते । मीनातिमिनोत्योरपि "[16]ह्वावामश्च" (सू. ३.२.२) इति च "आत" इत्येतत् सामान्यग्रहणम् । एवं च कृत्वोच्यते—

उत्तरार्थमेतत्स्यादिति ।

[17]एवं तर्हि गापोष्टगिति ।

तत्रापि [18]पर्यनुयुज्यते. [19]छ्न्दोगायेति लोपः स्यात् "आतो धातोः" (सू. ६.४.१४०) इति न च प्रतिपदोक्तमाश्रीयते पस्रव इति (?) न स्यात् । सन्निपातलक्षणे पकारे तुकार (?) एव न स्यात् । उच्यते—आताना लोप इति य एव तदेवं सति (?) [20]सर्वथा लोपेन भवितव्यमिति ।

एकवर्ण[21]वच्च ॥वा॥

संख्या निर्वर्तिका [22]सर्वत्रेति वाक्शब्दो द्वयजिति व्यपदिश्यते ।

---

[1] Ms-यदयदादार्घा- [2] Ms-दार्घात्यशे [3] Ms वस्मि-
[4] Ms निदिष्टि [5] Ms-नाय [6] Ms-गौ
[7] Ms य इय- [8] Ms-धत्वासगो [9] Ms-यरव
[10] Ms यद्ययद्यमा- [11] Ms-त्यद्ये [12] Ms मेव
[13] Ms दाङास्ता- [14] Ms कमो- [15] Ms नामाकास्ति
[16] Ms द्वा- [17] Edn यत्तर्हि [18] Ms-युन्यात
[19] Ms छिदोगापेति [20] Ms सवथालोप [21] Ms वण- [22] Ms-त्रोति

तत्रेकवर्णवदित्यतिदेशो वा। एतु (?) प्राकृतं द्वयच्त्वमिति। अथवा "सावेकाचः" (सू. ६.१.१६८) इति क स्यात्। के वा त्वचेति।

## [1]गोनौग्रहणम्।

सामान्यविषयमनुमानं सर्वविषयं कल्प्यते।

## नाव्यपवृक्तस्यावयवे तद्विधिः ॥वा॥

अविद्यमानं व्यपवृक्तं यस्मि[2]न्समुदाये सोऽव्यपवृक्तः। तस्य व्यपवृक्तस्य योऽवयवः तस्मात् नावयवे तद्विधिः[3]। अथवा अव्यपवृक्तस्य योऽवयव(स्त)स्यावृक्तभूतस्यावयवे पृ(थ)ग्भूते यो विधि(:) दृष्ट(:) स विधिर्नेक्रियते।

## सप्तदश सामिधेन्यो भवन्तीति।

ऋचां वाचकः[4] शब्दः साहचर्यात्काष्ठेषु वर्तते। न च [5]सप्तदशारत्निमात्रं काष्ठं सप्तदशव्यपदेशं लभते। भेदाधिष्ठाना हि सप्तदशसंख्या, [6]सैकसंख्याविशिष्टे न प्रवर्तते। तत्र यथैवावयवा अपृथग्भूता अव्यपदेश्या [7]एवं वर्णैकदेशा उपाया इति।

## प्र(त्यृ)चं चैव हि त(त्कर्म) [8]चोद्यते।

तत्रोनातिरिक्ते दाहे कर्मवैगुण्यमथैत(त्) स्यात् सर्वमेवास्याध्यायकृय उच्चारयत्विति (?)।

## [9]एवमपि असंभवश्चाग्नौ वेद्यां च।

अर्धचतुर्हस्ता[10] हि वेदिः।

## [11]यथा तर्हि।

एवमर्थमुपन्यस्तं[12]—नात्र ऋक्संबन्धा(त्) समिच्छब्दोऽल्पप्रमाणत्वात् च स्यात् संभव इति।

## अत्रापि प्रतिप्रणवमिति[13],

पूर्ववदेव।

## यथा तर्हि घृतं[14] तैलमिति।

एतदुक्तं भवति—न संभवमात्रात् प्रतिपत्तिर्युक्ता। सत्यपि घृततैलसंभवे

---

[1] Ms गौनौग्रहणे
[2] Ms क्तमस्मि-
[3] Ms-धिर्न क्रियते।
[4] Ms वृक्ष प्रवृतः
[5] Ms सदाशा-
[6] Ms से-
[7] Ms एव
[8] Ms प्रचाचेवहितत यो-
[9] Edn. omit एवमपि
[10] Ms-तुर्थहस्ता
[11] Ms तथा
[12] Ms-पश्वस्तं
[13] Ms-प्रद्यायमिति
[14] Edn. omit घृतं

घृतरूपस्य गोशब्देनाभिधानात्। तैलरूपेण संस्पर्शरूप(वि)शिष्टेनाविक्रयो भवति। ए(वं) [1]तर्हि [2]संभवमात्रे गोविक्रयी[3] मांसविक्रय्यपि स्यात्। एष तु न्यायो विरुध्यते "माषा न भोक्तव्या" इति। अनेन हि माषा हि व्यति-मिश्रा[4] अपि न (भु)ज्यन्ते; सुरा अपेय्येति मिश्रापि न [5]पीयते।

५ **यत्र तर्हि व्यपवर्गोऽस्ति[6]।**

क्वचिदेकसंख्याविशिष्टेऽपि व्यपवर्गो दृश्यते।

**क?**

[7]ऐकारादिषु। उच्यते हि अयं पंचखट्वोऽयं सप्तख(ट्व)[8] इत्येवं सन्ध्यक्षरेषु प्रयत्नस्य विरामोपादानाभ्यां लक्ष्यः पृथग्भाव इति।

१० **सन्ध्यक्षरेषु विवृतत्वात् ॥वा॥**
**विवृ(त)तरं[9] इति।**

विवृततममिति[10] ग्रहीतव्यमिति। तत्र प्रयत्नभेदात् सावर्ण्यमेव नास्तीति कुतो ग्रहणमिति।

**अथवा पुनर्[11] गृह्यन्ते।**

१५ इदमुक्तमग्रहणे, [12]नाव्यपवृक्तस्येति; एतदकारादीनाम्। यत्र च व्यपवर्गः सन्ध्यक्षरेषु, तत्राप्यसावर्ण्यम्। अत ऋकारल्कारावेवावस्थितौ[13]। तत्र वाक्यकारस्येदं दर्शनं—नैवावयवौ स्तः [14]समुदाय एव स जात्यन्तरयुक्तो [15]नरसिंहवदिति। अनेन दर्शनेनेदं प्रक्रमते—

**नुड्विधिलादेशविनामेषु ॥वा॥ इति।**

२० अथावयवाः सन्ति तस्मिन्समुदाये, तत्र समुदायव्यापारे अवयवस्य कार्ययोगित्वं न स्यात् अयादिषु। यत्र त्ववयव एव व्याप्रियते न समुदायस्तत्र[16] विद्यमानोऽवयवः कार्ययोगी न स्यात्। नुडादि(षु) इडादिषु समुदायस्य चोदितत्वा(त्) अवयवाश्रया नुडादयः प्रवर्तिष्यन्ते[17] नार्थ ऋकारग्रहणेन। यद्येवं तुक्यपि [18]ह्रस्वस्याश्रि(त)त्वात् तुका भवितव्यं,
२५ [19]आलूय प्रलूयेति। यत्र च प्रतिविहितं अव्ययवर्गस्तयकात् वा योगविभागो न "[20]दीर्घात् छे तुकं शास्ति" इति (?)।

**[21]अश्नोतेरेवावर्णोपध(स्य)।**

---

[1] Ms यर्हि [2] Ms सन्तव- [3] Ms क्रयो [4] Ms-तिपिश्ला
[5] Ms पायते [6] Ms-र्गो दृश्यते [7] Ms पापरा-
[8] Ms द्वोयं सदारव [9] Ms तरा [10] Ms-तमा इति
[11] Ms पुनरत्र [12] Ms नाव्यववृ- [13] Ms वावास्थितौ
[14] Ms समुदेदा- [15] Ms नरसाहक्यदि [16] Ms-स्तत् [17] Ms-न्ति
[18] Ms ह्रस्वः स्या- [19] Ms आः लूय [20] Ms दार्घः [21] Ms अश्नोतिरेववार्णो-

एवमनुमानं कल्पते, [1]नत्वेवमश्नोतेरेव कथं स्यादश्नातेर्मा[2] भूदिति।

## अविभक्तिको[3] निर्देशः।

अस्मिन् निर्देशे सति उरिति निर्देशस्तस्यानवकाशत्वात् अवयवरेफस्य लत्वं भविष्यति।

## स्फोटमात्रं [4]प्रतिनिर्दिश्यते।

अध्वनिकः स्फोट इत्युक्तं भवति। ननु च ध्वनिमन्तरेण स्फोटस्योपलब्धिरेव नास्ति। एवं तर्हि य एवासौ आद्यो ध्वनि(:) रूपमात्रस्य प्रतिपादकस्तावानेवाश्रीयते। यस्त्वसौ विशेषस्य प्रतिपादकः यं समुदायस्थोयं स्वतन्त्र (?) इति नासावाश्रीयते विद्यमानेऽपि तत्राविशेषे [5] आरूपमात्रं यथा [6]गोविशेषे अश्वोपलब्धिरारूपमात्रेण वोपलब्धिस्तस्मादारूपमात्रग्रहणमुभयोः (?)। अथवा कार्यवत् बुद्धिं कृत्वा इदमुच्यते। तत्र [7]कार्यपक्षे स्फोट एव संयोगात् विभागात् संयोगविभागाभ्यां वा निष्पद्यते। यत्त्वनुरणनं तच्छब्दत[8] एव। तेन य एवासौ स्फोटस्य निष्पादकः कर(ण)स्य व्यापारस्तावत एवाश्रयणम्। अथवा "स्फोटमात्रमिति" [9]आकृतिनिर्देशोऽयमित्युक्तं भवति। तत्राकृतिनिर्देशे नान्तरेणा(भि)धानमाकृतिं[10] प्रतिपद्यते इति नान्तरीयकं द्रव्यं प्रतिपत्तव्यमिति द्रव्यनिर्देशे श्रुतस्य द्रव्यस्य कार्ययोगित्वमिति आकृत्याश्रयण[11]स्येदं प्रयोजनं अन्तर्भूतानन्तर्भूतयो रेफयो(:) प्रतिपत्त्यर्थम्।

## [12]यत्तद्रेफात्प(रं) भक्ते(:)।

रेफेण [13]चा(स्या)स्सामानाधिकरण्यं, [14]भक्तिः [15]रेफस्तस्या(:) यत्परमिति। अथवा अकारभक्तिरिकारभक्तिर्वा, तस्या यत्परमिति।

## अ(ड्)व्यवाय इत्येवं भविष्यति[16]।

एवं मन्यते—यथाकारोऽच्त्वात्[17] दीर्घप्लुतौ गृह्णाति एव(मज्)भक्तिमपि ग्रहीष्यति इति, आकृतिग्रहणे वा सर्वत्राकृतेर्भावात् अस्त्यत्र इदं दर्शनमित्यनेन दर्शनं ग्रहीतुं शक्यास्त एवामी[18] सन्निविष्टा इति, एतदुक्तं भवति(?)। येषामन्यत्रा एवमस्येति य प्रयत्नादन्यो (?)।

---

[1] Ms ननु रेव  [2] Ms-तिर्मा  [3] Ms-का
[4] Edn. omit प्रति  [5] Ms-षि  [6] Ms गवि-
[7] Ms काप-  [8] Ms-णंनं वद्यब्दत  [9] Ms आवृ
[10] Ms-ति  [11] Ms श्रयेण-  [12] Ms यत्तन्रेफात् य-
[13] Ms वा-  [14] Ms-भक्ता  [15] Ms रेफगस्तस्यान्यत्
[16] Edn. एव सिद्धम्  [17] Ms-रोषात  [18] Ms-मा

**व्यपवृक्ता अपि वर्णा भवन्तीति .**

एतदुक्त[1]मित्यनेन योजनीयम्। इदं तु वर्णतुरीयमन्यत्रादृष्टं, क्वचित्स[2]वर्णमपि नास्ति। नह्यत्र समुदायप्रयत्नात् अन्यः अवयवप्रयत्नो, नापि स्थानम्। ननु चेयान्[3] वर्णभागः शक्नोति जातिमुपव्यंजयितु[4] मिति।

**एतैरेवाक्षरसमाम्नायिकैरिति।**

प्रत्याय्या अपि आक्षरसमाम्नायिका[5] आकारादयः प्रतिपत्तव्याः। भक्ति(:) तु न प्रत्यायिका, न प्रत्याय्या[6] तदर्थो योगविभागः[7]।

**प्लुतावैच इदुतौ ॥वा॥**

अस्ति हि अत्र व्यपवर्गः। सत्यपि व्यपवर्गे यदाग्रहणं तत इदं वक्तव्यं, ऐच इदुतौ प्लुताविति[8]। सति तु ग्रहणे [9]ऐकारो गुरुस्तस्य योऽसा(व)च्[10] तदादि टित्संज्ञमिति "गुरोरनृत" (सू. ८.२.८६) इत्येव सिद्धमा[11]कारादीनां चा···मावाव्यपवर्गात्[12] (?)।

**क्रियत (एतत्) न्यास एवेति।**

एतत्प्रदर्शयति, यद्यपि गृह्यन्ते तथापीदं न सिद्ध्यति। एवं हि उक्तं "सन्ध्यक्षरेषु विवृतत्वात्" इ(ति)। तत्र सत्यपि समभागे भिन्नप्रयत्नत्वादसति ग्रहणे अच्त्वमेव नास्ति। कुतः प्लुतः ?। अथाप्युत्तरभूयस्त्वमेव(म) प्यर्ध्यर्धमात्रिकस्य नास्त्यच्त्वं, न चार्धमात्रायाः स्वस्यास्तस्यास्ति व्यपवर्गः(?)। तस्मात् यथान्यासाश्रयणमेव युक्तमिति।

**तुल्यरूपे संयोगे द्विर्व्यंजनविधिः ॥वा॥**

तुल्यरूपाव[13]यवत्वात् तुल्यरूपः संयोगः। नहि एकत्वात् संयोगस्य तुल्यरूपमस्ति[14]। अभिप्रायः—यथैवाकारादि(ष्व)व्यपवर्ग इति नास्ति अवयवगतो व्यवहार एवमिहापि तुल्य अव्यपवर्ग[15] इति। [16]आकृतिनिर्देशेनाल्पत्वमहत्वकृतस्य विशेषस्यानुपादानात्[17] समुदायो हलिति द्विर्व्यंजनाश्रया[18] संयोगसंज्ञा न स्यात्। एवं सति गुरुसंज्ञायामसत्यां[19] "गुरोरनृत" (सू. ८. २. ८६) इति प्लुताभावः।

**मात्राकालोऽत्र गम्यते, न च मात्रिकं व्यंजनमस्ति।**

---

[1] Ms-क्ता- [2] Ms-त्सा- [3] Ms-त्
[4] Ms-व्यनयितु [5] Ms-क [6] Ms-त्याया
[7] Ms-वित्याभागः [8] Ms-वेति [9] Ms एका-
[10] Ms-सोच् [11] Ms-द्धामो- [12] Ms-पसर्गात्
[13] Ms-रूप्यव- [14] Ms-पह्यमस्ति [15] Ms-वर्श
[16] Ms अ- [17] Ms-स्य। तुयायादात् [18] Ms श्रयोगसं- [19] Ms-मससत्यां

इहाकारादयस्तावत् [1]पाठादवगम्यन्ते, आकारादयोऽपि सन्तीति सामान्यतो दृष्टानुमानादस्ति हि [2]अजाकृति(:)दीर्घा यथा सन्ध्यक्षराणि। एतानि हि द्विमात्राण्येव [3]पठितानि। आप्लुतोऽपि को निर्दिष्टः(?) "ऊकालोऽज्झ्रस्वदीर्घप्लुत" (सू.१.२.२७) इति। तस्य ग्रहणमस्ति "अणुदित्सवर्णस्य" (सू. १. १. ६९) इति तत्रोपदेशात् विधानाच्च मन्यामहे,[4] शिष्टैरभ्युपगता एत उपदिष्टा इति। व्यंजनानां तु नोपदेशो, न ग्रहणं न क्वचित् विधानं अस्ति। अतः शिष्टैरनुपदिष्टाः कथं शक्या[5] निर्देष्टुमिति। एतस्य चेदं बाज(?) यथाकारादिषु एकप्रयत्नप्रेरितकरणः[6] ध्वनिः ध्वन्यन्तरमारभमाणः अनुपरत एव करणव्यापारे कालभेदं दर्शयति, नैवं व्यंजनेषु व्यंजनमुच्चार्य [7]पुनर्यत्नान्तरेण क (र)णं[8] व्याप्रियते व्यंजनान्तर इत्यत्राविप्रतिपत्तिः शिष्टानामेवं विशेषो यदि इहास्तल्उच्चारयति(?)। तत्र यथैवासकृत् अकारमुच्चार(य)न्पुनःपुनः करणं व्यापारयति एवं व्यंजनेष्विति।

**इह तु कथं, संय्यन्ता संव्वत्सरः तल्लोकं यल्लोकमिति।**

पूर्वत्र ग्रहणं नास्तीति अभावं प्रतिपन्नः, अन्तस्थास्तूपदिष्टा अण्सु (अ)तो[9] ग्रहीष्यन्ते समुदायं, तत्राकारवदिमे[10] प्रतिपादिताः शास्त्रेणेति।

**अत्रापि मात्राकालो गम्यते[11]।**

इदमप्यत्रास्ति, एकोऽत्रानुनासिक अपरो निरनुनासिकः[12]। सानुनासिको निरनुनासिकश्च भविष्यतीति[13] दुरुपपादमेतत्। तस्मादुपसंहृत्य करणं यत्नान्तरेण पुनः द्वितीयस्योच्चारणमिति नास्ति मात्राकालं ब्यंजनम्। असच्चेत्[14] कथं गृह्येत। विद्यमानो हि शक्यः सवर्णेन [15]ग्रहीतुम्। नहि मात्राकालः अकारः शक्तः मात्रमकारं ग्रहीतुम्। कुतः? अभवादिति।

**॥ हयवरट् ॥**

**अयं हकारो द्विरुपदिश्यते पूर्वश्चैव परश्च।**

पूर्वपरत्वं न वर्णान्तरापेक्षं, वर्णान्तरापेक्षायां[16] हि अकारं मुक्त्वा सर्वेएव[17] पूर्वे परे च।

**अड्ग्रहणेषु (ह)ग्रहणमिति।**

किंचिदत्र अड्ग्रहणं [18]निष्प्रयोजनमुच्चार्यते।

---

[1] Ms यावाद- [2] Ms अजकृति दार्घाः [3] Ms यविता-
[4] Ms-ह [5] Ms शस्या [6] Ms-तं करणं
[7] Ms पुनर्वृत्तातरे- [8] Ms कर्ण [9] Ms ताः
[10] Ms-दिमाः [11] Edn. गृह्यते [12] Ms-कश्चाच्च
[13] Ms ष्यतातति [14] Ms-श्चेत् [15] Ms गृ-
[16] Ms या- [17] Ms एवं [18] Ms निप्र-

[1]शःछोऽटीति,

अड्ग्रहणं चापि प्रयोजनवदुपन्यस्तं वाक्यकारेण। अत्र हि।

महाँ हि स

इति हकारस्यानण्त्वात् "आतोऽटि" (सू. ८. ३. ३) इति रुत्वं न स्यात्।

(उत्वे च) ॥ वा ॥

[2]अश्ग्रहणमपि तु प्रयोजयति "भो भगो" (सू. ८. ३. १७) इति। अत्र हि भो हसति इत्यत्रानश्त्वात्[3] "अशि" इति यत्वं न स्यात्। अर्थप्रदर्शनमात्रमिदं, न वक्तव्यं—

उत्वे च[4] हकारग्रहणमिति। यदि (च) किंचिदन्यत्राप्युपदेश इति।

एतत्प्रदर्श्यते—नह्यत्र वर्णानां रूपप्रतिपत्त्यर्थः पाठः[5]। किं तर्हि? शास्त्रप्रवृत्त्यर्थः। तच्च शास्त्रं सत्यनुपदेशे हकारस्य न व्यवतिष्ठत इति।

अयं रेफः।

उभयत्र प्रयोजनं[6] दोषाश्च सन्तीति प्रश्नः। [7]स्वर्नयतीति अनुनासिको णकारः प्राप्नोति। नह्यस्मिन् योगे परसवर्णग्रहणमस्तीति।

मद्रह्रद इति।

अत्र द्विर्वचने रेफस्य कृते असिद्धे[8] द्वित्वे[9] "रो रि" (सू. ८. ३. १४) लोपो[10] (नास्ति) इति द्वौ रेफौ श्रूयेयाता(म्)।

कुण्डं रथेनेति।

अत्र चानुनासिकेनैव परसवर्णेन भवितव्यमित्यस्य विशेषस्यानुपा[11]दानात् परसवर्णोऽ(न)नुनासिको रेफः प्राप्नोति। परसवर्णस्य असिद्धत्वात् "रो रि" लोपो नास्ति।

पूर्वोपदेशे [12]कित्वप्रतिषेधः ॥ वा ॥

[13]पूर्वोपदेशे सति वकारोऽपि रलिति।

व्यलोपवचनं च ॥वा॥

वल्यनन्तर्भावाद्रेफस्य। व्यलोपसूत्रं वकारार्थम्[14] प्रत्याख्यातं, न [15]यकारार्थमिति।

---

[1] Ms छश: [2] Ms अज्ग्र- [3] Ms-त्र नञ्त्वात्
[4] Edn.omit च [5] Ms याव: [6] Ms-जन-
[7] Ms स्वर्ण- [8] Ms असिद्धत्वे [9] Ms-त्वे द्विर्वचनं रो
[10] Ms लोप [11] Ms-दानत परसवर्ण- [12] Ms कित्व-
[13] Ms पूवोप- [14] Ms-र्थं: [15] Ms-व्यका-

## रेफोष्मणां सवर्णा न सन्ति ।

ननु चोक्तं, एकत्र सावर्ण्यस्याचोदितत्वात्, अन्यत्रानुना[1]सिकस्य (च), भवितव्यं रेफणकाराभ्यामिति । सत्यमेवमेतत् । [2]अयं तु द्विर्वचने परिहारं ब्रुवन् तयोरपि प्रतिविधत्ते ।

## नेमौ रहौ [3]कार्यिणौ ।

## किं तर्हि ? निमित्तमिमौ रहौ द्विर्वचनस्येति ।

अस्मिन् हि वाक्ये "अचो रहाभ्याम्" ( सू. ८. ४. ४६ ) इति अत्र रेफहकारौ निमित्तत्वेनाश्रितौ नोत्सहेते[4] अस्मात् वाक्यात् कार्यित्वं प्रतिपत्तुम् । कुतः ? अस्मिन् वाक्ये व्यवहार इति निर्देशे रेफहकारयोरनुमीयमानत्वात्, रहाभ्यामिति निमित्तत्वेन साक्षात् चोदितत्वात् ।

## तद्यथा ब्राह्मणा भोज्यन्तां, माठरकौण्डिन्यौ परिवेविषातामिति ।

अस्मिन् प्रकरणे वाक्ये भुजिक्रिया तयोरनुमीयमाना साक्षाच्चोदि[5]तया परिवेषणक्रियया[6] बाध्येत इत्येतस्मात् वाक्यात् न तौ भुजिं प्रति कर्तृत्वमनुभवत इति । यद्येवं दध्युदके दोषः । "इको यणचि" (सू. ६. १. ७७) इत्यस्मिन् निर्देशे अजिति निमित्त[7]भावं प्रति अनु(मीय)माना इकः कार्ययोगित्वं प्रति साक्षात् निर्दिष्टा इति बाधितव्यो निमित्तभावः कार्ययोगित्वेन । अथ मतमेतत्, एकस्य निमित्तभावात् [8]कार्ययोगित्वं नास्ति, इह तु भिन्नावेवैताविति[9], इहापि मद्रह्रदे हकारो निमित्तमन्य एव तस्मात् परो रेफो द्विर्वचनं किमेवं न प्रतिपद्यते ? दर्शनभेदा(द)दोषः । आकृतिः [10]पदार्थः, सकृल्लक्षणं प्रवृत्तं, समुदाये लक्षणं प्रवर्तते, ज्ञानांगं[11] शास्त्रमित्येतस्मिन् दर्शन इदमुच्यते "रेफोष्मणां सवर्णा न सन्ति," "नेमौ रहौ कार्यिणौ" इति । कथमिह "यरोऽनुनासिकेऽनुनासिको वा" (सू. ८. ४. ४५) इति चेत् शास्त्रमनपेक्षितप्रयोगं[12] रेफो संध्यमाणा नास्ति शास्त्रत्वे पुनर्न प्रवर्तते(?) यतः प्रतिपत्तिः स्यात् । यथोक्तं "झकारभकारौ पदान्तौ न स्तः" (भा. झभञ्)इति[13]कुट्नुटौ न भविष्यत इति । एवं "अनुस्वारस्य ययि परसवर्णः" (सू. ८. ४. ५८) इति अनुस्वारसमुदायं परसवर्णसमुदायं निश्चित्य शास्त्रं प्रवर्तते । तत्र "स्थानेऽन्तरतमः" (सू. १. १. ५०) इति समुदायेनानुनासिको[14] निमित्तमान्तरत(म्य)स्य । भवति हि समुदायः केषुचिदवयवेषु तद्वत्सु तद्वान्, यथा "गोमदिदं नगरं" दण्डिनो[15] गच्छन्तीति; एवं [16]परसवर्णनान्तर(तमेन) भवितव्यमिति

---

[1] Ms-त्रापरना- [2] Ms दयं तु योक्त द्वि- [3] Msकार्यि- [4] Ms-त्साहेते
[5] Ms-ताया. [6] Ms-याया [7] Ms-त्तं [8] Ms कार्यायो-
[9] Ms-वेवेकाविति [10] Ms यदार्शः [11] Ms-ग [12] Ms -गे
[13] Ms कुटमुटौ [14] Ms-क- [15] Ms न गूरंकुंडिनो; cf MB.I.2.45. [16] Ms यस्सव-

प्रतिपत्तिकाले रेफस्तथाभूतो नास्तीति अपरार्था ते(?)। सकृल्लक्षणव्यापार इति नास्ति रेफोऽनुनासिक(:)। एवं[1] "अचो रहाभ्याम्" (सू. ८. ४. ४६) इति एतदपि शास्त्रमनपेक्षितप्रयोगम्[2]। किमस्ति प्रयोगे रेफहकारयोरेकस्मिन् सान्निध्यम्? नास्ति। एतावति प्रवर्तते, रहाभ्यामुत्तरस्य यरो द्वे भवत इति। तत्र यथैव यरो निवर्तिता एवं रेफोऽपीति[3]। एतावति ज्ञाते पुनः प्रवृत्त्यभावात्, कया प्रवृत्त्या हकारात्परो रेफो द्विर्वचनं प्रतिपद्यते? दध्युदकादिषु पुनः व्यक्तिः[4] पदार्थः, प्रयोगांगं[5] शास्त्रमसकृल्लक्षणं प्रवर्तते, प्रतिलक्ष्यं यानि भिन्नानि लक्षणानि आलस्यात्तु नोच्चारितानीति अनेन दर्शनेन प्रतिपत्ति[6]रिति। अतश्च "न वेति विभाषा" (सू. १. १. ४४) इति पक्षे अभ्युपगमः पक्षे प्रत्याख्यानम्। युगपल्लक्ष्ये[7] लक्षणं प्रवर्तत इत्ययमावेद्यान्यः(?)। मद्रह्रदादिसिद्धिस्तेनेत्यज्ञापिता भवति। प्रतिलक्ष्यं व्यापारे शास्त्रस्य प्राकृती भवति सिद्धिः दध्युदकादिषु यद्व्योगस्तस्मा[8]दशिष्योऽयम्(?)।

**इमे अयोगवाहाः न क्वचिदुपदिश्यन्ते।**

प्रत्याहारेऽन्यवन्न पठ्यन्ते[9]।

**श्रूयन्ते च**

प्रयोगे, शास्त्रे च विधानकाले "खरवसानयोर्विसर्जनीयः" (सू. ८. ३. १५), "कुप्वोः कः पौ" (सू. ८.३. ३७) इति। तेषां कार्यार्थमुपदेशः कर्तव्यः। विधानादेषां[10] साधुत्वं स्यात्। यत्तु कार्यं प्रत्याहारप्रतिबद्धं तन्न स्यादिति।

**के पुनरयोगवाहाः?**

पूर्वाचार्यसंज्ञेयम्। महती च मूर्नून(?) मियमन्वर्था[11]इति पृच्छति—

**कथं पुनरिति। (यत्) अयुक्ता वहन्त्यनुपदिष्टाश्च श्रूयन्ते।**

इह केचित्[12] वर्णा युक्ता वह(न्ति) [13]लक्षणेनवा आकृत्या कार्यं[14] प्रतिपद्यन्ते, यथाका[15]रादयः; ए(वं) हि "अणुदित्सवर्णस्य" (सू. १. १. ६९) इत्यनेन चायुक्ता वहन्ति अकाराकृतिसमन्वयात्। [16]केचित्पु(न)रुप[17]दिष्टाः श्रूयन्ते यथाकारादयः, एवमिमे न लक्षणेन युक्ता नाप्याकृत्या नाप्युपदिष्टा इति। अथायोगवाहशब्दे को व्यापारः अनुपदिष्टत्वस्य? एषोऽभिप्रायः— द्विविधो योग(:) लक्षणयोग उप(देश)योगो वा द्विविधोऽपि एषां नास्तीति। अन्येषां ग्रन्थः—

---

[1] Ms मेवं [2] Ms-योगे [3] Ms याति-
[4] Ms-प्रवृत्तिः [5] Ms-गांग [6] Ms–यति
[7] Ms-क्षे [8] Ms-दाशि- [9] Ms-रेर्दवन्न पद्यते
[10] Ms-नादितिर्षा- [11] Ms-र्थो [12] Ms-त
[13] Ms लक्षणैकयावाकृ- [14] Ms काय [15] Ms-क-
[16] Ms क्वचि- [17] Ms रुपा-

**यदयुक्ता वहन्ति अनुपदिष्टाः श्रूयन्त इति ।**

ते अयुक्ता वहन्ति इत्यस्यै[1]वार्थमनुपदिष्टाः श्रूयन्त इत्यनेन प्रदर्शयन्ति। उपदेशश्च शास्त्रे लक्षणेन [2]पाठेन वा। स चैषां नास्तीति।

**(शर्षु जशभावषत्वे ॥ वा ॥)**

[3]जश्त्वदशायां [4]झलत्वानुरोधेन [5]जश्त्वमुच्यते, [6]जश्त्वं त्वत्रापि उपदेशेन सिद्धम्।

**उपध्मानीयादेः ।**

यदि "पूर्वत्रासिद्धी [7](य)मद्विर्वचने" (भा. ६. १. ९), अथापि पूर्वं द्विर्वचनं उभयथापि अनिष्टं रूपम्।

**निपातना(देव) सिद्धमिति ।**

को वृत्तान्तो द्विर्वचने ? अत्रायमभिप्रायः—[8]निपातनं हि लिंगं तत्रै(त)त् प्रतिपत्स्या[9]महे, अन्येनास्य भत्वं भवतीति। केन पुनः ? "ह्रस्वादङ्गात्" इति सिचो लोपः। "ह्रस्वोऽपो मन्त्रे" (वा. ८. २. ३२) इति वाक्यशेषोऽनुमास्यते, [10]उद्जेश्च दकारस्येति। [11]नन्विदमेव निपातनं प्रायकस्यस्त्यस्येति (?)।

**अकुत्वविषये (तत्) निपातनमिति ।**

विशिष्टविषयमनुमानं कल्प्यते[12]।

**गमेरेत(त्) द्यु(प)सर्गा(त् ड) इति[13] ।**

संप्रति यद्यपि[14] निपातनमेव[15] प्रतिपादकं तथापि दका(रो)पदेशसा[16]मर्थ्यात् निपातनं प्रतीक्षिष्यते [17]द्विर्वचनमिति।

**अवश्यं नुमो ग्रहणं कर्तव्यम् ।**

एतस्मिन् विषये नुमोऽनुस्वारेण भवितव्यम्। तत्रैवमर्थमेव नुमो ग्रहणं—यत्रैवानुस्वारः तत्र यथा स्यादिति। [18]शर्व्यवाये तु सत्यनुस्वार मात्रे प्राप्नोति।

**पुंस्विति[19] ।**

तस्मा(त्) नुमो ग्रहणमवस्थितम्।

---

[1] Ms-स्ये- [2] Ms यावेन [3] Ms जस्त्व- [4] Ms षत्वानु-
[5] Ms जस्त्व- [6] Ms जस्त्वं [7] Ms-द्व-
[8] Ms नियतेनं लिलिगं तत्रेन् [9] Ms-स्य- [10] Ms उषश्च
[11] Ms-नत्वि- [12] Ms लभ्यते [13] गमेरेष ह्युरर्गाहुति
[14] Ms पद्यं वि- [15] Ms-पानमेनमेनमेवं [16] Ms-पद असा-
[17] Ms द्विवच- [18] Ms सव्य- [19] Ms पुंस्विदिति

## अथवाऽविशेषेण उपदेशः कर्तव्यः ।

नैतदन्येनोच्यते, अट्भ्यः [1]शभ्योंऽन्यत्रापि कर्तव्य इति । किं तर्हि ? प्रयोजनगतो विशेष उदाह्रियते । " [2]णत्वं" प्रयोजनं" [3]जश्भावषत्वे" प्रयोजने[4] इत्येन्न वक्तव्यं, अट्सु चेदुपदिश्यन्ते शर्षु[5] च यान्यविशेषप्रयोजनानि तानि ५ सर्वाणि सिद्धानि भवन्तीति [6]अट्सूपदेशादेव हल्त्वं ततः संयोगसंज्ञास्ति स्तोवति(?)। अट्सु चाल्व (?)।

## निर्दिश्यमानस्यादेशा[7] भवन्तीति ।

यथा [8]वैयाघ्रपद्य इति । द्विर्वचनं,

## उरःकेणेति[9] ।

१० श्रुतिभेदमध्यव(सा)योच्यते[10]।

## [11]व्यूढोरस्केनेति ।

[12]अल्विशेषे सामान्यमल्त्वमस्ति, विसर्जनीयश्च स्यादुपदेशादलिति णत्वमण्वि(ष)यं, तत्र[13] नास्ति स्थानिवद्भाव इति ।

## किं पुनरिमे वर्णा अर्थवन्तः ?

१५ सति निमित्ते प्रयोजने च प्रश्नः । तत्रेह किं निमित्तं वा प्रयोजनम् ? उच्यते—इह किंचित्प्रत्यक्षत उपलभ्यते । [14]किंचिदनुमानात् अस्तीति व्यवस्थाप्यते । किंचित्प्रत्यक्षाभिमतमनुमानात् नास्तीति प्रतीयते । वृक्षादिषु च समुदायेषु वर्णानां प्रत्यक्षतो न कश्चिदर्थ उपलभ्यते । तत्रानुमानाद[15]स्तित्वमवस्थाप्यते, यथा अनुपलभ्यमानाया आदित्यगतेर्देशान्तरप्राप्त्या[16] अलात- २० चक्रवत् व प्रत्यक्षाभिमतस्यापि त्वनुमानादेव क्रियते, क्रियस्ययितरूपस्य दर्शनात्(?) तद्यथा, रथचक्रमुपरतक्रियमपि [17]चक्रबुद्धिनिमित्तं [18]नैवमलातचक्रः । तस्मात् भ्रान्तिरेषा यद्येष व्यापिनो रूपस्योपलब्धिः किल च रू(प)स्य (?) सहात्यन्तमवि[19]योगात्, स्पर्शस्य । स चक्रे[20] हि यथैव रूपोपलब्धिप्रबन्धः [21]एवं स्पर्शोपलब्धिप्रबन्धोऽपि नैवमलातचक्रे, विषंशिष्टदेव २५ (स्प)र्शस्यैव[22] हि स्पर्शोपलब्धिः (?)। अर्थवत्ता च[23] व्याकरणे [24]सर्वत्रा-

---

[1] Ms षभ्यो- [2] Ms नत्वं [3] Ms जष् [4] Ms-जन
[5] Ms षट्सु [6] Ms षट्- [7] Ms-दशा
[8] Ms वेप्याघ्रयद्य [9] Ms-केणाति; Edn. उरः कः [10] Ms-भेदमध्यवायोव्याना
[11] Ms व्युगेरः । कणेति [12] Ms अटिवि- [13] Ms-ण्वियंस्तत्र
[14] Ms कविदः उपलभ्यमानादस्तीति [15] Ms-दा- [16] Ms-दौषांतरप्राप्या
[17] Ms वक्रनुद्विनि- [18] Ms निवामालातकचक्र [19] Ms-त्यतमपि-
[20] Ms चक्रं [21] Ms एवस्पर्शेपिलाच्चप्रबंधोपि लब्धिनैव
[22] Ms शस्यैव [23] Ms-वताम- [24] Ms सर्वासवानुमानिका

नुमानिकी। अन्वयव्यतिरेकाभ्यां धात्वादीनां, वर्णानामपि[1] शक्यते अर्थम् कल्पयितुं, "संघातार्थवत्त्वात्" इति[2]। प्रयोजनं चार्थवतः[3] प्रातिपदिकसंज्ञा, तदाश्रया च [4]स्वाद्युत्पत्तिरिति। अर्थवत्ता वर्णानां यदि त्वा(नुमानिकी) समुदायार्थादसंबद्धे[5]नैवार्थेनार्थवत्ता सुरांगवत्। अथवा समुदायसंबन्धि-
५ भिरेव अर्थैर्यथा भवति तदा समुदायसंबन्धिनोऽर्था (अ)वयवानां प्रविभज्यन्ते—क्रियां धातुराह, साधनं प्रत्यय इति। एवं समुदायो द्रव्यं ब्रवीति, जात्यादींस्त्व[6]वयवान् वर्णाः। अथवा यथद्व(?) [7]पदानि सापेक्षाणि तमेवार्थमाहुः एवं तमेवार्थं वर्णा अपि परस्परापेक्षा ब्रूयुरिति।

## एकवर्णानामर्थदर्शनात् ॥वा॥

१० अन्वयव्यतिरेकाभ्यां हि अर्थो दृश्यते। किमत्र दर्शनं हेतुः? यदि दर्शनं येष्वेव दृश्यते तेषामेवार्थवत्ता प्राप्नोति, नान्येषाम्। तस्मादेकवर्णत्वं च हेतुः, इह धात्वादीना[8]मेकत्ववर्णत्वाभ्यां सहचरिता अर्थवत्ता दृष्टा। अमी च एकत्ववर्णत्वाभ्यामनुगताः। तस्मादेषामप्यर्थवत्तानुगमेन भवितव्यमिति। स अयं तावत्त्वेत धर्मः (?)। अयं त्वस्याभिप्रायः—इह योऽर्थात्मा
१५ केनचित् धर्मेणायोग्यः सोऽत्यन्तमयोग्यः, तद्यथा[9] परमाणुरुपलब्धि प्रत्ययोग्यः सर्वत्रैवायोग्यः स्यात्। तस्मात् प्रतिपद्यमानेन धर्मेण यो वर्ण इति, सा तु कदाचिदर्थवत्तो[10]पलभ्यते केवलस्यैव सापेक्षस्य।

## वर्णव्य(त्य)ये चार्थान्तरगमनात् ॥वा॥

यथा[11]राजव्यत्यय इति एकस्य चापगमे अन्यस्य चोपगमे भवति,
२० एवमिह कस्यचित् वर्णस्यापगमे वर्णव्यत्ययः परिगृहीतः। इहार्थवतामुपगमापगमाभ्यामर्थान्तरगमनं दृष्टं, यथा प्रतिलोमः अनुलोम इति [12]लोमशब्दे व्यवस्थिते अनुप्रत्योरर्थवतोः उपगमापगमाभ्यामर्थान्तर(स्य) गति(ः) भवति प्रातिकूल्यस्यानुकूल्यस्य[13](च), एवमिहापि[14]ऊपशब्दे अवस्थिते ककारसकारयोः व्यत्यये अर्थान्तरगतिर्भवति। तस्मात् अस्त्येतयोरर्थवत्ता। केषांचित् ग्रन्थः—

२५ **यः कूपे कूपार्थः स (क)कारस्येति,**

त एवं वर्णयन्ति, यद्यपि सापेक्षस्य [15]तथापि असौ भवतीति। अन्येषां ग्रन्थः—

**सककारस्येतिः**

त एवमाहुः, सह ककारेणार्थवत्ता इति, सह प्रतिशब्देनानुना च[16] यथेति।

---

[1] Ms-पि सावानुमानिकाश- [2]-त्वादेति [3] Ms-वछतो [4] Ms स्वाःद्यु-
[5] Ms-बाद्धो- [6] Ms-दीश्च [7] Ms यदानिसप- [8] Ms-दाना-
[9] Ms तदाप्या- [10] Ms-र्थवन्तो- [11] Ms राजा- [12] Ms लाम-
[13] Ms कूलस्या [14] Ms उपदेशशब्दे [15] Ms तस्यपि [16] Ms-नुयाव

**वर्णानुपलब्धौ[1] चानर्थगतेः[2]॥वा॥**

इहार्थवतोऽनुपलब्धौ[3] सोऽर्थो [4]न गम्यते। यथा पिबति विपिबति इति विरत्र कुलावकमापिबतां(?) सोऽयं पृथक्करोतीति विशिष्टानुपलब्धौ पिबतीति पृथग्भावो न गम्यते, एवं [5]प्रतिष्ठते [6]तिष्ठतीति। इह च ऋक्ष इति वकारा[7]नुपलब्धौ मूलादिसमुदायो न गम्यते। तत्रैतदुक्तं भवति—सर्वे वर्णाः सर्वाभिधानशक्तियुक्ताः। तेषां तु तस्यां तस्यामानुपूर्व्यां[8] काचित् शक्तिस्तिरोभवति काचित् आविर्भवतीति। अनर्थगतेरिति चासमर्थसमासः, अर्थस्यागते(रि)ति। अस्य पूर्वस्मादेष विशेषः, पूर्वत्र अपायोपगमात् इह त्ययावति व मात्रमेवेति[9](?)।

**किं तर्हि उच्यते, अन(र्थ)गतेरिति।**

एवं हि भवानाह,

**सोऽर्थो न गम्यत इति।**

एवं च ब्रुवता इदमुक्तं—अर्थान्तरं न गम्यत इति, तत्र किमुच्यते अर्थस्यागतेरिति।

**न साधीय[10] इति।**

लौकिकी वाचोयुक्तिः। तद्यथा कश्चित् किंचिदाह, किमनेन गतेन नायं करिष्यतीति। कश्चित्प्रत्याह, अयमेव गच्छतु, सुतरां कार्यं करिष्यतीति।

**[11]तस्यार्थस्तदर्थः।**

तस्य [12]शब्दस्यार्थ(स्य) [13]प्रक्रान्तस्यागतेरिति। अथ मन्यसे, तस्येति किं समुदायो [14]निर्दिश्यते, अथ वर्ण इति; तस्यैव वस्तुनः साध्यत्वात् [15]अयुक्तमिति [16]अत आह—

**सोऽर्थस्तदर्थः।**

योऽर्थः प्रक्रान्तः सोऽर्थत्वेनाश्रितः। स एव वकारापाये न गम्यत इति।

**तद्यथोष्ट्रमुखमिति[17]।**

अत्र नोष्ट्र एव मुखं संभवतीति इवशब्दो निर्वर्तते[18]। स च समुदाय-शब्दो नान्ययत् अश्वावयवे वृत्त इति मुखशब्दो(?) अवयवे मुख एवेत्ये(व)मपि

---

[1] Ms-लब्धि [2] Ms-नर्थागतेः [3] Ms-लब्धो
[4] Ms-नु- [5] Ms प्रविष्टते [6] Ms तिष्ठताति
[7] Ms-कारो नु- [8] Ms-पूर्व्या [9] Ms-मेरवति [10] Ms साधीयत
[11] Ms अस्या- [12] Ms शब्दस्यर्था: [13] Ms प्रक्रात- [14] Ms निदिश्य
[15] Ms प्रयु- [16] Ms तत [17] Ms मुख इति [18] Ms निवर्तात

[1]विशेषेणोच्यते, एवमिहापि प्रकृत्यर्थे तस्यानभिधानमाश्रीयत इति सामर्थ्यात्[2] गम्यत इदं—तत्रैव [3]तच्छब्दार्थमुपादाय प्रवृत्त इति।

## संघातार्थवत्त्वाच्च ॥वा॥

दर्शनमदर्शनं[4] च हेतु(ः)। यथा तिलेऽस्ति काचित्तैलमात्रा, एवं वर्णेष्वप्यस्ति काचिदर्थसंबोधनमात्रा। अनेकवर्णोच्चारणे तु परिपक्वा बुद्धिरर्थं प्रतिपद्यत इति।

## यदि तर्हि इमे वर्णा अर्थवन्तः, अर्थवत्कृतानि प्राप्नुवन्ति।

एतदुक्तं भवति—प्रयोगे अर्थवत्तायां सत्यां न दोषोऽस्ति, शास्त्रेषु किंचि(त्)[5] विनश्यतीति। स्यादेषा बुद्धिर्न संज्ञा दोषायेत्यत आह, [6]का(र्या)र्थत्वात् संज्ञायाः स्वाद्युत्पत्तिः स्यात्। श्रवणं [7]तु न चोदयति, विभक्ते[8]र्लुका भवितव्यम्। ननु चार्थवत्समुदायानां नियमार्थ[9](त्वा)त्तेन वाक्यस्यार्थवत[10] इति? नैष दोषः। एककालैव प्रातिपदिकसंज्ञा, वर्णानां समुदायस्य चेति नास्ति सुबन्तसमुदायत्वम्। एकत्वमेषामर्थः। अथवा अविशेषेणोत्पद्यन्ते, उत्पन्नानां नियम इति अस्ति विभक्तियोगः। ननु च समुदायादुत्पद्यते[11] विभक्तिः नावयवेभ्य(ः) समुदायद्विर्वचनवत्। सत्यमेवमेतत्[12]। अवयवा(ः) पृथ(क्प)दत्वेनार्थिनः। तत्र यदि मन्यसे समुदाये द्विरुक्ते अवयवा अपि द्विरुक्ता इत्येवं समुदायस्य पदत्वे अवयवानामपि पदत्वं इत्यस्त्येव पदकार्यम् न यदि इदम्;—

## संघातस्यैकार्थ्यात् सुबभावो [13]वर्णात् ॥वा॥

[14]केचित् वर्णयन्ति—संघातस्यैकत्वाद्यदेवम[15]प्यर्थो वर्णानां, जात्यादयो नैकत्वप्रयुक्ताः। कार्यकाले संज्ञापरिभाषयो(ः) प्रातिपदिकात् "द्व्येकयो(ः) द्विवचनैकवचने" (सू. १. ४. २२) इति; कथमेकत्वरहितानां अव्ययानां विभक्तिरिति? अव्ययादाप्सुपो [16]लुग्वचनं लिंगं सुबुत्पत्तेरिति। अपरे वर्णयन्ति—वर्णाः सत्यपि अर्थवत्त्वे(?) वस्तुमात्रसन्निपात एतावत् गम्यते—प्रक्रान्तं किंचित् वक्तुं वस्त्विति (?)। तस्य तु वस्तुनः संख्याधिगमः समुदायादेव[17]। तस्मात् समुदायस्यैकत्वमर्थ इति। अन्ये वर्णयन्ति—एकमेतदेकत्वं वर्णानां समुदायस्य च। तत्र समुदायादुत्पद्यमाना विभक्तिर्यदि न स्यात् सर्वसाधारणमेक(त्व)मभिव्यक्तमुत्पद्यते विभक्तिः यत(ः) सुसमर्था यथा

---

[1] Ms विशेष- [2] Ms-ध्यात [3] Ms तत् शब्दा- [4] Ms-र्शने
[5] Ms किंचि [6] Ms कार्यत्वा- [7] Ms नु न खाद-
[8] Ms-क्ति- [9] Ms-मार्था- [10] Ms-स्याप्यवत [11] Ms-द्यांत।
[12] Ms सत्यामवम तं ति [13] Ms वर्णानां [14] Ms किंचिद्दर्शयत्ति
[15] Ms-त्वाच्चा इवम- [16] Ms लुक्। वचन [17] Ms-यादिव

चैको द्रष्टा नैकेनैव प्रदीपेन[1] कार्यं कुर्वन्प्रदीपान्तर[2]मुपादत्ते। इह[3] भवन्तस्त्वाहु(:)।

## संघातस्यैकत्वमर्थः।

सहैव [4]वर्णैर्यथा नैकाचां समुदाय एकाच्[5] तेनैवावयवा[6] अपि येनैव एकत्ववता समुदायो[7]ऽर्थवान् तेनैवावयवा अपि, शक्नोति वावयवान् अनुमा-[8]नात् सं(स)प्रष्टुं समुदायादुत्पद्यमाना विभक्तिः। न च पदसंज्ञा अवयवानाम्। कुतः? पदसंज्ञाविधानस्य [9]शाब्दत्वात् शाब्दं चेद्विधानं पदसंज्ञायां यस्मात् सुप्तिङ्विधिः यथैवांगसंज्ञायां शब्दवति(?)। काकदन्तपरीक्षणमिदं, "किं[10] वर्णा अर्थवन्तोऽनर्थका" इति। यद्यर्थवन्तो यद्यनर्थका न कश्चि(त्) दोषः।

## अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः[11] ॥वा॥

अनुमाना[12]दप्येषामर्थवत्त्व नै(वो)प[13]लभ्यते नहि क्ष इति कश्चिदर्थो[14] वि(ट)पी लक्ष्यते यथा भवतो भवन्तीति स सत्तान्वयिनाम्(?) तस्मा(त्) दशदाडिमश्लोकवत् प्रत्यक्षानुमानाभ्यामनर्थका वर्णा इति।

## प्रतिवर्णमिति

वाक्ये श्रुतस्य [15]प्रतेर्लक्षणादिषु कर्मप्रवचनीयत्वात् पृच्छति—

## किमिदं प्रतिवर्णमिति।

इतरो द्विर्वचनेन वीप्सां दर्शयति,

## वर्णं(वर्णं) प्रतीति।

वीप्सा च समासे [16]निवर्तते उक्तत्वात् "सप्तपर्णः अष्टापदमिति[17]" यथा।

## वर्णव्यत्ययापायोपजनविकारेषु [18]चार्थदर्शनात् ॥वा॥

इति। नायमानर्थक्यस्य साधको[19] हेतुः। किं तर्हि? [20]परेणोक्तस्य व्यभिचारहेतुरयम्, व्यत्ययश्च इहावस्थितयो(:) एकस्मिन् समुदाये आदेर-[21]न्त्यत्वमन्त्यस्य चादित्वमिति। कालव्यत्यासेन प्रयोगः भवितादि(षु)। धात्वा-

---

[1] Ms निकानेव प्रवीमेन [2] Ms-न्मदीयात्तर-
[3] Ms भवतस्वा- [4] Msवर्णोर्यथानेवाचां [5] Ms एकाच
[6] Ms-वयत्रा [7] Ms-योयवान् [8] Ms-नात स
[9] Ms शब्दत्वात् शब्दं चद्वि- [10] Ms-मकि [11] Ms-लब्धि:
[12] Ms-दाथषा- [13] Ms-वंतानिप- [14] Ms–र्थे
[15] Ms प्रतिर्ल- [16] Ms निर्वर्त- [17] Cf. MB. II.3.1. [18] Edn. omit च
[19] Ms-क्यप्रसावको [20] Ms परिणो- [21] Ms-न्त्यत्यत्व-

दिभ्यः अन्येषां वर्णानामर्थवत्तायां इदमनुमानमुक्तं भवति। इह सति वर्ण-व्यत्यये अर्थव्यत्ययो न दृश्यते। यदि च वर्णाः प्रत्येकमन्योन्येनार्थवन्तः स्युः यथैवा द्यन्तावन्तादी[1] इत्याद्यन्त[2]प्रयोगभिन्नः संप्रत्यय, एवमिहापि स्यात्। अथ मन्यसे, एक एवार्थः सर्ववर्णेषु प्रत्येकं परिसमाप्तिरिति; एवमपि व्यत्ययस्य वैचित्र्यम्। क्वचिदर्थान्तरगतिः कूपादिषु, क्वचित्तस्यैवार्थस्य गतिस्तन्त्वादिषु, क्वचिदानर्थक्यमेव काकः कका इति। अपाये[3] यथैव वकार स्यार्थान्त[4]रगतिश्च एवमिहापि पापो घ्नन्तीति(न) हकारस्य तदर्थान्तर-गतिरस्ति। तस्मादनुमानं (न) भवत्यर्थवत्तायाः।

[5]लविता [6]लवितुमिति।

अर्थवतो हि पदस्य तु उपज नेऽर्थस्यापि[7] उपजनो दृष्टः, दत्तो यज्ञदत्त इति। शब्दश्चानुमानिक्यार्थ[8]-वत्तया प्रवर्तमानः शक्त्याधानं(?) वा यथौपगव इति। न चैवमागमः। तस्मात् वर्णस्य कुतोऽर्थवत्ता? विकारः सूपादिभिः समानोऽत्रापि कश्चित् [9]वर्णोऽपैति कश्चिदुपजायते न चार्थान्तरगतिः।

## उभयमिदं वर्णेषूक्तम्।

एतत्पृच्छति, किं धात्वादीनामिदं प्रतिपत्तव्यम्? सर्वेऽर्थवन्तो[10]ऽनुप-लब्धिस्तु कस्माच्चित् निमित्तादिति, आहोस्वित् क्वचिदानर्थक्यात् सर्वत्रा-नर्थक्यमिति, धात्वादिषु भ्रान्तिरिय[11]मलातचक्रवदिति।

## उभयमित्याह।

एतत्प्रतिपादयति अर्थस्य उपलब्ध्यनुपलब्धी[12] भिन्नविषये द्रष्टव्ये। यस्य व्यावहारिकी अर्थवत्ता शक्या अनुमानात्तत्र कल्पयितव्या। दृष्टश्च समानेऽर्थे सर्वस्मिन् कस्यचित्तदर्थयोगः कस्यचित् नेतीदमाह—

## समानमीहमानानामिति।

## संघातान्तराण्येवैतानि।

तत्त्वकथनमेतत्। यत्र हि आनुमानिक्यर्थवत्ता तत्रान्वयिनः शब्दस्य संभवे भूयिष्ठोऽर्थान्तरो यो दृष्टः कश्चिदेव तु विशेषः प्रत्ययव्यभिचारे के पक्तिः पचनं पाक[13] इति लिंगविशेषमात्रं[14] प्रत्ययकृतं एवमिह ऊपशब्दानुगमेन कश्चिदर्थानुगमो दृश्यते। तस्मान्नैतत्प्रतिपत्तव्यं, यूपशब्दे व्यवस्थिते वर्णव्यत्यय(:)।

## इदं खल्वपि भवतेति।

---

[1] Ms-द्यत्तावत्तादी [2] Ms द्यत्त [3] Ms-यो [4] Ms-रस्येक्षांत-
[5] Ms भवि- [6] Ms भवि- [7] Ms-जानेर्थास्यापि [8] Ms-निक्यर्थ-
[9] Ms-यैति [10] Ms-वतो- [11] Ms-मतोतवक्र-
[12] Ms-लब्धा- [13] Cf. MB. I.3.1 [14] Ms-मात्र-

इदं प्रतिपाद्यते—समुदायान्तर[1]त्वेऽनभ्युपगम्यमाने आनर्थक्यमेव सुतरामापद्यते, बहूनां शब्दानां आनर्थक्याभ्युपगमात्। एष हि न्यायो [2]यदूपशब्दो व्यवस्थितस्तमर्थं ब्रूयात्, न चै(त)त् ब्रवीति, आनर्थक्यमभ्युपगतं भवतीति। संघातार्थवत्त्वादित्यस्य

परिहारं वक्ष्यति।

"[3]दृष्टा हि [4]अत(द)र्थेनापि गुणेन गुणिनोऽर्थवत्ता[5]" (वा. १. २. ४५) सुरांगवत् रथांगवदिति।

---

## [6]प्रत्याहा(रे)ऽनुबन्धानां कथमज्ग्रहणेषु न।

एतेऽपि हि अत्र सन्निविष्टाः [7]पठिताः सन्निहिताश्च। कार्यार्थश्चा-[8] सकृत् उपदिष्टः हकारः एव [9]ममी अपि कार्यार्थं बहुकृत्व उपदिश्येरन्[10] इति।

## आचारात् ॥ वा ॥

आचारादिति[11] त(त्)प्रवृत्तिः, एवमाचार्याः प्रवृत्ताः।

## [12]यदेष्वच्कार्याणि न कृतवन्तः।

"तृषिकृषिमृषेः[13]" (सू. १. २. २५) इति। तत्र यथैव निपातनं बाधकं सामान्यप्राप्तस्य णत्वस्य सर्वनामानीति[14], एवं सत्यपि ग्रहणे बाधकं निपातनं यणादेशस्य हल्षु इतीयमेका कल्पना। अथवा "आचारादि(ति"इद्)मवसीयते—अप्र(यो)जकानामेषां इहस्थानामुपदेश इत्यकारादय एवात्र प्र(यो)जकाः "अदिरन्त्येन सहेता" (सू. १. १. ७१) इति, न एते।

## अप्रधानत्वात् ॥ वा ॥ इति।

अनेन शेषशेषिभाव आख्यायते। शेषः (वि)शेषणं (अन्यं) प्रति विशेषणत्वेनोपात्तो न शक्यः[15] तुल्यवत्प्रसंख्यातुं कार्ययोगित्वं प्रतीति विशेषणभावेनोपात्तानां अनुबन्धानां नास्ति कार्ययोगित्वम्। तत्र यथैव प्रकृत्यादीनां प्रत्ययसंज्ञा न भवतीति; हेतोश्च[16] द्वयमुक्तं, एकेनाप्रयोजकत्वं ख्याप्यते, "निमित्तस्य निमित्ति[17]कार्यार्थत्वात्" (वा. ३. १. १) इति, द्वितीयेन [18]शेषशेषिभावापत्तिः "प्रधाने[19] कार्यसंप्रत्ययात्" (वा. ३. १. १) इति एवं इहाप्यनुबंधानां अप्रयोजकत्वात् शेषत्वाच्च (अ)ग्रहणमिति।

---

[1] Ms-त्वेना- [2] Ms यदुप- [3] Edn. दृष्टो
[4] Ms अन- [5] Edn.-र्थभावः [6] Ms प्रित्या-
[7] Ms पविताः [8] Ms-र्थाश्चा- [9] Ms -कारस्येव-
[10] Ms-दिष्टचैरन् [11] Ms-रन्निति [12] Edn. differ
[13] Ms-मृषिः [14] Cf. MB. I. 1.27. [15] Ms अक्यः [16] Ms हेतुश्च
[17] Ms-त्त- [18] Ms शेषिशेषिशेषि- [19] Ms प्रधान-

## कुत एतत् ?

[1]अयमभिप्रायः—यथैव गर्गादिबिदादिपाठ उभयकारी, एवमयमपि पाठ अनुबंधानां, स्वार्थः परार्थश्च स्यादिति [2]एतन्निवर्तयति । आचार्याचारादेव यथैव लोकः प्रवर्तते, तुल्यजातीयेषु ब्राह्मणेषु ब्राह्मणैरेव सह भोक्ष्यते क्षत्रियेषु क्षत्रियैः एवमिहापि ।

**एषैव[3](आचार्यस्य) [4]शैली लक्ष्यते ।**

[5]शीले भवा [6]शैली, [7]समाधानपूर्विका प्रवृत्तिः ।

**लोपश्च बलवत्तरः ॥वा॥**

यद्युपपत्तिर्न गृह्यत, इतः प्रतिपद्यस्वा[8]ग्रहणं, अजिति प्रत्याहारे [9]अनुबन्ध एव गृह्यते "आदिरन्त्येन" ( सू. १. १. ७१ ) इ(ति) भवा सत इदिविसंज्ञा कृता अस(त्) स्वय(?) कार्येषु[10] व्याप्रियत इति ज्ञातम् । एवं[11] हि उक्त(म् ) "भावो[12] हि कार्यार्थोऽनन्यार्थो लोपः" (वा. १. ३. ९) इति, तदसतः कथमिव ग्रहणं भविष्यतीति ।

**ऊकालोऽजिति वा[13] योगः ॥वा॥**

"आदिरन्त्येन" इति प्रसिद्धे सत्यच्त्वे[14] योगविभागः क्रियते, कालेन [15]परिच्छिन्नस्य [16]अच्त्वप्रतिपत्त्यर्थम् । यथा पूर्वपरप्रयोगे सति गत्युपसर्गसंज्ञे[17] प्रसक्ते नियम्येते । संज्ञानियमपक्षे "ते प्राक् धातोः" ( सू. १. ४. ८० ) इति प्राक् प्रयुज्यमाना(नां) गत्युपसर्गसंज्ञा प्राप्नोति । तत्रोकालत्वमर्धमात्रिकाणां नास्ती(त्यच्त्वा) भावः[18] ।

**एवमपि कुक्कुटः[19] अत्रापि प्राप्नोति ।**

कथं पुनरस्य (अ)पठितस्य[20] प्रत्याहारे अन्तर्भावः ? आकृतिग्रहणादित्यभिप्रायः । आकृतिः उपदिष्टा कदाचिदर्ध[21]मात्राधीना कदाचिन्मात्रिकाधीना[22] कदाचिदेकेन हलाभिव्यज्यते कदाचि(त्) द्वाभ्यां, अस्मिंश्च प्रत्याख्यातं ग्रहणकशास्त्रं "[23]अणुदित्सवर्णस्य च" ( सू. १. १. ६९ ) इति ।

**[24]अप(र) आह—ह्रस्वादीनां वचनात्प्राग्यावत्तावदेव योगोऽस्तु ॥वा॥**

---

[1] Ms अयसभि- [2] Ms एतत्तिवर्त्त सति [3] Edn एषा हि [4] Ms शेला
[5] Ms शिले [6] Ms शैला [7] Ms समाध्यनपूविका [8] Ms-स्या-
[9] Ms अनुपघ [10] Ms कार्येष्यु [11] Ms ज्ञातमोव [12] Ms भावा
[13] Ms चायो- [14] Ms प्रसिद्धिचत्यत्वे [15] Ms पुरि-
[16] Ms अच्च- [17] Ms संज्ञा- [18] Ms-द्भाव
[19] Edn. इति after कुक्कुटः [20] Ms परिरतस्त्र [21] Ms-दय-
[22] Ms -त्रकाधाना [23] Ms अदादि- [24] Ms अयमाह

"ह्रस्वदीर्घप्लुत" इत्यस्मात् प्रग्यावच्छब्दरूपं तावद्योगोऽस्तु[1] कियत्? य(दे)तत् "ऊकालोऽच्" (सू. १. २. २७) इति। एतदत्र वर्ण्यते—व्यक्तिनिर्देशोऽयं, इदं [2]चास्ति "अणुदि(त् इ)"ति, प्रत्याहारे च ऊकालता [3]आश्रीयते, ऊकालो यः सोऽजिति प्रत्याहारे सन्निविष्ट इति। निदर्शनमात्रं चेदं, अजिति। सत्य(च्त्वे) प्रत्याहारेष्वेवाजिति वा अणिति वा सन्निविष्टा एत इति प्रतिज्ञातव्यम्। तस्मा(द्)णादीनि [4]असत्यजिति [5]व्यपदेशे ग्राह्कत्वं नास्तीति, सत्यप्रथं कुर्यादिष्टं कार्यं भविष्यति (?)।

---

## अथ किमर्थमन्त(ः)स्थानामिति।

इदमत्र पृच्छ्यमानं, किमर्थं "अणुदित् सवर्णस्य" (सू. १. १. ६९) इति णकारेण प्रत्याहारः क्रियते, यत्रान्तःस्था अप्यन्तर्भाव्यन्ते[6], न पुनः चकारेण प्रत्याहारः क्रियत इति। इतरथा हि यद्यत्र न पठ्येरन्[7] इण्ग्रहणानि अनन्त[8]स्थकानि स्युः ततश्च षत्वं न स्यात्, गीर्षु हल्षु इति।

## ननु च (भेदो) भवति।

श्रुतिकृतं भेदमध्य[9]वसाय ब्रवीति।

## तदेतदत्यन्तं सन्दिग्धं[10] आ(चा)र्याणामिति।

ज्ञाप[11]काद्धयनुमिमते विभाषानुवृत्तिं, तेषामनैकान्ति[12]कत्वात् अनुमा(न)स्य सन्दिग्ध(त्व)मेव भवतीति।

---

## ॥( लण् )॥

## [13]अयं णकारो द्विरनुबध्यते।

अत्र प्रकरणे षट् प्रकारा उपक्षिप्ताः, [14]आसत्ति(ः) व्याप्तिः सामर्थ्यं प्रसिद्धिः लिंगं लाघवमिति। [15]ते(न) न्यायात् क्रमव्यतिक्रमे[16] च प्रयोजना[17]भावात् पूर्वेण स्यात् भूयसां ग्रहणमिति, व्याप्तेर्न्यायात् परेण भवितव्यम्। तत्र लक्ष्यवशात् किमासत्तिराहोस्वित् व्याप्तिरिति सन्दिह्यते। तत्र द्वयोर(ण्)ग्रहणयोः सामर्थ्येनासत्तिरवस्थिता[18] व्याप्ति(ः) [19]बाधिता।

---

[1] Ms-गेस्तु [2] Ms वास्ति [3] Ms उकालाता अश्री [4] Ms मस-
[5] Ms वायदेशे [6] Ms-भाव्यते [7] Ms पद्येरन् [8] Ms-स्था-
[9] Ms-मप्य- [10] Edn-ग्धं वर्तते आ- [11] Ms-काद्धे- [12] Ms-मनेकाति-
[13] Ms अत्रय- [14] Ms अस- [15] Ms तै. [16] Ms कर्मव्यतिक्रमे
[17] Ms-योनना- [18] Ms -स्थतो [19] Ms बोधिता।

## अणोऽप्रगृह्यस्येति ।

भाष्यकारेणैव [1]पठितमष्टमे "[2]वृक्ष(व्) करोतीति"; तत्र न ज्ञायते, केनाभिप्रायेणाह,

## [3]न पदान्ताः[4] परेऽणः [5]संभवन्ति ।

गृघे(:) [6]यङ्लुगन्तस्य लङि सिपि रूपं,

## अजर्घा इति ।

एवं स्पर्धेरपि,

## अपास्पा इति । धातुग्रहणं करोति ।

शक्यते अत्र [7]वक्तुं—धातुग्रहणात् लिंगात् मात्रा केवलमुपजायते, न स्थान्यादेशभाव इति । एवं च[8] चिकीर्षतीत्यादिदोषो [9]विरुध्यते(?) ।

## इहापि तर्हि न प्राप्नोति, चिकीर्षति जिहीर्षतीति ।

अत्र चोद्यते—धातुग्रहणात् रपरत्वे निवर्तिते, ननु सिद्धमित्वं चिकीर्षतीति ? अयमभिप्रायः—धातुग्रहणादधातोरेव रपरत्वं (निवर्तितं), धातोस्तु रपरत्वं स्यादेव; ततश्च अनन्त्यत्वादप्राप्तिरिति । अथवा धातुग्रहणमेवमर्थं स्यात्—[10]सर्वत्र रपरत्वे कृते अनन्त्य[11]त्वात् इत्वे अप्राप्ते धातोर्यत्र कुत्र[12]स्थस्य [13]ऋत इत्वं भवतीति ।

## मा [14]भूदेवं, उपधाया(श्च इति) [15]एव भविष्यतीति ।

अन्तरेण धातुग्रहणं,

## इहापि (तर्हि) प्राप्नोति मातृणामिति ।

रपरत्वे कृते उपधाभावात् ।

## तस्मात् अवश्यं[16] कर्तव्यं धातुग्रहण(म्) ।

यश्चोपदिष्ट उरण्रपरसूत्रे "[17]उदात्तादिषु रपरत्वम्" (वा. १. १. ५१) इति स तु दोषोऽस्त्येव, परेण ग्रहणे सति कृतिरित्येवमादिषु ।

## एवं (तर्हि) [18]सामर्थ्यात् ।

व्याप्तौ बाधितायां इदं प्रसिद्धम्, पूर्वेण ग्रहणमिति । अतः प्रसिद्धिं पृच्छति[19] ।

---

[1] Ms यवित- [2] Ms वृक्षः [3] Edn. नहि [4] Ms-दार्थाः
[5] Edn:सन्ति [6] Ms यङःलुङंतस्य लुडि: [7] Ms युक्त- [8] Ms तु
[9] Ms विरूध्यते. [10] Ms रर्वत्र [11] Ms -त्य- [12] Ms तत्र
[13] Ms रुति. [14] Ms भूदे- [15] Edn. एवं [16] Edn. तत्र
[17] Ms तदाप्तादि- [18] Ms समप्यति. [19] Ms-सिद्धिः पृष्टुति.

[1]अस्मिंस्तर्हि (अण्ग्रहणे) सन्देहः ।

किमत्र प्रसिद्धिरियं[2] व्याप्तिरिति प्रसिद्धि(ः) लिंगा(त्) न बाध्यते ।

सवर्णेऽण् (तपरं) हि उर्ऋत्[3] ॥वा॥

अचीकृतत्, [4]ऋकारस्य स्थाने मात्रिकः कथं स्यादिति तपरकरणं युक्तम्[5]। ननु च भाव्यमानेन ग्रहणं नेति[6] ? सत्यमेवमेतत्। अस्ति उ(कारेण सवर्ण)ग्रहणप्रसंगो यो यत्नेन निवर्त्यते[7]। तस्मात् लिंगेनेह प्रसिद्धिः[8] बाध्यते ।

इण्ग्रहणेषु तर्हि[9] सन्देहः ।

अत्र लाघवात् व्याप्तिर्भवतीति [10]न चासत्तिः। ननु [11]मात्राकालं व्यंजनकालोऽनुविधत्ते। तत्र य [12]एवाच्कालः स एव पूर्वभवानां व्यंजनानामेकायधातमेतदन्येषां भिद्यते कारः(?) अथवा क्लेशेनोच्चा[13]रणं गौरवं, सुखेनोच्चारणं लाघवमिति ।

भवत्येषा परिभाषा ।

यद्यपि श्रोता न प्रतिपद्येत तमर्थ(म्) लाघवेनापि न तस्य विशिष्टार्थाभिधाने शक्तिरुपकल्प्यते। तस्मादाचार्यो[14] व्यवहरत्यनेन, व्याख्यानात् विशेषं[15] प्रतिपद्यत इति ।

---

॥ (अमङणनम् । झभञ्) ॥

किमर्थमिमौ ।

स्थानद्वयव्यापारात् गौरवं करणनाशश्चेत्यतः पृच्छति ।

एवमपि पंचागमाः ।

ङणनझभाः[16] ।

त्रय आगमिनः ।

ङणना(ः) । तेन[17] एकैकस्य पंच पंच स्युः ।

सन्तु तावद्येषा[18]मागमानामागमिन इति ।

---

[1] Ms अस्मिंस्तर्हि [2] Ms द्धिरयं [3] Ms-ण् ग्रहणमिति अतः ह्युर्ऋत् [4] Ms कृका-
[5] Ms-णयुक्तः [6] Ms-हणेनेति [7] Ms-वर्तात [8] Ms-द्ध
[9] Ms तर्हि [10] Ms मयास- [11] Ms याज्ञाका- [12] Ms-एवावकालः
[13] Ms-च्च- [14] Ms-दायार्यो [15] Ms विशेष [16] Ms ङञणनञमाः
[17] Ms तेत [18] Ms संतना इत्येषा

इह [1]उद्देशानुदेशौ शास्त्रप्रतिबद्धौ । तत्र प्रयोगनिरपेक्षादेव शास्त्र···संख्यागमाः प्रतिपन्ना, यथा संप्रविभक्ताः[2] प्रयोगकाले प्रवर्तन्ते[3]। तत्र उभावागमिनौ न स्त इति न प्रवर्तते, चोदनायाश्च·····वात् पुनर्ङणनेषु न प्रवर्तन्ते ।

५

---

## अथ किमिदमक्षरमिति ।

केषांचित् वर्णोऽक्षरं, के(षां)चित्पदं वाक्यं च । इदं चोक्तं "यो वा इमां स्वरशोऽक्षरशः" (भा. पस्पशा.) इति ।

## अक्षरं न क्षरं विद्यात् ॥वा॥

१० क्रियाशब्दो हि अयं, यथा अवाचक इति ।

## न क्षरति न क्षीयते[4] इत्यतोऽक्षरम् ।

न क्षरति इत्येतदप्रसिद्धम् । अस्मिन्नर्थे प्रसिद्धार्थं व्याचष्टे ,

## न क्षीयत इति ।

यथा क्षणः क्षणोतेः प्रक्षणुतः कालो[5] भवति क्षणोतिः क्षयकर्मेति[6] ।

१५ **अश्नोतेर्वा सरो[7]ऽक्षरम् ॥वा॥ अश्नुते**

अर्थम्, यस्मादर्थं व्याप्नोति तेन वार्थेन[8] व्याप्तं यस्मात् तस्मादक्षरं, तच्च पदं वाक्यं (वा) ।

## वर्णं [9]वाहुः पूर्वसूत्रे ॥वा॥

संप्रति नामधेयमिदमिति कथ्यते । एवं हि अन्यैः पठ्यते[10]—वर्णा

२० अक्षराणीति ।

## किमर्थमुपदिश्यते ॥वा॥

नहि वर्णानां साधुत्वं[11] प्रतिपाद्य(म्) । कस्य तर्हि ? समुदायस्य, तस्यार्थे प्रयुक्तत्वात् ।

## वर्णज्ञानं [12]वाग्विषयः ॥वा॥

२५ वर्णा येन[13] ज्ञायन्ते तत् वर्णज्ञानम् । किं पुनस्तत् ? शास्त्र(म्) । तत् वाचो विषयः । शास्त्रे वाक् [14]विसीयते अवबध्यते ।

---

[1] Ms उदेशा- [2] Ms-विसक्ताः [3] Ms प्रवर्त्तंण ।
[4] Ms क्षायंते; Edn. न क्षीयते न क्षरतीति वाक्षरम् [5] Ms प्रक्षतः काले
[6] Ms दक्तेतिः क्षयतिकमेति [7] Ms वक्षारो- [8] Ms वार्थं न
[9] Ms वातिः [10] Ms अन्ये वा पठ्यंते [11] Ms-त्व-
[12] Ms वाचोविषयः [13] Ms यन [14] Ms विसायते

**यत्र च ब्रह्म[1] वर्तते ॥वा॥**

यस्मिंश्च ब्रह्म वेदो वर्तते, (प)दे च[2] वर्तते। यदेतस्य वर्णस्य शास्त्रं विषयः, एतत्कथयति, लौकिकानां च शब्दानामिति।

**तदर्थम् ॥वा॥**

तदित्यनेन वर्णज्ञानमभिसंबध्यते। शास्त्रप्रवृत्त्यर्थं वर्णा उपदिश्यन्ते। यदेवोक्तं वाक्यकारेण "वृत्तिसमवायार्थ उपदेशः" (वा. पस्पशा) इति, तदेव श्लोकवार्तिककारोऽप्याह—

**इष्टबुद्ध्यर्थम् ॥वा॥**

[3]निवृत्तकलादिकानिति।

**लघ्वर्थं चोपदिश्यते ॥वा॥**

इति। अनेन [4]चानुबन्धासंगं प्रदर्शयति "अनुबन्धकरणा(र्थं)श्च" (वा. पस्पशा) इति[5]।

**सोऽयमक्षरसमाम्नायो वाक्समाम्नायः।**

एतावतीयं वाक्[6] समाम्नाता, एतावान् वाग्व्यवहारः।

**पुष्पितः फलितश्च[7]।**

[8]दृष्टादृष्टफलाभ्यां अभ्युदयनिश्श्रेयसाभ्याम्।

**चन्द्रतारकवत् प्रतिमण्डितः।**

एतदुक्तं भवति—यथैवेद [9]मव्युच्छिन्नं चन्द्रतारकादि एवमस्य वाग्व्यवहारस्य न कश्चित्कर्तास्त्येवमेवेदं[10] पारंपर्येण स्मर्यमाणं स्मर्यमाणम्।

**ब्रह्मराशिरिति।**

यथैव संहृतक्रमो ब्रह्मराशिरिति शः (?) प्रतिपुरुषं व्यवस्थितः एवमयं प्रत्या(हा)रः शक्यं वक्तुम्। विज्ञान ब्रह्मवदुपसंहृतो ब्रह्मणा[11](?)।

**सर्ववेद[12] पुण्यफलावाप्तिश्चास्य[13] ज्ञाने भवति।**

---

[1] Ms-बह्म [2] Ms घु च [3] Ms निवृत्ति-
[4] Ms चानुगंधा- [5] Ms च्चेति [6] Ms तीय वाक
[7] Ms फलितो त्वं [8] Ms दृष्टदृष्ट- [9] Ms-मभ्युच्छि-
[10] Ms-वमवेद [11] Ms-संभृतो ब्रह्मेण
[12] Ms-पुष्पैफला- [13] Ms-स्या-

सर्ववेदाध्ययने कृते कृतस्य पुण्यस्य यत्फलं तदवाप्नोति ।

**मातापितरौ चास्येति ।**

मृतयोरप्यध्ययनं न [1]त्यक्तव्यम् तयोरिष्टफलावाप्त्यर्थं; जीवतोरपि वा, यदा मरिष्यतः तदा स्वर्गं गमिष्यत इति अध्ययनं प्रत्यपरः प्रोत्साह्यत इति ।

इति श्रीमहोपाध्यायभर्तृहरि[2] विरचितायां श्रीमहाभाष्यदीपि[3]कायां प्रथमध्यायस्य द्वितीयमाह्निकम्

॥ प्रत्याहाराः समाप्ताः ॥

---

[1] Ms त्यत्तव्यं-  [2] Ms-हर-  [3] Ms-दापि

## अथ तृतीयमाह्निकम् ।

एतद्व्याख्यानेनैव[1] व्याख्यातप्रायत्वात् त्यक्तानि नवसूत्राणि(?) वेदितव्यानि ।.....

## ( इको गुणवृद्धी । १।१।३ )

५ .....

क्वचित्स्वरूपं न[2] सर्वत्र सन्निहित[3]मिति नाश्रीयते । तथाहि, इदमपि संज्ञया[4] विधानं "दिव औत्[5]" (सू.७.१.८४) इत्ययमौकारः स्वरूपेण विधीयत इति ।

## प्रकृतं [6]गुणवृद्धिग्रहणमनुवर्तते ।

१० इक इत्येतावता सिद्धम्, इकः प्रकृते गुणवृद्धी भवत इति । एवं सिद्धे, सूत्रे गुणवृद्धिग्रहणं आश्रितशब्दव्यापारार्थम् । अन्ये[7] तु, द्वाभ्यां गुणवृद्धिग्रहणाभ्यामेत[8]मर्थं प्रतिपादयन्ति—एकेनापि सिद्ध्यति, प्रकृतं गुणवृद्धिग्रहणमनुवर्तते । सर्वत्रैव व्याकरणे ग्रहणकवाक्यमुच्चरति । तत्तु न कार्यस्य प्रतिपादकं तन्निर्वर्तकं[9] तु वाक्यान्तरं लक्ष्यसमये उपप्लवते[10] । यथा कर्तरि १५ पशौ, कर्त्रोः "हस्तिसूचकयोः[11]" (वा. ३.२.१३) इति । एवमनुमीयमानात् गुणवृद्धिग्रहणात् श्रूयमाणाच्च वाक्यान्तरमेव प्रतिपद्या[12]महे—इको गुणवृद्धी गुणवृद्धी इति—गुणवृद्धिसहचरिते ये गुणवृद्धी ते (इ)कः स्थाने भवत इति ।

## यदि तदनुवर्तते अदेङां वृद्धिसंज्ञा(पि) प्राप्नोति ।

प्रतियोगमधिकारस्योपस्थानात् । ननु च वृद्धिशब्दः स्वरितः [13]इहा- २० दैच्पदार्थक उपतिष्ठते [14]च, अत आदैचामेव गुणसंज्ञा प्रसक्ता स्यात् ? अयमभिप्रायः—प्रदेशेषु[15] संज्ञा प्रवर्तमाना संज्ञान्तरेण कृतसंबंधात् शब्दपसक्तः(?) अनुमीयमानोऽपि तथाभूतोऽनुमीयत इति इदमुक्तं—अदेङामपि[16] वृद्धिसंज्ञा स्यादिति ।

## संबन्धमनुवर्तिष्य(ते)[17] ।

---

[1] Ms नैवं
[2] Ms तु
[3] Ms-मित मा श्री-
[4] Ms संज्ञाया
[5] Ms आत्
[6] Ms प्युपारद्विग्र-
[7] Ms अयं
[8] Ms-मोत-
[9] Ms तन्निवर्ततं
[10] Ms समवापु यप्लवते
[11] Ms सूवकोयोः
[12] Ms-पत्यद्या-
[13] Ms इहादिव्
[14] Ms वात
[15] Ms-देशानां
[16] Ms अदिङामिति
[17] Ms-वृत्तिष्य-

केयं संबन्धानुवृत्तिः ? उच्यते—यथैव[1] अनुदेशाः प्रतिलब्धयथा-संख्या(ः) प्रयोगकाले अभावान्निवर्तन्ते यथा "इग्यणः" (सू. १.१.४५) इत्येवं स्वरिता[2] संगादनुवृत्तिरनुमिता उत्तरकालमादैचोऽप्यत्र सन्निहिता इति प्रतिपद्यमान एवमर्थैव आदैजनुवृत्तिरिति, संबन्धाभावं प्रतिपद्यते। लिंगसंख्या चोत्तरत्र संबन्धमिति (?)।

## अथवा मण्डूकगतयोऽधिकारा इति।

संप्रति मुक्त्वादैचो वृद्धिशब्द एव केवलोऽनुवर्तते। यथार्थिनो मण्डूका [3]अक्षीणवृत्तयः तथाभूतां[4] क्रियामारभन्ते [5]ययान्तराले प्रतिबद्ध[6]-गुरुत्वा अथवैकमिव (?) देशे सन्निपतन्ति[7] एवं शब्देऽप्यर्थकृतं[8] यस्मिन्नर्थित्वं समीहते[9] तत्रैवानुमिमीत इत्येतन्मण्डूकगत्या साम्यम्।

## अथवैकयोगः करिष्यत इति।

पृथक्क्रियायोगात् एकयोगत्वम्। भवतिरेक उच्चारणे अध्याह्रियते, वृद्धिरादैजदेङ्गुण इति। यद्यपि प्रतिपत्ति[10]काले भवतिर्भिद्यते (तथापि) एक एव प्रतिपत्तिकाल[11]इति, नास्ति स कालो यस्मिन्[12]वृद्धिसंज्ञाशून्या[13]आदैच(ः) स्युः अदेङो वा गुणसंज्ञाशून्या इति।

## अथवान्यवच[14]नाच्चकाराकरणादि(ति)।

किमत्र उत्सर्गापवादाभ्यां साम्यम् ? को वा विशेषः[15] ? विशेषस्तावत्—यथा सामान्यविशेषभाव[16]उत्सर्गापवादयोः"[17]कर्मण्य(ण्)"(सू. ३.२. १) "आतोऽनुपसर्गे कः" (सू. ३.२.३) इति "धातोः" (सू. ३. १. ९१) इति चोदनायां अस्त्यन्तर्भावः आकारान्तस्येति सामान्यमाकारान्तेषु धात्वन्तरेषु स्थानात्[18]भ(व)ति आकारा(न्ता)द्विशेष, एवमिह वृद्धिरादैजि[19]त्यत्रादेङामन्तर्भावः नाप्यदेङ्गुण इत्यादैचोः[20] भवति मि(?)। अथ किं सामान्यम् ? सन्दिग्धत्वम्। यथैवोत्सर्गचोदनायां संदिह्यमानो विशेष एवं[21] वृद्धिरादैच् इत्यनुवृत्ति(ः) संदिह्यमाना किमुत्तरार्था, [22]नान्तरीयकत्वात् [23]इकोऽत्रार्थिता उतैवमर्थापीति[24]। अदेङ्गुण इति तु कृतार्थमसन्दिग्धं[25] चेत्ये(वं) न सामा-

---

[1] Ms यथैवा [2] Ms-संख्याद- [3] Ms अक्षाण-
[4] Ms-भूता [5] Ms यथां- [6] Ms-पद्ध-
[7] Ms-पतति [8] Ms-प्यायकृता [9] Ms समाहते
[10] Ms-पात्ति- [11] Ms-फल [12] Ms कालावस्मिन्
[13] Ms-श्रुत्या [14] Ms-न्यच्चवच- [15] Ms विशोषो
[16] Ms-षतव [17] Ms कमण्यातो [18] Ms भवि
[19] Ms-त्यात्रा- [20] Ms-चा [21] Ms एव
[22] Ms नानुमीय- [23] Ms इकात्रर्चिता [24] Ms-मर्थोयाति [25] Ms-ससंदिग्धव्य

न्यम्[1] । अत्र चोद्यते[2]—यथैव प्रत्ययसंज्ञा संदिह्यमाना [3]अन्यासामप्यनुवृत्तौ [4]संभवंत्यां [5]ल्युन्नादिषु कृतार्था असंदिह्यमाना(भिः) कृत्कृत्यतद्धितताद्राजसंज्ञाभिः अकृतार्थाभिः समुच्चीयत एवमिह कस्मात्समुच्चयो न भवतीति। अत्रोच्यते—प्रत्ययसंज्ञायाः संज्ञिप्रतिपत्त्यर्थे च प्रतिपत्तिः न तु [6]प्रादेशि(के)न केनचित् व्यापारेण[7] उपकरिष्यति[8] इति भिन्न [9]कालत्वात् अविरोधाच्च विशेषसंज्ञाभिः समुच्चीयते। इह तु वृद्धिरादैजिति [10]निर्देशादिदं समधिगम्यते—सोऽयमभिसंबन्धेनान्तरीकृत्य संज्ञिनः संज्ञाव्यपदेशोऽयमिति। स्वरितलिंगासंगाच्च इदं व्यक्तं, इको गुणवृद्धी इत्यत्रोपस्थितं वृद्धिशब्देन साहचर्यात्[11] प्रदेशे [12]कश्चिदुपकार(ः) करिष्यत इति। तत्र अदेङ्गुण इत्यत्र उपस्थितं न [13]कं(चित्) व्यापारमनुविधीयते[14]। किं संज्ञाव्यापारमुत संज्ञिव्यापार[15]मिति संज्ञात्वमेवास्य संदिह्यमानं, असंदिग्धो लिंगासंगः अदेङ्गुण इति गुणशब्दस्य संज्ञात्वमसंदिह्यमानं; तत्र संदिह्यमानसंज्ञाव्यापारेण असंदिह्यमानसंज्ञाव्यापारस्य समकक्षता न [16]युक्तेति [17]सुष्ठूच्यते—

[18]प्रसक्तस्यापवाद इति। अथवा वक्ष्यत्येतदिति।

अनेनैतत् प्रतिपादयति—न्यायप्राप्ता मण्डूकगति(ः) व्याकरण गणनपि(?) [19]प्रतिपादितेति। तत्रानुवृत्तस्यापि [20]निरर्थित्वे विभाषाश्रुतिरेवं[21] सूचयति इत्यनेन [22]सन्निपतितव्यमन्तराले तु "ग्रामान्तरं गच्छत इव (वृत्त)—मूलोपसर्पणमिति[23]"।

## अथवोभयं निवृत्तं [24]तदपेक्षिष्यामहे।

ननु चात्रानेन भवितव्य(म्)—"अनं(त)रस्य विधिर्वा भवति प्रतिषेधो वेति" यत्र हि उभौ स्वर्येते[25] तत्रोभावनुमीयेते, यत्रान्यतरः तत्रान्यतरः तत्रान्यतरस्या[26]नुमानमिति? सत्यमेवमेतत्। अपेक्ष्ये तु[27] द्विधा मति(ः) भवति अपेक्षितु(ः) [28]भेदेनाभेदेन[29] च। अभेदेन तावत्—देवदत्तश्च यज्ञदत्तश्च [30]विष्णुमित्रश्चेति, अभेदेनैतदिति। यदा भेदेनापेक्षते तदा-

---

[1] Ms स्यामाप्य- [2] Ms चोत्यते
[3] Ms-प्याषाम- [4] Ms संभवेत्या- [5] Ms सन्नादिषु
[6] Ms प्रदेशे [7] Ms-पासृण [8] Ms-ष्यत
[9] Ms-कल- [10] Ms निदेशा- [11] Ms-र्यात
[12] Ms कंचि- [13] Ms नक [14] Ms-यता
[15] Ms पारा [16] Ms युक्तिति [17] Ms सुष्ट्रव्यते
[18] प्रकृत [19] Ms प्रातपा- [20] Ms रिरथित्वि
[21] Ms-श्रुतिरूपं [22] Ms सनिपातत-
[23] Ms-णामति; cf. MB I. 4.50 [24] Ms दुतदुपे-
[25] Ms स्वर्येत [26] Ms-तमस्या- [27] Ms नु
[28] Ms भेदिना- [29] Ms-देनेन [30] Ms विषुमित्र-

(नं)तरे भवितव्यम्। यदा तु समुदायमपेक्षते तदा समुदाय एवानन्तर इति लक्ष्यवशादयं कदाचित् किंचिदपेक्षत इति।

**किंपुनरयमलोऽन्त्य[1]शेष आहोस्विदलोऽन्त्या[2]पवादः ?**

शेषः अवयव एकदेश इति पर्यायाः। अपवादो [3]निवर्तकः। स्वयं चोभयमुपपादयति—एकवाक्यत्वा(त्त)च्छेषत्वं, नानावाक्यत्वात् तदपवादत्वम्। [4]नन्वेकवाक्यत्वं नानावाक्यत्वं च कथमिति [5]नैवैतदुक्तम्। कथं [6]चैतयोरेकवाक्यत्वं स्यात् कालभेदेन श्रुतयोः अनेकयोगव्यवहितयोः ? सति चैकवाक्यभावनिमित्ते नाना(वा)क्यस्याभावात्, सति च नानावाक्यभाव निमित्ते एकवाक्यस्याभावात् संदेहानुपपत्तिः। न चैकस्मिन्नेव[7] द्वयोर्नानावाक्यैकवाक्यभावयोः समवस्थानमस्ति[8]। किमर्थं चैवोपन्यस्तौ बाधाङ्गाङ्गिभावौ, न पुन(:) विकल्पसमुच्चयावपि; तथा नाना[9]वाक्यत्वमिह बाधानिमित्तमुक्तं अन्यत्र तु समावेशनिमित्तम्, "तत्र[10]ल्युनादिप्रतिषेधो[11] नानावाक्यत्वात्" (वा. ३.४.६७) इति, एतत्सर्वं वक्तव्यम्। यत्तावदुच्यते [12]व्यवहितयो(:) कथं संबन्ध इति, नानन्तर्यं(म्) संबन्धहेतुः। एवं हि उच्यते—"अर्थतो हि अस[13]म(र्थी)नामानन्तर्यमकारणम्[14]" । [15]यथा "अनड्वाहमुदहारिं या त्वं [16]वहसि शिरसा [17]भगिनि [18]कुम्भं [19]साचीनमभिधावन्तमद्राक्षीः[20]" (भा.१.१.५८) इत्येषामानन्तर्येणापि सन्निविष्टाना[21]मुपकारो नास्ति तस्या(म्)क्रियायाम्। कुतः ? असंभवान्नास्त्य[22]नड्वहः शिरसि वहनं कुम्भस्य [23]च स(र)णमिति। एतन्निबन्धनमुपलब्धुः अन्ययानुपूर्व्या बुद्धिविषयं वाक्यान्तरमुपप्लवते, यथैवोपांशु गुणयंस्तन्निबन्धनमर्थं प्रतिपद्यते। केचित् मन्यन्ते—एतदुपायमशब्दकमेवार्थं प्रतिपद्यत इत्येवं व्याकरणेऽपि अर्थलक्षणः संबन्धानार्थकृतो(?) यथा "बहुषु बहुवचनम्" (सू. १.४.२१) "ङ्याप्प्रातिपदिकात्" (सू. ४.१.१) इति[24]। एतत्तु तिङन्त[25]भिन्नदेशमुपदिष्टं एवमिहापि "राज्ञः क च" (सू. ४.२.१४०) इत्येवमाद्यर्थः पृथगुपदेशः स्यात्। अथवार्थ[26]लक्षणः कस्मिंश्चित् विषये संबन्धः स्यादिति, यस्मिंश्च विषये स्वनिमित्तप्रयुक्तयोः एतयोः सन्नि[27]पातस्तस्मिन् उभयमपि संभवति अङ्गाङ्गि-

---

[1] Ms-त्य- [2] Ms-त्या- [3] Ms निरर्थकः
[4] Ms तत्वेक- [5] Ms नैचेत- [6] Ms चेत-
[7] Ms-न्नेत [8] Ms-स्थानमास्थ- [9] Ms वावक्य-
[10] Ms ल्युन्ना [11] Ms-षेधे [12] Ms व्यवबुद्धिहित-
[13] Ms मनोमा- [14] Ms-रणम्रा [15] Ms यथा नद्धहेमु-
[16] Ms वहा स चिर- [17] Ms घुविनि [18] Ms कृद्भं
[19] Ms सावीन- [20] Ms-द्राक्षाः- [21] Ms-ता-
[22] Ms-न्नारत्य- [23] Ms वमर्णा मिति
[24] Ms-कामिदिति [25] Ms तिङर्थं- [26] Ms थ- [27] Ms-पत-

भावो बाधा चेत्यतः सन्देहः। यत्र त्वेक एव [1]संभवति [2]तत्रैकस्यैव प्रवृत्तिर्यथा [3]कर्तृपशुचोदनया कर्तरीति साधनमाश्रयमपेक्षते शक्तिमत्वात्। ग्रहः द्रव्यनिमित्तानुविधायित्वात्परतन्त्रम् स(त्) द्वितीयापेक्षमेव[4]। पशाविति द्रव्यभूतस्य [5]शब्देनोपादानात् धातोश्च प्रत्यय(ः) क्रियावचनादुत्पद्यमानः साधने भवितुमर्हतीति न शक्यते कल्पयितुं, पशौ शुद्धे प्रत्ययः कर्मादिगुणयुक्ते [6]वेति। कुतः ? कर्मादीनामचोदितत्वात्। तस्मादेतयोः अत्यन्तमुपकारित्वेन अपेक्षायां न तद्विषयमेकवाक्यत्वमनुमीयते पशौ कर्तरि भवतीति। एवं [7]अणिञोः एकस्मिन्नर्थे सन्निपाते तयोः एकैकस्मिन्ने[8]तस्यार्थस्याभिधानात् विशेषविहितः सामान्यविषयं बाधत इति [9]बाधकत्वेनैवापेक्षा। इह त्वंगस्य गुणवृद्धी भवत इति षष्ठी[10], गुणवृद्धी च [11]षष्ठीमपेक्ष्य "अलोऽन्त्यस्ये(ति)" सन्निपतिता[12] गुणवृद्धी अपेक्ष्य "इक" इति सन्निपतिता। एतमेतदेकविषय(ः)(?) [13]सन्निपातः। [14]यद्यंगस्येतीयं श्रुतिरन्त्ये अभिप्रवर्तते—[15]प्रत्ययसमुदायान्न हि किंचित् पदस्य रूपमस्ति, इदमेव हि तस्य रूपमांगस्य, यथा "रुह(ः) पो[16]" (सू. ७.३.४३) "राज्ञः क च" (सू. ४.२.१४०) इति, एतदुक्तं भवति, रुहः हकारस्य[17] राज्ञो नकारस्येति। तत्रांगस्येति यदा समुदायशब्दोऽन्त्येल्युप-[18] संह्रियते, इदमवयवस्य विशेषणमिक इति, एवमयं तच्छेषो भवति। विशेषणत्वेनाश्रय(णाद)लोऽङ्गान्त्यस्येति[19] समुदायशब्दोऽन्त्ये अल्युप[20]-संह्रियमाण इका [21]प्राप्ततदन्तविधिः उपसंहारेण युज्यते, इगन्तस्यांगस्य अलोऽन्त्यस्येति, एवमपि इगन्तस्यांगस्य गुण इति विशेष्यत्वेन अलोऽन्त्यशेषता-मापद्यते। अथ त्वंगस्येतीयं[22] गुणवृद्धिविधौ नैव[23] स्थानेषष्ठी। किं तर्हि ? इक इत्येषा स्थानषष्ठी[24] एतद्वि(शे)षणमंगस्येति, यथा "ऊदुपधाया गोहः" (सू. ६.४.८९)॥ इति; एवं सति अलोऽन्त्यस्येत्येतस्य [25]गुणवृद्धि(वि)षयेऽत्यन्तम[26]प्रवृत्तिरिति बाधकत्वमस्योच्यते। इयमेव च[27] बाधा या अप्राप्तिरिति। तत्र तच्छेषकल्पनाया (म्) इकः प्रधानविप्रकर्षः, अस्य[28]त्वत्र वा विधिनोक्तमिति (?) शब्दप्रतिपत्तिः अर्थप्रवृत्तिश्च बाध्यते। अपवादपक्षे त्विको तु हो गस्य तु (?) प्रधानविप्र(क)र्ष इति। समुच्चययः कस्मान्नोपन्यस्त इति ? असंभ-

---

[1] Ms संभवाति [2] Ms तत्रैव सैव [3] Ms कनृपशुवो मदनपाकर्त-
[4] Ms-पेक्षामेव [5] Ms शब्दोनो- [6] Ms चेति [7] Ms अणित्रोः
[8] Ms-स्व- [9] Ms व्यधक [10] Ms ष्टचा [11] Ms षष्टचाम-
[12] Ms-पते ता [13] Ms सनिपात्यो [14] Ms पद्यंमस्ये- [15] Ms प्रव्यत्यस-
[16] Ms रुहवो; [17] Ms रुणेहेकोरस्य- [18] Ms-त्येत्युप-
[19] Ms-नाप्राया लिंगायति [20] Ms-त्येल्यप-
[21] Ms प्राप्तवदत्त- [22] Ms-तीवं [23] Ms-विधाने च
[24] Ms-पष्टी- [25] Ms गुणवद्धि- [26] Ms तमे
[27] Ms त्व- [28] Msकर्षास्य-

वात्, इह[1] भिन्नार्थानां एकक्रिया[2]विषयः समुच्चयो दृश्यते। यथा देवदत्तं सूपेन लवणेन घृतेन[3] भोजयेति। सूपादयो भिन्नार्था उपसेचनेन रसोत्पादनेन[4] स्नेहनेन भुजौ समुच्चीयन्ते। एवमिहांगमिक् च गुणे[5] समुच्चेतुमशक्यं, अंगे[6] हि प्राप्नुवच्च यो यदा चेत्प्रतिपद्यते गुणं, तदेतरया विशेषणषष्ठ्या भवितव्यमिति। एवमपि समुच्चयात्कार्यरूप(?)। विकल्पः एकार्थानां विरो[7]-(ध)वतामन्यतमेन कृतत्वात्प्रवर्तते। यथा देवदत्तं भोजय प्रासादे गृहे कांस्य-पात्र्यां[8] राजत्यामिति गृहे प्रासादे वा भोज्य(ते) एवमिहांगस्य वा[9] भवति इको[10] वेति न यु(गप)त्प्रवर्तते। एकस्याः[11] षष्ठ्याः कार्ययोगित्वादिति। अथ नानावाक्यत्वे[12] को विरोधपरिहारः? उच्यते—इह दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति, केचिदेकमेव वाक्यमिति प्रतिपन्ना, [13]एकस्याख्यातस्य श्रुतत्वात् एको हि ददातिर्भिन्नकर्मको [14]भिन्नसंप्रदानकश्चेति[15], ययैव भुजि तेन्तकरण इति(?) सत्यपि [16]भुजेर्बहुकृत्वः प्रयोगे एकवाक्यतैव भवतीति देवदत्तं मांसेन भोजय दध्ना भोजय[17] शाकेन भोजयेति। इह [18]भवन्त-स्त्वाहुः—द्वे[19] एते वाक्ये इति। एकं वाक्यं दधि ब्राह्मणेभ्यो दीयताम्, द्वितीयं तक्रं कौण्डिन्यायेति। क्रियापदं तु गतार्थत्वान्न प्रयुज्यते। तत्रैको ददाति(:) दधिकर्मकः अपरस्तक्रकर्मक इति, द्वे एव ददातिक्रिये। किमर्थं तु लोके समुच्चयो[20] न भवति? एतदशक्यं वक्तुम्। कुतः? अदृष्टत्वात्। [21]यैरपि शास्त्राणि न समधिगतानि तैरप्युक्तं, दधि अस्मै[22] न देयं इति। अथवा(व)श्यमुपपत्तिर्वक्तव्या। इयमुपपत्तिः—येषां तावत् द्वे[23] एते वाक्ये तेषां क्रिया[24] क्रियान्तरं बाधते। दधिकर्मिका तक्रकर्मिकया बाध्यते। ब्राह्मणश्रुतौ[25] कौण्डिन्योऽपि यद्यप्यन्तर्भूतः तथापि [26]कौण्डिन्यरूपेण नोच्यते। किं तर्हि? [27]सामान्यरूपेण। फलमपि दातुर्ब्राह्मणाय दत्त[28]मिति भवति, [29]न तु कौण्डिन्यायेति। तक्रदानं तु विशेषतया श्रूयते[30]। दधिदानं च विनापि कौण्डिन्येन संभवति, न तु तक्रदानम्। तस्मात् यत्र च तेन रूपेण चोदितः सन्दिग्धो यत्र च विशेषरूपेण[31] चोदितः असन्दिग्धस्ते क्रिये तत्र समुच्चयं (न) प्रतिपद्यते। कथं हि अनुमानं प्रत्यक्षतक्रदानेन स(प)क्षीकर्तुं[32](?) शक्यम्?

---

[1] Ms इहा- [2] Ms -क्रिय- [3] Ms ष्टनेन [4] Ms रसो बाधनने
[5] Ms-मिक गु गुणे. [6] Ms -शक्ये. अंग [7] Ms र्थाज्ञा विशे- [8] Ms कांस्यरा आ.
[9] Ms वा भवान्यतमेन वा भवति [10] Ms इकौ
[11] Ms युज्यतवर्त । यथा देवद एकस्याः [12] Ms -क्यते [13] Ms एकेस्यख्या-
[14] Ms भिक्षसं- [15] Ms-कस्येति. [16] Ms भुजर्व- [17] Ms भोजाय-
[18] Ms भवतु तस्याहुः [19] Ms द्वि [20] Ms समुदायो. [21] Ms-पैरपि
[22] Ms अस्मे [23] Ms तावत्त्वे [24] Ms क्रियां य
[25] Ms-णश्च तौ [26] Ms कडन्य- [27] Ms साग्रामा-
[28] Ms -ह्मणो यद्दत्त- [29] Ms यत्तु कौडि [30] Ms सूयते
[31] Ms-षद्रूपेण [32] Ms-क्षाकत्तु

तस्मात् प्रत्यक्षानुमानयोः न समुच्चयो नापि विकल्पः। अपरेषां [1]दर्शनं—वाक्यशेषस्या[2]त्रानुमानं; तस्य चेदं [3]लिंगं, तक्रं कौण्डिन्यायेति। [4]एतदत्रादावेव प्रक्रम्यते, कौण्डिन्यं त्यक्त्वा[5] दधि ब्राह्मणेभ्यो दीयतामिति। अपरे मन्यन्ते—भूयांसो[6] हि ब्राह्मणशब्दाः। तत्र केचित् [7]उद्धृतकौण्डिन्याः केचित् [8]उद्धृतमाठराः केचिदन्तर्भूतमाठराः केचिदन्तर्भूतकौण्डिन्याः। तत्रायं ब्राह्मणशब्दः अन्तरेण वाक्यशेषानुमानं [9]उद्धृतकौण्डिन्येषु [10]प्रवृत्तश्चेदयं प्रतिपत्ता तक्रं कौण्डिन्याय इति अस्मात्प्रतिपद्यते। कुत एतदिति चेत्? अयमन्यान्प्रतिपादयन्नेवं प्र(ति)पादयत्यतोऽस्य भवति, यथैवाहमन्यान् प्रतिपादय (इ)त्येवमहमन्येन प्रतिपाद्य इति। अस्मिन् दर्शने ब्राह्मणरूपेण अप्रतिपादितो दधिदाने कौण्डिन्यः। येषां[11]त्वेकं वाक्यं, तेषां साधनान्तरस्य निवर्तकं तक्रं दधि निवर्तयति। कुतः? दधि सन्दिह्यमानं तक्रं साक्षान्निर्दिष्टमिति[12]। [13]ख्युनादिषु च समावेशं प्रकरणभेदात्प्रतिपन्नः। यत्र प्रकरणभेदात् अपत्ये बाधका न ते अधिकारविहि(ता)नामपवादाः। एवमेव कृत्वा[14] वर्तमानकालविहि(त)स्य लटो भूतकालविहित [15]लक्षण सस्(?) तथा अधिकरणकापत्यलक्षणस्य [16]बाधा चेयमिति(?)। एवं भिन्नप्रकरणत्वात् "कर्तरि कृत्" (सू. ३.४.६७) इति प्रतिपादितः प्रकरणान्तरे ख्युन् करणे भवतीति कृत्वा(त्) कर्तरि स्यात् [17]ख्युन्त्वात् करण इति समावेशं न[18] प्रतिपन्नस्तत्र परिहार उच्यते। यथैव एकस्मिन्नर्थे सन्निपतितयोः अणिञोः[19] विशेषवता सामान्यतो बाधनमेवमिहापि ख्युन्येकस्मिन् द्वौ[20] द्वावर्थौ सन्निपतितौ, करणं कर्ता च; तत्र [21]ख्युन्रूपमाश्रित्य करणार्थं प्रतिपद्यते कृत्त्वमाश्रित्य कर्त्रर्थमिति विशिष्टश्रुतिरर्थः सामान्यश्रुतिमर्थं बाधते। एवं लडित्येतस्मिन् शब्दे विशिष्टोपपदाश्रितः[22] कालः कालान्तरं बाधते एव, ते(ना)पि विशिष्टं धातुरूपमाश्रितमिनिष्टिति या भूतानां वर्तमानकाले बाधते(?)। एवं यङि.[23] "भावगर्हायाम्" (सू. ३.१.२४) अधिकारसमभिहारता(म)स्य। तथा ढकि वृषरूपे विशेषवती [24]वडवाश्रुतिरपत्यार्थं बाधते। किं चाप्रयुज्यमानाश्च[25] शब्दास्तमे विषयमपहरंतीति(?)। रूढेरपि[26] वा परमभ्युपगम्यते, यथा[27] असत्यप्यनिमिषत्वे अनिमिषशब्दो मत्स्यवृत्तिरिति। ये [28]त्वेक(त्व)वादिनस्त एवं प्रतिपन्नाः—यथैव इदमेकं

---

[1] Ms दशन [2] Ms-षः स्या- [3] Ms लिगां [4] Ms एनद- [5] Ms वक्तु [6] Ms भूग्रायांसो [7] Ms उध्रुता- [8] Ms उध्रुत- [9] Ms उत्कलत- [10] Ms षु येष्वप्रवृत्त- [11] Ms येषां तेत्त्वेकं [12] Ms र्देष्ट तक्रं इति [13] Ms रव्युनानादि- [14] Ms व चत्वा- [15] Ms -हिर [16] Ms पाछवे यामति [17] Ms रूपात् [18] Ms -वेशन्नं [19] Ms अपिञोः [20] Ms ष्टे [21] Ms रव्युन्रूरूप- [22] Ms श्रिता- [23] Ms यडि [24] Ms वडचा [25] Ms-श्चे [26] Ms ऊठेर- [27] Ms तथासत्य- [28] Ms त्यकवदि-

वाक्यं [1]दधि ब्राह्मणेभ्यस्तक्रं कौण्डिन्याय दीयतामिति एवमिदमप्येकं वाक्य "कर्तरि कृत्" "करणे ख्युन्" इति। तत्रैतदुक्तं भवति—ख्युनोऽन्यः कर्तरि भवतीति। इह कथं, "सुपो लुक्" (सू. २.४.७१) "अलुगुत्तरपदे" (सू. ६.३.१) इति ? अत्राप्येकं[2] वाक्यं, उत्तरपदादन्यत्र सुपो लुगिति। अथवा नानाकालं वाक्यमिति। यथादेश[3]श्चोदितो यथा(?)नानाकाले दधितक्रे (प्र)तिपद्यते कौण्डिन्यः अर्थादेककालमिति परिहार उक्तः। सर्वत्र चाप्राप्त्यनुमानं बाधा श्रुतौ स्मृतौ [4]च। इयमेव च[5] बाधा "अभक्ष्यो[6] ग्राम्यकुक्कुट" इति। नहि अत्र शब्दवद्भक्षणम्। किं तर्हि ? अर्थित्वप्रयुक्तं, तत्प्रसक्तं निवर्त्यते। व्याकरणं च स्मृतिः शब्दनि(बं)धनेति सर्वत्राप्राप्तिरेव विशेषशब्दसान्निध्ये अनुमीयते।

## मिदादिषु इग्ग्रहणं कर्तव्यमिति।

अनिगन्तत्वा (न्मि)दादि[7] ष्विगग्रहणं कर्तव्यम्। तेषामुपसंहारादंगमिगग्रहणं[8] न सन्निपतति, तस्मात्प्रदेशेषु [9]इगग्रहणं कर्तव्यमिति।

## सर्वादेशप्रसङ्गश्चानिगन्तस्य[10] ॥ वा ॥

मिदादिष्विगग्रहणं कर्तव्यमित्ययमेको दोषः, अयमपरः[11]

## सर्वादेशो [12]गुणः प्राप्नोति। याता वातेति[13]।

एवं मन्यते—अंगस्य इक इति निमित्तभावादुपसंहारः [14]सति निमित्ते प्रवर्तते। तत्र यथैव स्थानषष्ठ्यां निर्ज्ञातायामुपसंहारः एवं इगन्तत्वे सत्युपसंहारेण भवितव्यम्। यत्र तूपसं(हा)रनिमित्तं नास्ति तत्रानुपसंहृता विद्यते, यथा (?)। इदमप्यस्य दर्शनमंगस्य[15] इत्येतत् भेदेन सर्वेष्वंगेषु शब्दा (षष्ठ्या) प्रतिपादयति[16]। प्रतिपादि(ता)न्नापा षष्ठ्या (?) इकः "अलोऽन्त्यस्य" (सू. १.१.५२) इति इगन्तेषूपसंह्रियते नेग्वत्सु,[17] नाप्यनिगन्तेषु। यातादिषु च नास्ति षष्ठी, अतोभवितव्यं गुणेन सर्वादेशेनेतीदमाह—

## अलोऽन्त्य(स्येति) षष्ठी चैव हि अन्त्यमिकमुपसंक्रान्ता, अङ्गस्येति च स्थानषष्ठी। तद्यदिदानीमनिगन्तमङ्गमिति।

इतरोंऽगस्येति इदमेव रूपमलोऽन्त्यषष्ठ्याः सामान्ये [18]इक (इ)ति चेयं षष्ठी। अंगस्येती[19]यमन्त्य इक्येवावस्थिता इत्यत आह—

---

[1] Ms वृत्ति- [2] Ms-त्रापीदं [3] Ms-थावेश-
[4] Ms देयमेव [5] Ms तु [6] Ms-क्ष्ये
[7] Ms-त्वादिदि- [8] Ms-रात् गमिग्रहणं [9] Ms-षु देशेषु इ-
[10] Ms-न्तश्च [11] Ms अथवापरो [12] Ms ग्रणः
[13] Ms साता वातेति सर्वा-etc. [14] Ms सरिति [15] Ms-ननंगस्य [16] Ms-दयेति
[17] Ms नेग्वसु [18] Ms इकोति येयं [19] Ms-ता-

**नैष दोषः ।** [1]**यथैवालोऽन्त्य(स्येति) षष्ठी अन्त्यमिक(मुप)संक्रान्ता ।**

यदुक्तं भवता, भिन्नानि अंगानि संस्करोतीति, तन्न । [2]एवं च सति [3]कुतोऽनिगन्तेषु यातादिषु षष्ठी ? तदभावाच्च,

**कुत(:) सर्वादेश इति ।**

**ह्यर्थे चायं [4]चः पठितः ।**

हिशब्दश्च [5]हेतावित्ययमपि हेत्वर्थो द्रष्टव्यः । यस्मात्सर्वादेशः प्राप्नोति तस्मात् मिदादिष्विग्ग्रहणं कर्तव्यम् ।

**मिदेर्गुण इक इति वचनान्नान्त्यस्य[6] ।**

उपसंहारनिमित्तस्याभावात् ।

**अ(लो)न्त्यस्येति वचनादिको न ।**

अलोऽन्त्यस्य हि उपसंहारे सति [7]मिदेरिगन्त्यो नास्ति ।

**उच्यते च गुणः ।**

स वचनात् भविष्यति । किमंगस्य इत्यनेन ? नेत्याह । "मिदेः" (सू. ७.३.८२) इति । तत्र यद्यपि षष्ठी[8] अंगस्ये(ति) वातादिषु नास्ति इह [9]चास्ति मिदेरिति, यावानुपसंगृह्यते (इ)ति ।

**सर्वादेशः प्राप्नोति ।**

**[10]इङ् मात्रस्येति चेत् ॥ वा ॥**

मात्रशब्दः कृत्स्नवचनः[11]। सर्वस्येकः[12]अन्त्यानन्त्यविषयस्य गुण-वृद्धिभ्यां भवितव्यम्, अंगस्य विशेषणत्वादिकश्च विशेष्यत्वात् स्थानषष्ठी न भवति । अंगस्येति स्थाने विज्ञाता चोपसंह्रियत इति निमित्ता[13]भावात् अप्राप्तिरुपसंहारस्य गुणवृद्धिविषय इति सर्वावस्थास्य (?) इको गुणवृद्धी प्राप्नुत इत्यनन्त्यस्य प्रतिषेधो वक्तव्यः ।

**अग्निचिदिति ।**

नैतान्युदाहरणानि संभवन्ति । कथमेताभि(:) ह्रस्वचोदनाभिः अंगं विशेष्य(त) इति ह्रस्वान्तस्यांगस्य गुण इति । इदं[14] न्याय्यं हे बुद्धे[15] वषेशाण्यदुः(?) [16]ईहिता(ई)हितुं शुद्धये शुद्धय[17] इत्येतान्युदाहरणानि

---

[1] Edn. यथैव ह्यलो- [2] Ms प व च. [3] Ms कुता आहानि-
[4] Ms यः [5] Ms हिता- [6] Ms न्नास्त्यस्य; Edn. अन्त्यस्य न
[7] Ms मिदोरंग- [8] Ms पष्टी [9] Ms त्वास्ति
[10] Ms इहमा- [11] Ms-ववयनः [12] Ms सर्वस्मिकः
[13] Ms-त्त- [14] Ms ददं [15] Ms हि बुधाः
[16] Ms ईहितरि वु- [17] Ms शुवव्य-

उपादेयानि नाग्निचिदादीनि[1] । नैष दोषः । अंगस्येति षष्ठी तदपवादकल्पनापक्षे न कार्ययोगिनीत्येतदवस्थितम् । तत्र गुणविधानमप्रधानं, कथं ह्रस्वादिचोदनाभिः विशेष्येति[2] इगेव कार्ययोगित्वात् विशेष्यते । स च ह्र(स्व)स्यार्थतो न संभवतीति एवमभिसंबन्धो भवति[3] अंगस्य य इक् ह्रस्वस्तस्य गुणो भवतीति । अथवा विधीयमानत्वात् गुणः[4] प्रधानं तादर्थ्यादिकं चांगं गुणः[5] तत्र ह्रस्वादिश्रुति(ः) प्रधाने न संभवतीति, तदंगे[6] विज्ञायमाना [7]च(आ)सन्नमंगमिति तस्य विशेषणं युक्तं, न पुनः विप्रकृष्टस्य गुणस्यांगस्येत्यलोऽपि न्यायात् एतान्येव संभवन्ति (?) । उदाहरणमात्रं चेदम् । इहापि अनन्त्य[8] प्रतिषेधो वक्तव्यः "अचो ञ्णिति" (सू. ७.२.११५) इति । अत्र हि अचः स्थाने[9] यत्र तस्थस्येति प्रतिपत्तव्यम् (?) । दरिद्राय[10]-कादिषु अनन्त्यस्याचो वृद्धिः प्राप्नोति । ननु चोर्गुणादिषु निर्दिष्टस्था[11](नि)-कत्वात् अव्यापारोऽस्याः[12] परिभाषायाः ? सत्यमेवमेतत् ; एवं च कृत्वा[13]उच्यते—भवता अनन्त्यप्राप्तिरेव न व्यवसिता । अंगस्येतीदं सामान्यं विशेषस्येको विशेषणं[14]इति । एवं चेदिहापि ह्रस्वादीनां विशेष्याणामंगस्य इति सामान्यं विशेषणं भवितुमर्हति । ततश्चानन्त्यस्य प्रसंगो नास्ति । एवं च सति इगन्तलक्षणो न भवत्ययमिति [15]वक्ष्यमाणमप्युपपद्यते—"तद्धितकाम्योरिग्लक्षणात्[16]" (वा. १. १.५) इति । अपरे वर्णयन्ति—अत्र इको व्यापार(ः) श्रीयते, अंगस्येको गुणो भवति । किं सर्वस्य ? नहि । किं तर्हि ? तेरिति(?) । किमर्थं पुनरिदमुपादानं? सर्वावस्थास्य प्रतिपत्त्यर्थम् , अस्मिंस्तु वक्ष्यमाणं नोपपद्यते— [17]इग्लक्षणत्वादस्य । अतः तच्छेष[18]पक्षे चै(त)दुक्तं द्रष्टव्यम् ।

## पुगन्तलघूपध[19]ग्रहणमनन्त्यनियमार्थम् ॥वा॥

सिद्धो हि गुणोऽनन्त्यस्य । तत्र पुन(ः) [20]श्रुतिर्नियमार्था भविष्यति । एतदनेन[21]प्रदर्श्यते—"सार्वधातुकार्धधातुकयोः" (सू. ७. ३. ८४) इत्यत्रांगस्य[22] इतीदं कार्ययोगि तदिका विशेष्यत इति । ननु च विधेयस्य (अ)भावान्नियमानुपपत्तिः[23], [24]किं च ह्रेपयतीति अनन्त्यस्य सिद्धो गुणः अन्त्यस्य पका[25]-(र)स्य स्यात्, भेत्तेति दकार(स्य) स्या(त्) । उच्यते—पुकि अन्तः लघ्वी उपधेत्येव सूत्रार्थमाश्रित्यायं नियम इति [26]वक्ष्यति । ननु चैवमपि दा(प)-

---

[1] Ms-दानदीनि [2] Ms-ष्यतेति- [3] Ms संर्वाधो भवतीति [4] Ms प्रधनंनं-
[5] Ms गुणौ [6] Ms तदेग [7] Ms-यसन्नसंग-
[8] Ms आनंसत्य- [9] Ms अत्रप्यं ञ्प्रस्थावे [10] दरिद्राराय; See MB.VI-4-114
[11] Ms-दिष्वनिर्दिष्टस्या- [12] Ms-पारस्थायाः
[13] Ms सत्यामेवमेतदिदं त्वं व कृत्वा [14] Ms-षणं [15] Ms वक्ष्या
[16] Edn. इक् प्रकरणात् [17] Ms इक ल- [18] Ms-पक्षोन्नदु-
[19] Ms-धे- [20] Ms स्तुति- [21] Ms प्रदश्यति
[22] Ms-गृस्ये- [23] Ms-मावुपथत्तिः [24] Ms र्कं यविधेय ह्रे-
[25] Ms-स्यल पुका- [26] Ms वषोत

यत्यर्थमेतत्स्यात्। अकारस्य गुणवृद्धी (गुणो वृद्धिं?) करिष्यामः "चक्रकेषु चेष्टतो[1] व्यवस्था" (भा. १. ३. ६०)। अयं [2]परः सूत्रैकदेशो नियमाय भविष्यति लघ्वी उपधेति।

**प्रकृतस्यैव नियमः।**

सार्वधातुकार्धधातुकयोः पुगन्तस्यैव नान्यस्येति सार्वधातुकार्धधातुकयोरंगस्येति [3]षष्ठी कार्ययोगिनीति।

**[4]न स्यादिह ईहितेति।**

**[5]ह्रस्वाद्योर्गुणस्त्वनियत इति।**

अत्रांगस्येति विशेषणषष्ठ्यौ वेति(?)।

**अथाप्येवं नियमः स्या(त्), सार्वधातुकार्धधातुकयोरेव पुगन्तलघूपधस्येति।**

निमित्ती [6]नियतोऽप्यत्र ह्रस्वादिषु गुणं न प्रतिपद्येत, निमित्तस्य तन्नियमात्। ईहितेत्येवमादिषु गुणः प्राप्नोत्येव।

**अथाप्युभयतो नियमः स्यात्।**

कथं पुनरुभयतो नियमो लभ्यो यावता पुन(:) [7]श्रुतेर्नियमः, तत्रैकस्मिन्नियमिते पुन(:) श्रुतिरपरा नास्ति[8] यया द्वितीयऽर्थो नियम्यते? उच्यते—सत्यं, एवमर्थमेवेदमुच्यते—

**अथापीति।**

यथप्येवं[9] व्याख्यायेत उभयतो [10]नियमार्थमेतत्सूत्रमिति।

**एवमपि[11] जुसि गुणोऽनियत (इति)।**

उभयत्र परिग्रहात् लघूपधं चैतत् जुसश्च सार्वधातुक(त्व)मिति।

**एवं तर्हि, [12]नैवायं तच्छेषो[13] नापि तदपवाद(:)।**

यन्मन्यसे एकविशेषणसन्निपातात् एते परिभाषे अपेक्षिते[14], विरोधेन अंगांगिभावेन वेति;[15] तन्न। परस्परा(न)पेक्ष्यश्च[16] कार्यं प्रति प्रवृत्तः(?)ए[17]का-
राज्ञः कचादिषु, अपरा[18] हि गुणवृद्धयोरिकः स्थानित्वप्रतिपादनेन। यदि कथं-

---

[1] Ms चेष्टते
[2] Ms परो सूत्रेक-
[3] Ms मष्टी
[4] Ms तस्मादिह
[5] Ms ह्रस्वादिगुण-
[6] Ms नियतोथत्र ह्रसादि-
[7] Ms श्रुतिर्नि-
[8] Ms श्रुतिरुथरा भास्ति
[9] Ms यद्यथेव
[10] Ms नियसार्थतेत-
[11] Edn. adds अयं
[12] Edn. नायं
[13] Ms नावै
[14] Ms-क्षेते
[15] Ms तत्र
[16] Ms-श्चा-
[17] Ms एके राज्ञा कदाचिदेषु
[18] Ms-दि-

चित् इक एकत्र सन्निपातो भवति नैतावतैव तयोरपेक्षा शक्या कल्पयितुम्[1]। यत् [2]दीर्घत्वैत्वयोः परस्परमनपेक्षमाणयोः दृष्ट एकविषयः[3] सन्निपातो वृत्तेभ्य इति, तथानयोः परिभाषयोः। [4]तत्रालोऽन्त्यपरिभाषा समुदायषष्ठ्या एकदेशस्थापने व्यापृता[5]।

५ [6]नियमादि(को) गुणवृद्धी भवतो विप्रतिषेधेनेति ॥वा॥

शेषत्वे हि एकवाक्यत्वात् आत्मना सह कीदृशो विप्रतिषेधः, अविरोधे [7]च सति—

उ(त्स)र्गापवादयोरप्ययुक्तो विप्रतिषेध इति।
नियमस्यावकाशो "राज्ञः क च" इति।

१० यत्र "इको गुणवृद्धी" [8]इत्येतत्परिभाषाव्यापारनिमित्तो[9] न कश्चित् विशेष उपलभ्यते, तत्र तस्याः प्रवृत्तिरनर्थिका। [10]यदि च "इक" इत्येतयैवान्त्यस्य गुणे प्रतिपादिते नियमोऽपि तस्यैव विदध्यात् किंचित्कृतं स्यात्(?) इत्यौदासीन्यं[11] नियमस्य[12] प्रतिपद्यामह इति।

इहोभयं प्राप्नोति (मे)द्यति मार्ष्टीति[13]।

१५ नियमात् व्यंजनस्य स्या(द)नया चेकोऽनन्त्यस्य[14] स्यादिति।

नैष युक्तो विप्रतिषेध इति।

आदौ तावत् सूत्रसन्निवेश[15] एव तैर्न ज्ञायत इति एतदाचष्टे—

[16]पूर्वोऽयं योगः परो नियम इति।

एवमपीष्टवाचिना परशब्देन व्यवहार सिन व्यवस्थित्वा वाचिना पूर्व-
२० (वि)प्रतिषेधादनारभमाण(?) इत्यत आह—

इष्टवाची परशब्द इति।

एवम(प्य)युक्तो (विप्रतिषेधः)। द्विकार्ययोगो हि विप्रतिषेधः।

द्वाभ्यां कार्याभ्यां योगो यत्र एकस्य स्थानिनः स द्विकार्ययोगः यः तत्र तस्थो(?) विप्रतिषेधो द्विकार्ययोग[17]विषयत्वात् तादूप्यं[18] लभते। अथवा

---

[1] Ms-यितुं [2] Ms दीर्घत्वे-
[3] Ms-षया [4] Ms तत्रोलोत्य- [5] Ms व्यादृता
[6] Ms इयमपि [7] Ms-व [8] Ms इत्यतेप-
[9] Ms-मितो [10] Ms यहि वेक इत्येते ये वान्यस्य
[11] Ms इत्यतदासीम्यं [12] Ms नियसस्य [13] Ms मार्ष्टेति
[14] Ms-नंयस्थ [15] Ms-संनिरवश [16] Edn. पूर्वश्चायं
[17] Ms-यौग- [18] Ms तादूप्यां

योगः संबन्धः, [1]द्विकार्येण योगो यः [2]स विप्रतिषेध इति संबन्धविशेष [3]एव विप्रतिषेधः। यथा विरोधशब्दस्य संबन्धविशेषः [4]तथैव त्रिप्रतिषेधशब्दस्यापि।

**नावश्यं[5] द्विकार्ययोग एव विप्रतिषेधः[6] किं तर्हि ? असंभवोऽपि।**

योऽयं विप्रतिषेधो भवता परिगृह्यते [7]द्विकार्ययोगित्वं न (स एव), योऽसंभवः स (च) विप्रतिषेधः, यस्मिन् असंभवे [8]नैवं द्विकार्ययोगोऽस्ति। द्विकार्ययोगोऽपि[9] यस्मिन् न संभवति तस्मिन्नपि विप्रतिषेध इति तत्राप्यसंभव एव। असंभवं च द्विकार्ययोग एव [10]दर्शयति—

**इह तावत् वृक्षेभ्यः[11] इत्येकः[12] स्थानी द्वावादेशौ[13],**
**न चास्ति संभव इति।**

ननु चैकस्य स्थाने द्वावादेशौ भवतो यथा एकस्य[14] पच्छब्दस्य द्वौ पच्छब्दौ एवं वृक्षेभ्य [15]इत्यकार एकारश्च कस्मान्न भवतः ? उच्यते—न ब्रूमः सर्वत्र न संभवतीति। किं तर्हि ? एवंभूतो न संभवतीति योऽयं प्रस्तुतस्तत्र हि दीर्घत्वं [16]यञ्यनंतरे साधुत्वेनाख्यातं, [17]एत्वमपि [18]झलि; न च संभवोऽस्ति यदुभयोः स्वेन स्वेन निमित्तेनानन्तर्यं स्यादिति। एवं कृत्वेदमुच्यते—

**न चा(स्ति) संभवो यदेकस्य स्थानिनो द्वावादेशौ**
**स्यातामिति। इहेदानीं मेद्यति[19] (मेद्यतः मेद्यन्तीति)**
**द्वौ स्थानिनावेक आदेशो, न [20]चास्ति संभव इति।**

अत्रापि[21] दृष्ट(:) संभवः, "[22]एकः पूर्वपरयोः" (सू. ६. १. ७४), "ह्रस्वो रोपधयो रमन्यतरस्याम्" (सू. ६. ४. ४७) इति च[23]। उच्यते—इह संभवो नास्ति। कथम्? मिदेरिति स्थानषष्ठ्यां[24] सत्यामुपसंहारेण भवितव्यम्, उपसंहारे चैकोऽप्र(ति)पत्तिरित्येके[25] प्रतिपद्यन्ते,[26] अङ्गस्येति विशेषणषष्ठ्यां उपसंहारासंभवः[27]।

**अत्रापि नियमः प्राप्नोती(ति)।**

---

[1] Ms दिकार्येणे
[2] Ms अ-
[3] Ms एवं
[4] Ms यथैवं
[5] Ms तावत् यं
[6] Ms-षेथाः
[7] Ms द्वित प्रयोगित्व-
[8] Ms नवं कार्यद्विका-
[9] Ms-योमोगोपि
[10] Ms दशयेति
[11] Edn. adds प्लक्षेभ्यः
[12] Ms-के
[13] Ms-त्वावादेशो
[14] Ms यच्छब्दस्य दो यच्छब्दो
[15] Ms इत्य-
[16] Ms वाह्यनं-
[17] Ms एत्वमधिपि
[18] Ms उक्षि नच्
[19] Ms मेद्यतति
[20] Ms वास्ति
[21] Ms अत्रामि
[22] Ms प्राक्राः दूर्वा-
[23] Ms य
[24] Ms षष्ट्योः
[25] Ms-त्तिख्येक
[26] Ms पदान्ते
[27] Ms-संनय

अयमभिप्रायः—गुणो भवतीत्येतत् प्रवर्तते[1]। [2]यातादिषु नियम-स्यौदासीन्ये[3] करोतीति कि(ꣳ)करणे (?) स्यादेतत्, न कश्चिदस्ति विशेषः इत्ययमेव विशेषः अलोऽन्त्यविधिः [4]बाधितव्य इति। यावच्चेदं नारभ्यते [5]इक (इति) ताव(त्) किमन्तस्य[6] किमिह स्यादिति नियम,[7] एवं खलु—

अप्राप्ते नियम[8]इदमारभ्यत इति।

अपवादत्वं[9] (त)स्य, तस्मात् [10]अस्त्येतयोर्विरोधित्वेन अपेक्षेति क्रोष्ट्रीयाणां न सम्यगिदं दर्शनम् इति[11]"—

"असंबद्ध(म)नया परि(भा)षया। अथापि कथंचित्,

अध्यारुह्येदं वचनम्। यद्यपि कथंचित् [12]निय(म)स्यौदासीन्यं कुर्यात् चयनादिषु, एवमपि दोष [13]एव वि(प्र)तिषेधे सतीति।

एवं तर्हि वृद्धिर्भवति गुणो भ(व)ति इति।

एतत्कथम् निपातेनेदं सर्वं[14] प्रवर्तते। गुणवृद्धिसंशब्दनेषु इकः स्थाने गुणवृद्धी भवत इति। किं तर्हि? गुणवृद्धी यत्र गुणवृद्धिशब्दाभ्यां विधीयेते तत्रेक इत्येष षष्ठ्यथेविसाची हेतौ (?) भवति। अथवा इक (इ)-त्येषा श्रुतिः[15] सन्निहिता [16]भवतीति, क्रियाप्रतिलंभस्तु प्रदेशादेव भविष्यति इति यावन्ति सूत्राणि गुणवृद्धिश्रुत्युपसंगृहीतानि तावन्त्य[17]नेनोपायेन इक इति षष्ठीमति[18] (?) अयमेव न्यायो यत्पाराध्यर्थात् परिभाषा प्रधानदेशा सती ततः क्रियां प्रतिपद्यत इति। अनारभ्य किंचित्कार्यं इक(इ)त्येतत्प्रधा-नभेदात् [19]भिन्नमुत्सृज्यातेत्यनारभ्य वादो ये परिगृमः(?) [20]सूत्रप्रदेशेषु रूपमा-त्रजनिते इक इति प्रधानवाक्यं एवंभूतं सम्पन्नम्—मिदेरिको गुणो भवतीति। असमीरितवव्यापारविशेष(?) [21]नांगत्वेनालोऽन्त्यपरिभाषामपेक्षते नापि विरो-धित्वेनेति पौरुषेयो व्यापार आश्रीयते। पुरुषः स्वेच्छया प्रवर्तमानो मिदादिषु इकः अन्त्यस्यासंभवात् मिदादीन् विशेषणत्वेन प्रतिपद्यते, इकं विशेष्यत्वेन।

यथा[22] "ऊदुपधाया गोह" (सू. ६.४.८९) इति गोहिमुपधाविशेषणत्वेन। जुसादिषु[23] तु भूयसामनुग्रहादेवं कस्मान्न [24]कल्प्यते, [25]जुसादिष्वङ्गस्य य इगिति?

---

[1] Ms-र्त्तति [2] Ms स्वता- [3] Ms-मत्स्योदासीत्ये
[4] Ms वाघेतव्य [5] Ms दकाति [6] Ms किमत्यास
[7] Ms नियमा [8] Ms विषम [9] Ms-दत्व
[10] Ms दस्त्यै- [11] Ms-दर्शनसवधेन यापशिषयति [12] Ms निथसूदा-
[13] Ms एवं किति- [14] Ms निपतिनेदसेर्व [15] Ms स्तुतिः
[16] Ms भवन्तीति [17] Ms नार्वन्य- [18] Ms-ति क्रियंल
[19] Ms निन्न- [20] Ms सत्र- [21] Ms नागत्ववालो [22] Ms यथहोदुपधानाया
[23] Ms जुसाहिषु [24] Ms कल्पिते [25] Ms जुषादि-

उच्यते—कामचारेणेति[1], एवं चेत्कामचारः पुरुषस्य, इकाङ्गं [2]विशेष्यत इति नास्त्येव भूयसामनुग्रहः। उपपत्तिरप्यत्रैव वर्ण्यते[3]। इह यद्यनिवारितरूपेषु[4] अङ्गग्रहणेषु इक् विशेष्यं स्यादङ्गस्येति च विशेषणमेवं सति शब्देनाङ्गस्य गुणं प्रति यत् [5]स्यादर्थित्वं तत् [6]हीयेत, विशेषभाव[7] [8]उपयुक्तत्वादर्थेन च
५ नास्ति योग इकः स्थाने, गुणस्य निवृत्तेः। अथ त्वङ्गस्येत्येतत् इका विशेष्यते शब्दोपादानः प्रधानसं(नि)योगेन हापितो [9]भवति। इकस्तु यद्यपि शब्देन प्रधानविप्रयोगो भवेत् विशेषणत्वादेवमपि[10] इको गुणेन [11]निर्वर्तितव्यं इत्यर्थेन [12]प्रधानसंनिकर्षः। तस्माद्यस्यां कल्पनायां इकं[13] यो [14]प्रधानेन संस्पर्शः सा कल्पना आश्रयितव्या, इयं तु[15] क्वचित् व्यभिचारिणी[16] शास्त्रे दृश्येत इति।
१० तस्माच्छास्त्रवृत्तिरेव[17] ग्रहीतव्या।

## अथवा सर्वत्रैवात्र स्थानी[18] निर्दिश्यते।

तच्छेषमाश्रित्य[19] स्थानिनो निर्दिष्टत्वा[20]दि(ग)ग्रहणं प्रदेशेषु न कर्तव्य-मि(ति) [21]एतदाचष्टे।

## क्षिप्रक्षुद्रयोरपि।

१५ पूर्वग्रहणादिको भविष्यतीति सूत्रार्थमा[22]श्रित्यैतदुच्यते। यदि तावत्[23] यण आदि(:) यणादिः यणादेः परं लुप्यते पूर्वस्य गुणो भवति, यणादेः पूर्वस्येति सिद्धं क्षेपिष्ठः [24]क्षोदिष्ठः। अत्र हि यणादिः पकारो दकारश्चेति तयोः (पूर्वस्य) गुणः[25] प्राप्नोति, अथ यण्[26] आदिरस्य सोऽयं[27] यणादि[28]र्य-णादिपरं[29] शब्दरूपं लुप्यते, पूर्व(स्य गुणः) [30]युव इत्येतस्मिन् [31]वशब्दो न
२० लुप्यत इति सिद्धं यविष्ठ इति। क्षेपिष्ठे तु पकारस्य गुणः प्राप्नोति। एवं तर्हि स्थूलादिषु (ओ)गुण एव [32]करिष्यते, प्राग्भादसिद्धत्वमिति। इदं तु गुणविधानं क्षिप्रक्षुद्रार्थमेव। तत्र यणादेः पूर्वस्य गुणो भविष्यति। ननु [33]चो(का)रां(त)त्वात् स्थूलादीनामोर्गुणे कृते[34] अनेना[35]वशिष्ट(स्य) क्रियेत। तस्माद्योगविभागः कर्तव्यः[36]। स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां[37] यणादिपरं लुप्यते,

---

[1] Ms-रेसेति [2] Ms विशि- [3] Ms-त्रव वर्त्स्यते [4] Ms-पषु
[5] Ms साद- [6] Ms हियेत [7] Ms षताव- [8] Ms उपकयुक्त-
[9] Ms तवति [10] Ms-णवादेवसपि [11] Ms निर्वति-
[12] Ms प्रधरन- [13] Ms-कल्पतायो इगं [14] Ms प्रधावनेन
[15] Ms तव्य इयत्तु [16] Ms-रिण्या [17] Ms-रैव- [18] Ms स्यामी
[19] Ms-ग्रित्य [20] Ms ष्टवा [21] Ms प्रत- [22] Ms श्रित्य यदुच्यते
[23] Ms ना चत् [24] Ms क्षा- [25] Ms गुणैः [26] Ms-यवा
[27] Ms सोव [28] Ms- दे [29] Ms -परः
[30] Ms युर्वावृत्ये- [31] Ms युवशब्दो [32] Ms कारिष्यति [33] Ms चोरंतात्
[34] Ms-मार्गुणै क्षते [35] Ms-वसिष्ट- [36] Ms-व्याः [37] Ms-क्षुप्राणां

ततः पूर्वस्य गुण इति। क्षिप्रक्षुद्रयो[1](:) स्वरितत्वादनुवर्तेते[2]। स्थूलादयो [3]निवृत्ताः। तेषां (ओ)र्गुण एव भवतीति। यद्येवं [4]अनिग्लक्षणोऽयं भवति, निर्दिष्टस्थानिकत्वात्। तत्र[5] भिन्न(:) भिन्नवानित्यत्र [6]प्राप्नोति ? उच्यते— यथैवात्रेग्लक्षणत्वे सति व्यवधानात् अप्राप्ताविदमुच्यते "[7]यदेतस्मिन् योगे ५ कि्ङद्ग्रहणं [8]तदनवकाशमिति प्रतिषेधो [9]भवति" (भा. १. १. ५) इति एवमिहाप्यसति[10] इक्स्थानिकत्वे इति। (ओ)र्गुणे तर्हि "अत उपधायाः" (सू. ७. २. ११६ ) इत्यत्र[11] च यदनवकाशं कि्ङद्ग्रहणमिति प्रतिषेधः स्यात्। तस्मात् लघ्वी उपधा इगिति इग्लक्षणत्वं कार्यम्। ननु चात्र निर्वर्त्याभावात् इक्परिभाषाया[12] (अनु)पस्थानादान[13]र्थक्यं, एकारश्चेन्नास्ति [14]विशेषः आनु- १० मानिकी नै(?) पुगन्तलघूपधवत् पूर्वं भविष्यतीति।

**किं विशेषेण[15] वृद्धिग्रहणं चोद्यत[16] इति।**

[17]वाक्यकारस्य "वृद्धिग्रहणमुत्तरार्थम्" इति पठत[18] इदमनुमीयते— वृद्धिग्रहणं चोदितमिति, अतोऽसौ पृच्छ्यते—

**कि(म्) विशेषेणेति।**

१५ **गुणविधौ न क्वचि[19]त्स्थानी निर्दिश्यत इति।**

व्यवहितो नत्रत्र प्रयुक्तः। गुविधौ स्थानी [20]क्वचिन्न निर्दिश्यते, तदर्थमि(ग्)ग्रहणं कर्तव्यं अलोऽन्त्यनिवृ[21]त्त्यर्थम्। वृद्धिविधौ तु सर्वत्र स्थानिनो निर्देशात् वृद्ध्यर्थमनेन नार्थः[22], "संज्ञया[23] विधाने नियमः"(वा) इति।

२० **वृद्धिग्रहणमुत्तरार्थम् ॥ वा ॥**

[24]पूर्वं हि प्रतिषेधसूत्रं प्रत्याख्यातं, [25]परमप्यसर्वविषयमिति इदमेवो- पन्यस्यति—

**कि्ङति (इति) प्रतिषेधं वक्ष्यति, स वृद्धेरपि यथा स्यादिति।**
**यद्यचो वृद्धिरुच्यते [26]न्यमार्ट् अटोऽपि वृद्धिः प्राप्नोति।**

---

[1] Ms-द्रैयौ [2] Ms तवादनुवर्ततै [3] Ms निष्ट्रवाः
[4] Ms अतिकल- [5] Ms-त्वातातत्र [6] Ms प्रातिप्नाति
[7] Ms तदैकस्मिन् [8] Ms तदनवेकाप्रामि- [9] Ms तभति [10] Ms-संति
[11] Ms-त्यतु [12] Ms-षावा- [13] Ms-नावन- [14] Ms विविशेषः
[15] Ms-षणं [16] Ms-यहणं चोद्यत् [17] Ms वावत्यका [18] Ms पवत
[19] Ms-विधो भृ क्वाचे- [20] Ms न क्वचित्र [21] Ms-श्नेवृ- [22] Ms-र्थनोनेन तार्थः
[23] Ms संज्ञाया [24] Ms पूर्वविप्रतिषेधे [25] Ms वर- [26] Ms न्यमादी

आदि(ष्टि)दित्यटो[1] मृजिग्रहणेन ग्रहणात् (मृ)जन्तमङ्गं भवति। कथं पुनरत्राटो वृद्धिर्यावता[2] परत्वात्[3] वृद्ध्या संभवितव्यम्? कार्यकृतत्वात् पुनर्भविष्यति[4]। स्यान्मतं, [5]शब्दान्तरस्य भवतीदं नोपपद्यते—

**अ(न)न्त्य[6]विकारेऽन्त्यसदेश[7]स्येति।**

नह्यत्र वृद्धौ कृतायां[8] उभयोरस्ति प्राप्तिः। किं तर्हि? अनन्त्यस्यैवाचः। अथापि [9]कल्प्येत लावस्थायामडिति वृद्धिरपि लावस्थायां केन प्रतिषिद्धा? तस्मादभ्युपेत्याटः पूर्वत्वमिदमुच्यते।

**इहान्ये वैयाकरणाः।**

अत्र[10] चोद्यते—किमन्यवश्यमस्मिन् व्याकरणे [11]येऽन्वाख्याताः त इहापि अन्वाख्येयाः? नेत्याह। किं तर्हि? इयमपि स्मृतिर्यत्र च स्मृत्यो(:)[12] विरोधस्तत्रैव विकल्पो[13] न चेदन्यतरा अदृष्टार्था भवति[14]। इह तु[15] नास्ति विरोधः एकत्राविशेषेण वृद्धि स्म हलि(?) [16]अन्यत्र विशिष्टविषयविभाषेत्यस्याः स्मृतेः [17]कृतवृद्धिः प्रयोज्यते तिस्या अपि अकृतवृद्धिरिति यो[18] स्मृत्यन्तरे[19] प्रतिषेध[20] आरभ्यते न्यांकवं इति[21] इहाप्यन्युत्पत्तिपक्षे न्यांक[22]वमिति सिथदृषदात्तत्वादयं वाख्यातंससांघोति यत काजाह स्मृतय इष्टास्त(था) श्रुतयश्च (?) यथा शवामालेभो मद्यपानं च शुक्रेणासेवितं प्रतिक्रियमाणं प्रत्यवयाये। तशवटही (?) दृष्टा च स्मृतिर्नियतकाला। अद्यत्व एतयान्ये[23] शब्दाः स्मर्यन्ते[24] अभ्युदयायान्ये तु दोषाय। इदं च शब्दरूपमद्यत्वेऽपि प्रयोक्तव्यमत एतत्

**साध्यमिति।**

तत्र वृद्धिरच (इ)त्येता[25]वदेवास्तु, अस्य च स्मर्ता अचि किङ्कृति[26] वा भवतीति भाष्यकारः। अयं [27]चाविशिष्ट इति।

**अचिकीर्षीत्। लोपोऽत्र[28] बाधको भविष्यतीति।**

अकृतायां "अतो लोपः" (सू. ६. ४. ४८) पूर्वविप्रतिषेधात्, कृतायामप्यातो लोपेन भवितव्यमिति।

---

[1] Ms-त्यतों [2] Ms रंत्राये वृद्धियविता [3] Ms परवान
[4] Ms-र्भत्यष्यति [5] Ms शब्दातरु सालतेतादं नौप- [6] Ms अन्य-
[7] Ms-न्यसद्देश- [8] Ms वृद्धौ क्षतार्या [9] Ms कल्पेते। लावस्थो-
[10] Ms यत्र [11] Ms येत्वा- [12] Ms स्मृतिरत्रिवस्मन्यो [13] Ms तत्रव किकल्प्यो
[14] Ms भवति [15] Ms वु [16] Ms अत्यप्रतिशि- [17] Ms क्षत
[18] Ms अक्षतव्युद्धेरिति। भ्य [19] Ms स्मृ अतरे [20] Ms-षेप्र
[21] Ms न्याकवसिति [22] Ms-त्तिथक्षेन्योक- [23] Ms-ये [24] Ms स्मयति
[25] Ms-त्योता- [26] Ms किति [27] Ms चादि- [28] Ms-र्षत् लोपेस्य

[1]उदवो(ढा)मिति ।

अत्र [2]ढलोपस्यासिद्धत्वात् पूर्वं वृद्धौ[3] [4]कृतायां, ढलोपादिषु कृतेषु औत्वे[5] कृते कार्यकृतत्वान्न भविष्यति ।

[6]सिचि वृद्धेरप्येष प्रतिषेधः । कथम् ? लक्षणं हि नाम
५ ध्वनति [7]भ्रमति मुहूर्तमपि नावतिष्ठते ।

विशेषो नाश्रीयते। संयोगसंज्ञायामेष चेत् नास्ति बहूनामिति उत्तरत्र शब्दाविशेषं वक्ष्यति "अथवा[1] पुनरस्तु अविशेषेण द्वयोः बहूनां चेति"। बहूनामानन्तर्ये कथं[2] बहूनामेव मन्यते न द्वयोः? उच्यते—यथैव द्विर्वचने निमित्तवत्स्ववयवेषु समुदायेन च समुदाय एव द्विर्वचनं[3] प्रतिपद्यते नावयवाः।
५ अथवै[4]काज्ग्यपदेशः सर्वेषां कथं भवति, [5]पकारस्याकारस्य [6]पच्छब्दस्य च? [7]पच्छब्द एव द्विरुच्यते, एवमिहापि बहवश्चानन्तराः षटराः[8] उष्ट्र इति [9]षटावपि अनन्तरौ [10]टरावपि, सत्यपि त्वानन्तर्ये निमित्ते च बहुभिरेव प्रतिपन्ना न द्वाभ्यामिति। यत्र तु द्वावेवानन्तरौ न तयोर्निवर्त्यते संयोगसं(ज्ञा)[11]। द्वयोस्तु कथमित्युत्तरत्र प्रतिपादयिष्यति।

१० **समुदाये संयोगादिलोपो मस्जेः ॥ वा ॥**

नुमि कृते त्रयाणामानन्तर्यम्, नसजाः[12] संयोगसंज्ञाः। न नसौ नापि सजाविति मस्जेः सकारलोपो न प्राप्नोति, असंयोगादित्वात्।

**इह च निर्ग्लेयात् [13]निर्म्लेयात् इत्येत्वं[14] न प्राप्नोति।**

योऽत्र संयोगो ना(सा)वंगस्य[15] कश्चिदपि, यश्चास्य नासौ संयोग
१५ इति। क्व[16] तर्हि स्यात्? ग्लेयात् म्लेयादिति।

**(द्वयोः) हलोः संयोग इति चेत् द्विर्वचनं न सिद्ध्यति।**

**[17]इन्दिद्रीयिषति इति।**

अत्र हि[18] द्वौ संयोगौ, एकस्य नकार आदिरपरस्यादि(:) दकार इत्युभयोः प्रतिषेधः प्राप्नोति "नन्द्राः" (सू. ६. १. ३) इति।

२० **न [19]वाज्विधेः ॥वा॥**

एवं हि उक्तं "द्वितीयस्येति न वक्तव्यं, अजादेरिति पंचमी" (भा. ६. १. २) इति। इहापि—

**[20]अजादेरिति वर्तते।**

तेन य एवासौ वर्णोऽनन्तरः संयोगादिस्तस्य प्रतिषेधो न दकारस्येति।

२५ **आहोस्विदन्यतरस्मिन् पक्षे[21] भूयः सूत्रं कर्तव्यमिति।**

---

[1] Ms-ता  [2] Ms कथं  [3] Ms-चान
[4] Ms-कच्  [5] Ms मका-  [6] Ms-स्यं प्रछ-
[7] Ms यछ-  [8] Ms वटराः  [9] Ms पटा-
[10] Ms टारा-  [11] Ms संयोगस्तु  [12] Ms-जः
[13] Ms निर्म्ल-  [14] Ms-त्येवं  [15] Ms-वगस्य
[16] Ms च्च  [17] Ms इदिः-  [18] Ms ह
[19] Ms चाजिषै  [20] Ms अंजा-  [21] Ms पक्षै

[1]एकाजुक्तन्याय एव, पक्षे बहूनां संयोगसंज्ञेति। इतरस्मिंस्तु[2] पक्षे यत्नः[3] कर्तव्यः यदि तथा लक्ष्यं सिद्ध्यति।

**गतमित्याह।**

अयमभिप्रायः[4]—सत्यपि बहूनां संभवे यदि तथाभूतोऽर्थ इहोपात्तो योऽत्यन्तमसंभवी बहूनां, द्वयोर्द्वयोः भवितव्यमिति।

**तदैवं[5] विग्रहः करिष्य(ते)–अविद्यमानमन्तर(मे)षामिति[6]।**

अनन्तरशब्दोऽविवरवाची बहवश्चा(नं)तरा[7] (अ)विवरा अच्छिद्रा द्वावप्यविवरौ तयोस्तु द्विर्वचन(वत्)[8] संयोगसंज्ञा न प्रवर्तते। नन्वेवं[9] विगृहीतव्यं, एषामिति बहुवचनोपादनात्[10]? द्रव्याश्रयमेतत् बहुवचनं, इतरथा हि द्वयोर्न स्यात्।

**यदा द्वयो(र्द्वयोःसंयोगसंज्ञा) तदैवं[11]**
**विग्रहः करिष्यते अविद्यमाना अंतरा एषामिति।**

अधिकरणार्थं [12]वृत्तोऽन्तराशब्द उपादीयते यश्चासौ मध्ये भवति नासौ बहूनाम्। किं तर्हि? द्वयो(ः)यदा च न भवति तदा द्वयोरेवेति ययोरेव [13]सान्तरत्वमसान्तरत्वं वास्ति [14]तयोरेव संज्ञ(या)भवितव्यमिति एतमर्थमाचष्टे—

**द्वयोश्चैवान्तरा कश्चित् विद्यते।**

ययोरेव विद्यते अन्तरा तयोरेव[15] तदभावे संज्ञया प्रवर्तितव्यमित्याह–

**न वेति।**

कथं पुनरत्र षष्ठी यावता "अन्तरान्तरेण युक्त" (सू. २.३.४) इति द्वितीया प्राप्नोति? उच्यते—यदान्तरिणौ भेदेनोपादीयेते त्वां च मां च, गार्हपत्यं चाहवनीयं चेति, तदान्तरि(त)रूपेण[16] प्रवर्तमानो द्वितीयां प्रतिपद्यते। यदा तूत्सृज्य भेदं संबन्धिरूपेण प्रवृत्तिः तदान्तरि(त)रूपेणानभिधानात् न ज्ञायते द्वयोरनन्तर (इ)त्युक्ते किमन्येन सह द्वयोः आहोस्वित् तयोरेवेति, षष्ठी कृता न द्वितीया। यद्येवमिह कथम् "तद्वाचिनः शब्दस्य प्रयोगमन्तरेण" (भा. १.२.६४) इति, तथा "अन्तरेण वरारोहाम्[17]" इति? उच्यते—अय-

---

[1] Ms एकास्कन्न-
[2] Ms-स्मिन्सु-
[3] Ms यत्नः
[4] Ms-भिघायः
[5] Ms तदेव
[6] Ms-न्तरेषामिति
[7] Ms-श्चान्तर्यं
[8] Ms-चनं
[9] Ms न त्वेवं
[10] Ms नाव-
[11] Ms तदेवं
[12] Ms वृतो-
[13] Ms सं। त-
[14] Ms-रेत संज्ञा
[15] Ms-रांतरयोरेव
[16] Ms वूपेण
[17] Ms वरोराहीं

मन्तरेणशब्दो विनाशब्दार्थवचनो मध्यवचनश्च उभयार्थो[1], विनायोगे द्वितीया विधीयते "अन्तरान्तरेण युक्त" (सू. २. ३. ४) इति।

**एवमपि बहूनामेव प्राप्नोति। या(न्) हि भवानत्र षष्ठ्या प्रतिनिर्दिशति।**

केचिदेषामिति बहुवचनोपादानात् बहूनामेव भवितव्यमिति वर्णयन्ति तदयुक्तम्। आनन्तर्योपलक्षणपरे वाक्ये संख्याया [2]अविवक्षितत्वात् यत्प्रत्याख्यानन्तर्यमित्येतावत् वि(व)क्षितम्। इतरथा हि अस्वादिषु न स्यात्। तस्मादेतेनैतत् प्रतिपादयति—अविद्यमाना अन्तरा येषामिति, योऽसावन्तरा इति स द्वयोश्च बहूनां (च)। न चेत् बहूनां किमर्थं तेषामनन्तराणां संयोगसंज्ञा न प्रवर्तते त्रयाणां हि, आद्यन्तौ[3] व्यवहितौ[4] न तु (म[5])यः। तत्र यदि बहूनामतुल्यजातीयोऽन्तरा स्यात् न प्रवर्तते बहूनाम्।

**[6]अन्त्यात्पूर्वो मस्जेरिति।**

[7]तच्चावश्यं वक्तव्यम् अनुषंगलोपार्थम्, मग्न इति

**अथवा अविशेषेण संयोगसंज्ञा [8]विज्ञास्यते, द्वयोरपि बहूनामिति।**

कथं कृत्वेदमुच्यते, यावतोक्तं समुदायस्यै(व) भवितव्यम् संयोगसंज्ञा[9] या[10] नावयवानामिति यथा समुदायस्यैकाच[11] द्विर्वचनं नावयवानामिति? एषोऽभिप्रायः–यथा समुदाये द्विरुच्यमाने अवयवा अपि द्विरुच्चारिता भवन्ति; अयं तु विशेषः; एकः प्रत्यक्षतोऽपरः अनुमानतः, कार्यप्रतिपत्तिस्तु (तु)ल्या–एवमिह द्विर्वचनवद्यदि समुदायदारकं कार्यमवयवानामप्य संयोगकार्यम् (?)। अथ न प्रतिपद्यन्ते सहभूतानामवयवसंज्ञेति दृष्टान्तो द्विर्वचनं न भवति (?) तत्र समुदायद्वारकं कार्यमप्रतिपद्यमाना[12] अर्थिनोऽवयवा (:)[13] संयोगसंज्ञाया(:) सति निमित्ते किमिति न प्रतिपद्यन्त इति। यथा च द्विर्वचने (अ)विरोधेन शक्यमवयवस्य क्रियमाणे द्विर्वचने, अवयवान्तरस्य समुदायस्य च कर्तुमयोपहृतत्वात् (?) एवं संयोगसंज्ञायां नास्ति विरोधः। अस्ति हि संभवो, यत् समुदायस्य च स्यादवयवानां चेति।

**यदप्युच्यत इति।**

अयं ग्रन्थोऽस्मादनन्तरं युक्तरूपो दृश्यते—"वक्ष्यत्येतत् अन्त्यात्पूर्वो मस्जेरिति"। किं पुनरयं[14] बहूनामेव संयोगसंज्ञा इत्येतस्य परिहारः[15] अथाविशेषेण संयोगसंज्ञेति? एकस्तावत्परिहारः, बहूनामेवाभ्युपगम्यायं परिहार इति तत्कथमिव समुदायेऽकार्यभाजिनि [16]अवयवा न लभन्ते। समुदा-

---

[1] Ms-यार्थे नावियोगे  [2] Ms अपि-  [3] Ms-न्तो
[4] Ms-तो  [5] Ms अत्या-  [6] Ms तस्याव-
[7] Ms विधास्यते  [8] Ms-ज्ञाया  [9] Ms-काचो च
[10] Ms-मानो  [11] Ms-वयव-  [12] Ms-रियं
[13] Ms-ह्वारा  [14] Ms अवयवान्

यश्चैजिति[1] वा निर्दिश्यते स्य (?)। अथवा स्वरूपेणैव[2] एओङ् ऐऔजिति। इह त्वनवधारिता हलोऽनन्तराः संयोगसंज्ञाभाजो निर्दिश्यन्ते। तत्राङ्गस्य संयोगादेराश्रीयमाणे[3] त्रिव्यञ्जनविषयमानन्तर्यमनाश्रीयमाणं कथमिव द्वयोरानन्तर्यनिमित्तायाः संयोगसंज्ञायाः प्रतिबंधे[4] वर्तिष्यत इति। अन्ये[5] वर्णयन्ति सर्वमिदं भाष्यं परपक्षोच्चारणमात्रे निर्दिष्टम्। यदुक्तं भवता—अङ्गेन[6] संयोगो विशेष्यते, यश्चात्र संयोगो नासावङ्गस्य सः संयोगो न भवतीति, एतदसत्[7]। कुतः? यस्मादविशेषेण संयोगसंज्ञा द्वयोश्च बहूनां चेति। अपरे[8] वर्णयन्ति—अनेन ग्रन्थेन एतदुपपादयति—यदेव भवता अप्राप्तिनिमित्तमुक्तमङ्गस्य संयोगविशेषणत्वादिति तदेव मे प्राप्तिनिमित्तम्। विद्यते ह्यत्राङ्गस्य संयोगादित्वं, संयोगसंज्ञाया अविशेषेण प्रवृत्तेरिति।

[9]स्वरानन्तर्हिता हलः संयोग(संज्ञा) इति पठितव्यम्[10]।

इतरथा हि अज्भिर्व्यवहितानामपि प्राप्नोति संयोगसंज्ञा।

## पचति पनसमिति।

हल इति च वचनात् साच्कानां नास्ति प्रसंगः, हलामेव तु प्राप्नोति। तत्र पचतीति रूपोदाहरणम्; इदं तु कार्योदाहरणं, पनसमिति। केचिन्मन्यन्ते, [11]अपाठोऽयमिति। अपरे, वाक्यमि(ति)। एतस्मिन् हलां[12] संयोगसंज्ञायां सत्यां यावत् संयोगसंज्ञाकार्यं तावत (?)।

## (अनन्त)राविमौ ग्रामाविति।

(यथा) सत्यपि व्यवधाने नद्या[13] पर्वतेन[14] वा अ(नं)तर[15] व्यपदेशं लभते, एवमिहापि हलो व्यवहिता अपि[16] लभन्ते [17]अ(नं)तरत्वमिति, कर्तव्यं स्वरानन्तर्हितवचनम्।

[18]अनन्तरवचनमिदानीं किमर्थम् स्यात्?

एषोऽभिप्रायः—हलावनन्तराविति्युच्यमाने बहूनां नैव स्यात् बहूनां चाव्य(व)धानात्प्रवर्तत एव संयोगसंज्ञा द्वयोरपि [19]व्यवहितयोरपि भवितव्यमिति ब्रवीषि, तन्न[20]।

किमर्थ[21]मनन्तरवचनमिति (चेत्) एकप्रतिषेधार्थम् ॥वा॥

अनन्तरवचनेन विषय(:) परिच्छिद्यते, यत्रानन्तर्यमित्येतदस्ति स

---

[1] Ms-श्चेजिति [2] Ms-पोणैव [3] Ms-श्रियमाणे [4] Ms-वंद्धे
[5] Ms अंते [6] Ms आंगोन [7] Ms-दसशं [8] Ms अपरं
[9] Edn स्वरैरन- [10] Ms पाठि-; Edn वक्तव्यम् [11] Ms प्रपा-
[12] Ms हलो [13] Ms नेद्या [14] Ms पर्यंतेन [15] Ms अंतर-
[16] Ms स्रपि [17] Ms अंत- [18] Edn आनन्तर्यव-
[19] Ms व्यवाह- [20] Ms तत्र [21] Edn-मानन्तर्यव-

विषयो विज्ञेयः संयोगसंज्ञाया इत्येको हल् पर्युदस्तो भवति, ततोऽर्थवदनन्तरवचनम्।

## इयेषेति[1]। आं प्रसज्येत[2]।

(गुरु)मद्वचनं इंदा.....यः शुद्ध इजा(दिः) इण्[3] गताविति तन्निवृत्त्यर्थम्।

## [4]न वाऽतज्जातीयव्यवायात्[5] ॥वा॥

यो हि भिन्नजातीयः,[6] व्यवधायकोऽसौ[7] भवति। लोके तेस्यदिण् (?) [8]दृष्टान्तमुपादत्ते—

## एवं हि कंचित् कश्चित्पृच्छतीति। वृषलकुलम्[9]।

अत्र चोद्यते—ननु च ब्राह्मणकुलमपि तुल्यजातीययो[10]र्व्यवधायकमेव? नैष दोषः। नैतावदेव परं तुल्यजातीयं परं व्यवधायकं भवति। यस्तु[11] भवतः पक्षः, अतुल्यजातीयकं च व्यवधायकं नेति, एतत् निवर्त्यते। अतो लोकवदिहापि स्वरव्यवहितानां नास्ति संयोगसंज्ञा। हल्व्यवधानेऽपि नास्ति उष्ट्र इति षकारस्य रेफस्य च टकारेण व्यवधानात् त्रयाणां व्यवधानात्। तथा[12] षटयो रेफटकारयोश्च[13] प्रवर्तत एव[14] च संज्ञेति।

## किं पुन(ः) कारणमिति।

इह यस्तथानन्तरशब्दस्य (?) दृष्टा प्रतिपत्तिः तत्रोपपत्तिं पृच्छति कात्रोपपत्तिः—[15]यदनन्तरशब्दः क्वचित् व्यवहिते प्रवर्तते, क्वचिन्नेति। इतरः एकान्तेनैव[16] व्यवधानमतज्जातीयेनाभ्युपगम्याह—

## सर्वत्रातज्जातीयं[17] व्यवधा(य)कमिति। ग्रामशब्दो(ऽयं) बह्वर्थः।

एतदाचष्टे—अनन्तरशब्दोऽत्राविकल्पार्थः ग्रामशब्दस्तु विकल्पितार्थः। तत्र योऽयं प्रयोगे "अनन्तराविमौ ग्रामाविति" अत्र ग्रामशब्दस्य [18]कश्चिदर्थविशेष(ः) परिगृह्यते। तत्र बह्वर्थतायां विप्रतिपत्तिः। केचिन्मन्यन्ते—शब्दा एव प्रविभक्तरूपा अनेकवाक्यविषयाः, सारूप्यात्तत्त्वाध्यवसायः। अपरे मन्यन्ते—एक एव शब्दोऽनेकशक्तिः तस्य त्वर्थवशात् क्वचिदेव शक्तिः कस्मिंश्चिदे(व) वाक्य आश्रीयत इति। यथा तु भाष्यं तथा शब्दा एव प्रविभक्ता इति लक्ष्यन्ते। एवं हि निगमनम्—

---

[1] Ms इमेषेति [2] Ms प्रयुज्यता [3] Ms रण [4] Ms भवात-
[5] Ms -याश [6] Ms-ती गुरु यः [7] Ms सो [8] Ms दृष्टं। त
[9] Ms-षकं कुलं; Ms has it after ननु च [10] Ms-तीयसंतयो-
[11] Ms वस्तु [12] Ms तया [13] Ms-ठकारेयोश्च
[14] Ms एवं [15] Ms यमानं- [16] Ms एकांत्तरैव
[17] Edn सर्वत्रैव ह्यतज्जा-तीयकं [18] Msकंचि-

## तद्यः सारण्यके ससीमक[1] इति ।

शक्ति-[2]प्रविभागाभ्युगमे हि एवं वक्तव्यं

## तद्यथेति[3] ।

अतो ग्रामशब्दस्तस्यास्तस्याः क्रियाया उपपादनात् वाक्ये[4] वाक्ये तं तमर्थमुपादाय प्रवर्तमानस्तदर्थोपक्षेप एव[5]। तत्र योऽयं ग्रामशब्दः 'अ(नं)-तराविमौ ग्रामौ" इति, अयं नित्यमेव सारण्यके ससीमके सस्थण्डिले वृत्त इति नद्या अप्यन्तर्भावात् अनन्तरावेवैतौ[6] न व्यवहितौ[7] इति नैव[8] व्यवहिते अनन्तरशब्दो वर्तते। अथ यदा ग्रामोऽस्तीति प्रयुज्यते तदा किं युगपदेतेऽर्थाः प्रत्याय्यन्ते[9] इतः पृथक् पुरुषाः पृथक् [10]शालासमुदायः पृथक् च ससीमकं[11] सस्थण्डिलकमिति ? [12]नैवंभूतमस्ति प्रत्यायनम्। सारण्यके ह्यन्तर्भाविताः पुरुषादयः (न) पुन(:) निर्देष्टव्या इति नास्ति संभव(:)। तस्मात्सर्व एव शब्दाः कस्मिंश्चिद्विशेषे[13] प्रयुज्यन्ते, स तु प्रतिपन्ना विगृह्यते। एतावत्तु प्रति-पद्यते, कश्चिदेवार्थोऽनेन प्रक्रान्त इति। अतश्च न प्रतिपत्स्यते, यत्र पृच्छति "कोऽत्र भवतोऽभिप्रेत" इति। केषांचि(त्) त्वत्रेदं दर्शनं [14]वाटपरिक्षेपेऽस्य मुख्या वृत्तिः पुरुषादिषु तु गौणी तात्स्थ्यात्[15] सामीप्याद्वा[16] इति। यथा नन्दिग्रामो मल्लग्राम इति, सत्यपि तन्निवासिनां पुरुषाणामितरेतरगमने न[17] नन्दिग्रामो मल्लग्राम इति संपद्यते, मल्लग्रामो वा (नं)दिग्राम इति[18]। तेषां तु कर्मनिमित्तमिदं दर्शनम्। [19]एवं हि श्रौतानि स्मार्तानि च कर्माणि अव-स्थिता(नि); ग्रामे नाध्येयं ग्रामं च [20]न प्रविशेत्; तथा कर्मान्तरं "न भुक्त्वा न ग्रामे शुक्रियं[21] चेति"। [22]वाटपरिक्षेपे [23]नाधीयते, तमेव च न प्रविशन्ति, सीम्नि तु पठन्ति प्रविशन्ति च। अपर एवं मन्यन्ते—सारण्यके ससीमके सस्थण्डिले मुख्या वृत्तिः, समुदायशब्दस्तु श्रुत्वावयवेषु पुरुषेषु वर्तते यथा "पूर्वे पंचाला" इति। अस्मिन् दर्शने [24]भाष्यं निगमितं भवति,

## ग्रामशब्दोऽयं [25]बह्वर्थ इति ।

अतोऽस्यैतत् दर्शनं—यथा अश्वः[26] इति नामपदमाख्यातपदं वात्यन्त-मितरेतरमनुपकारि स्वार्थे प्रवर्तते, जातिमत्यर्थे ससाधनायां[27] च क्रियायामेवं ग्रामशब्दोऽपीति।

---

[1] Ms ससामक [2] Ms-प्रविभक्ति भागात् भ्यु- [3] Ms तद्यदेति
[4] Ms वाक्य [5] Ms-क्षेय एवां [6] Ms-वेवेतौ
[7] Ms-ता [8] Ms नैवं [9] Ms-त्याप्यंते [10] Ms स्थूला: समु-
[11] Ms ससीतकं [12] Ms मैवं- [13] Ms-शेष
[14] Ms पाठं परि- [15] Ms तास्थात- [16] Ms-सापीथाद्वा
[17] Ms-गमनेन [18] Ms-दिग्रामो मल्लग्राम इति [19] Ms एवाहि
[20] Ms नद्यवि- [21] Ms भुक्त्वा च ग्रामे सुक्रियं; MG. I. 4. 13-14
[22] Ms पाठप- [23] Ms चाधी- [24] Ms नाध्यं नग-
[25] Ms षद्वर्थ [26] Ms यथास्यं [27] Ms-नातां

## मुखनासिका(वचनोऽनुनासिकः) १।१।८

### किमिदं मुखनासिकावचन इति ?

कुतः प्रश्नः ? एवं मन्यते—यथायं शब्दसंज्ञे(?), न तथाभूतोऽर्थ उच्यते। एवंभूतो ह्यर्थोऽभिप्रेतः मुखेन नासिकया यः उच्यते सोऽनुनासिक इति; शब्दस्त्वेवमवस्थितो—मुखनासिकमवचनमस्येति। तत्र न शब्दोऽर्थस्य सदृशः नार्थः शब्दस्येति।

### निपातनाद्दीर्घत्वं भविष्यति।

अस्यायमभिप्रायः न लोकेऽन्यथाभूत(ः)[1] शब्दः शास्त्रे कृतदीर्घ उच्चारितः किन्तु लोकेऽप्ययमेव स्मर्यते[2]। स्मर्यमाणस्य च निपातना(त्)[3] साधुत्वमन्वाख्यायते यथा "सर्वनामानि[4]" (सू. १. १. २७) इति। [5]इतरथा हि किमिति गुरुनिर्देशं कुर्यात् ? मुखनासिक[6]वचन इति न भवितव्यम्। अथ त्वेवं कल्प्यते[7], यदेवै तत्प्राकृतमुभयथा शब्दरूपं [8]द्वन्द्वे प्राप्तं, समाहार इतरेतरयोगे [10]च नित्येनैकवद्भावेन बाधितमनेन तस्य पुनः प्रसवः क्रियत इत्युभयथा भवितव्यम् (?)। अन्ये तु नपुंसकलिंगतामेव विभाषयन्ति-नित (?) नासिकावचन इति। केचिद्विपरीतं कल्पयन्ति-उभयत्र तु नासिकामुखवचने भागेऽनुरागं करोति, यथान्यवर्णस्थो.....नुरागं करोति सँय्यन्ता सँवत्सर इति [11]अकारोऽप्यनुनासिक [12]इवालक्ष्यते। तत्र तु प्रासादवासिन्यायो नास्ति यथा स्वरिते भागप्रविभागा(भा)वात् नोदात्तव्यपदेशो[13] नाप्यनुदात्तव्यपदेशः अवयवौ [14]तस्योदात्तानुदात्तौ समुदायस्तु गुणान्तर[15]युक्तः यथा "कल्माषः सारंग[16]" इति न भवति ग्रहणं समुदायस्येति। अस्मिंस्तु दर्शने[17] पाणिनिना मुखग्रहणं पठितमिति दृश्यते। चूर्णिकारस्तु भागप्रविभागमनाश्रित्य कृत्स्न एव वर्ण उभयस्थानो यथा भ्राष्ट्रपक्वः किलोसापक्वश्च तथा[18] मुखवचनोऽप्यसौ नासिकावचनोऽपि यथा भ्राष्ट्रपक्वोऽप्यसौ किलोशीपक्वोऽपीति, प्रासादवासिन्यायेन मुखग्रहणं प्रत्याचष्टे।

### [19]ईषद्वचनमावचनम्।

स हि वर्णो [20]न मुख एव नापि नासिकायामेव चात्मवृत्तिं लभते। किन्तु वायुनान्यतरस्मिन् [21]अनुपरतशक्तिनान्यतरक[22]रणेऽभिहन्यमाने स

---

[1] Ms भूत। [2] Ms-र्यत [3] Ms-तन [4] Cf MB. I .1 27.
[5] Ms-रितरथा [6] Ms-सिका- [7] Ms कल्पते [8] Ms यदेवं
[9] Ms द्वे द्वे [10] Ms चानित्ये- [11] Ms अकरो- [12] Ms इवोलभ्यते
[13] Ms-देशा- From अवयवौ to समुदायस्येति is written in the Ms after प्रतिपद्यते in line 10 on page 163
[14] Ms तस्यौदादानु- [15] Ms-न्तरं [16] Cf MB. I. 2. 31
[17] Ms दर्शन [18] Ms तत्र [19] Ms ईषत्
[20] Ms-श्र. [21] Ms अनुनुप- [21] Ms रन्क

वर्ण आत्मव्यक्तिं प्रतिपद्यत इति। [1]ईषन्मुखस्य व्यापार [2]ईषन्नासिकायाः। अत्रापि सामान्यशब्दस्याव्यावृत्तत्त्वात् इदमनिवृत्तमेव शब्दरूपं मुखनासिकवचन इति; यो हि ईषदुच्यते उच्यतेऽप्यसौ। [3]यथा शुक्लतरो न भवति न शुक्लः भवत्येव शुक्ल इति यथा ईषत् [4]दूरं दूरमेव।

५ **मुखद्वितीया वा नासिका वचनमस्य।**

शाकपार्थिवादित्वात्समासः। मुखद्वितीयेति, मुखसहायेत्यर्थः। यथा "असिद्वितीयोऽनुससार" (भा. २. २. २४) इति। तत्र साहचर्यात् नासिका मुखमिति व्यपदिश्यते, मुखनासिका वचनमस्येति। अत्रापि "न दण्ड[5]वारितो" द्वन्द्व इत्यव्यावृत्तो मुखनासिकवचन इति शब्दः।

१० **[6]मुखोपसंहिता वा नासिकेति।**

(केचित्) वर्णयन्ति—पूर्वत्रोत्तरपदलोपो नान्वाख्यातः इह त्वन्वाख्यातः, "सिद्धं (तु) समानाधिकरणाधि[7]कारे क्तस्तृतीयापूर्वपद उत्तरपदलोपश्च" (वा. २. १. ३५) इति, एतच्चासत्। लोपस्य[8] तत्र प्रत्याख्यातत्वात्। तस्मादनेनैतत्प्रतिपादयति—नासिकामुखोपसंहितमस्य स्थानान्तर[9]मन्यदेव,
१५ न मुखं नापि नासिका। किं तर्हि? तयोरन्तरालं, यथा "गंगायमुनयोर्वेणिका[10]" इति। अस्मिन्नपि प्रासादवासिन्यायो दुर्लभः स्थानांतरत्वादिति। ननु चैतस्यां कल्पनायां टित[11] इति [12]ङीपा भवितव्यं, "मुखनासिकावचनीक अनुनासिक" इति? नैष दोषः। वचनं प्रधानं, मुखनासिकया विशेष्यते। न च प्रधानं गुणलिङ्गं प्रतिपद्यत इत्येव नासिकावचन इति। यथा विंशति-
२० र्गाव[13] इति गुणिप्रधानेऽपि निर्देशे न गावो विंशतिः[14] (?)

**(यमानुस्वाराणामेवेति)।**

(असति) चैतस्मिन् न्याये दोष एव भवति—[15]अन्तरतमस्याभावात् "आङोऽनुनासिकः" (सू. ६. १.१२६.) "अणोऽप्रगृह्यस्यानुनासिकः"(सू. ८.-४. ५७) "यरोऽनुनासिक" (सू. ८. ४. ४५) इति एत एव यमानुस्वारा(:)
२५ प्राप्नुवन्ति। ये त्वन्ये "(विड्वनोर)नुनासिकस्यात्" (सू. ६. ४. ४१) इत्येवमादयस्तेष्वसंभव एव यमानुस्वाराणां, न ह्येते [16]धात्वंते भवन्तीति। येषां तु "यमानुस्वाराणामपि" इति ग्रन्थः तेषां तु प्रासादवासिन्यायो मनसि वर्तते इत्येवं वर्ण्यते एवं च [17]सत्यंतर(त)मा एव भविष्यन्ति न यमानुस्वारा इति; वक्ष्यति "नैव[18] दोषो न प्रयोजनम्" इति।

---

[1] Ms इष- [2] Ms-तृष- [3] Ms याथा [4] Ms पुर दूमूर
[5] Ms तदंड, Cf MB. II. 2. 24 [6] Ms मुख्यो-
[7] Ms कारोक्त तृ- [8] Ms-स्या [9] Ms-नात्तर-
[10] Cf MB. I. 1. 72 [11] Ms-या ङित [12] Ms ङि-
[13] Ms-ति गवि [14] Ms विशति [15] Ms अनन्त-
[16] Ms धात्वंते [17] Ms सत्यनंत- [18] Ms नैष

[1]कचटतपानामेव प्रसज्येत ।

एवं च सति पक्वमिति[2] "अनुदात्तोपदेश" (सू. ६. ४. ३७) इति लोपः प्रसज्येत[3], [4]ओदनपक् "अनुनासिकस्य क्विझलोः (सू. ६. ४. १५) इति दीर्घत्वम् ।

५ प्रासादवासि[5]न्यायेन ।

अयं प्रासादवासिन्यायः क्रियानिमित्तेषु व्यपदेशेषु प्रवर्तते, न रूढौ । यथा कश्चित्, न च प्रासादवासित्वं भूमिवासित्वं वा रूढिनिमित्तं, क्रियानिमित्तमेवेत्युभाभ्यां व्यपदिश्यते; एवं व्याकरणे अपि न नासिकावचन इत्येतन्न[6] कस्मिंश्चित् परिधापितं(?) प्रसिद्धं चेति क्रियानिमित्तत्वादेव व्यप-
१० देशमुभयवचनोऽपि वर्णः प्रतिपद्यते[7] ।

नैव[8] दोषो न प्रयोजनम् ।

आन्तर(तम्या)न्मुखवचनस्य[9] उभयवचनो[10] भविष्यतीति ।

इतरेतराश्रय उक्तम् ॥ वा ॥

कव[11] ? वृद्धिसंज्ञायाम्[12]; इह तु पुनरुच्यते । अस्य (नि)दर्शना-
१५ र्थमनुनासिकसंज्ञा [13]संहितावसानसंज्ञावत् लोकविदि(त)त्वात् नैवारब्धव्या । अथाबुधबोधनार्थमारभ्यते, यो दोषस्तस्मिन् प्रतिविहितमेवेति ।

तुल्यास्यप्रयत्नं ( सवर्णम् ) १।१।९

तुल्यस्थानप्रयत्नानां प्रदेशेषु कार्यसंप्रत्ययार्थं, स्वरूपग्रहणे च[14] शास्त्रं (गुरु) संपद्यत इति संज्ञाप्रणयनम् । अत्र च त्यास्तुतपदानुह(?) प्रवृत्तेः
२० प्राक्[15] द्वन्दो योतृघातः(?) । अथवा यस्मिन् वृत्त्यर्थं वाक्यमुपन्यस्तं तां वृत्तिमुच्चारयति—

तुलया संमितं तुल्यं, आस्यं च प्रयत्नश्च आस्यप्रयत्नमिति ।

केचित् तुल्यमिति गुणकल्पनया कुर्वन्ति, तुल्यमिव तुल्यमिति । तन्न[16] युक्तं । सामान्येन प्रयत्न[17]स्तुल्यमित्युक्ते सर्वत्राविशेषेण सदृशे संप्रत्ययो
२५ दृश्यते । यत्र च गौणत्वं न तत्रान्तरेणार्थप्रकरण[18]शब्दान्तराभिसंबंधात् भवति संप्रत्ययः । तस्मात् [19]यत्प्रत्ययान्तो रूढिशब्दोऽयं सदृशसमानसदृक्ष-

---

[1] Ms-कचपूयाना- [2] Ms-निति [3] Ms ज्यत
[4] Ms अद- [5] Ms-दावासि [6] Ms तत्र
[7] The next sentence beginning with अवयवौ has been transported to p. 161 [8] Ms नैष [9] Ms-नंस्यो-
[10] Ms-चनोत् [11] Ms क [12] Ms-संधायां
[13] Ms सहि- [14] Ms यः [15] Ms प्राक
[16] Ms तत्तु [17] Ms-त्ले- [18] Ms-णात्वा [19] Ms यत

पर्यायः। व्युत्पत्तिकर्मणि केवलं [1]तुलोपादीयते, कस्यचित् शब्दस्यानुगमात् नत्वत्र[2] तुला नापि संमितव्यम्, यथा कुशलः प्रवीणः प्रतिलोमः अनुलोम इति।

## किं पुनरास्यम्।

किमास्यं मन्यसे, समुदितमथ प्रदेशानिति वाक्योपन्यासोपक्षेप [3]एव।

## लौकिकमास्यम्।

लोके विदितम्। यथैव पशुरपत्यं देवता तथैवास्यमपीति। किं पुनस्तल्लोके विदितमितीदमाचष्टे—

## (ओ)ष्ठात्प्रभृति प्राक्का(क)लकात्।

ग्रीवायामुत्कृष्टः प्रदेश [4]उच्यते।

## कथं पुनरास्यम्?

एतमर्थं पृच्छति, नैतावता निश्चेतुं शक्यते। (ओ)ष्ठात्प्रभृति प्राक्का-(क)ल[5](का)दित्येवं उच्यमाने न ज्ञायते, किमोष्ठात्प्रभृति [6]प्राक्काकलकाद्ये प्रदेशास्ते गृह्यन्ते, अथ समुदित[7] मास्यमिति। [8]केचिच्चोदयन्ति—
(फलाभावात्) निर्ज्ञात आस्ये अस्येशब्देऽर्थप्रवृत्तिकारणप्रश्नावैयर्थ्यमस्ति फलं (?) किं निमित्तमुपादाय प्रवृत्तः अथानिमित्तो [9]डित्थवत्? यदि स्वरूप-निमित्तापकारी स्थानविशेषेऽपि वर्तिष्यत इति नास्ति दोष इति प्रवृत्तिकारणं [10]दर्शयन्तः प्रश्नकारणं दर्शयन्ति। इतरो व्युत्पत्तिमाचष्टे—

## [11]अस्यन्त्यनेन (वर्णानि)त्यास्यम्।

कृत्यः करणसाधनः स्नानीयं चूर्णमिति यथा। येन वर्णानस्यन्ति। असनमत्राभिव्यक्तिः[12] निष्पत्तिर्वाभिप्रेतो वर्ण(ना)मिति[13]। अनेनासन-विशेष एव आख्यायते रूढिविषयः।

## अन्नमेत[14]दास्यं(द)त इति वा आस्यमिति[15]।

अनेनैतदाचष्टे स्यदेश्चार्थे[16] अस्यतिर्वर्तते। अथवा स्यन्देरेवैतदाङ्-पूर्वस्य डप्रत्यये रूपमिति[17]। अन्नं चात्र [18]स्यदिविशेषणार्थमुपादीयते।

## एतदिति

[19]चानेनास्यमेवाभिसंबध्यते कर्तृभूतं कर्मभूतं वा। अन्नमेतत्प्राप्य द्रवीभवतीति, अथवा एतदन्नं द्रवीकरोति।

---

[1] Ms तु नो- [2] Ms-गमोत् तत्वत्र [3] Ms एवं लोकि
[4] Ms-मु- [5] Ms-ला- [6] Ms प्राक्ककाल-
[7] Ms-दिते- [8] Ms केचिन्नो [9] Ms डितृवत् [10] Ms दृढयतः
[11] Ms अस्यत्य [12] Ms-व्यक्तः [13] Ms-निति [14] Ms-मेन-
[15] Ms has वा after इति [16] Ms स्यदेवार्थे
[17] Ms रूप इति [18] Ms स्या- [19] Ms चानेन

## अथ कः प्रयत्नः ?

किं प्रयतनमथ[1] प्रारम्भ इति ।

## प्रपूर्वा(त्) यततेर्भावसाधनो [2]नशब्दः ।

भावसप्तमानि कारकाणीति, भवति भाव(:) साधनः । अथवा कर्त्रादीनि यथा साधयन्ति एवं भावः[3] कारकाणि साधयति । विशिष्टाख्या प्रवृत्तिनिमित्तत्वात् (?) एवमपि कथं भावेन नशब्दः साध्यते ? न साधनशब्दो [4]निर्वर्तकार्थः । किं तर्हि ? अभिधेयवाची । अथवा भावः कैश्चित् साधनत्वेनाभ्युपगम्यते । अभ्यन्तरो भावोऽपि प्रकृतो निरधिष्ठानो न शक्यो व्यपदेष्टुमिति प्रत्ययार्थो भावः सिद्धरूपतया साधनत्वेनोपादीयते । यथा वानस्पत्यमिति स एव समुदायो भेदा(भेदा)भ्यामाश्रितः प्रकृत्यर्थत्वेन प्रत्ययार्थत्वेन च भवति वनस्पतीनां समूह इति । स च भावः क्वचित् केनचित् धर्मेण रूढः संबन्धित्वेन उपादीयते न शब्दवाच्यत्वेन ।

## किमास्योपा(दान इति) ।

नासिकायामपि वर्णा [4]निष्पद्यंते । [5]तद्व्युदासार्थमास्यग्रहणं स्यात् ? उच्यते—आस्य एव ते निष्पद्यन्तेऽनुनासमात्रं[6] नासिकेति एकं दर्शनम् । अन्ये मन्यन्ते—न चेयं नासिका । किं तर्हि ? अन्तरास्येऽस्ति[7] चर्मपुटकमिति [8]पणवचर्मवत् विततमिति । तत्संबद्धा[9] च रेखा नासिका, सा वायुनाभिहन्यमाना श्रुतिविशेषे निमित्तं भवतीति । अकारस्य [10]बाह्यं स्थानं, [11]तच्चोदयिष्यत्येव । विसर्जनीयश्चोरस्य एकेषाम् । न चास्ति तस्य सवर्णत्वे सत्यसति वा प्रयोजनम् ।

## [12]वक्ष्य(त्ये)तत्—(प्र)य(त्न)विशेषणमास्योपादानमिति ।

एतदाचष्टे—नास्यायं परीक्षाकालः, अन्यदेव तावत् विचारयिष्यामः एदुत्तरकालं परीक्षिष्यामह[13] इति ।

## सवर्णसंज्ञायां भिन्नदेशे[14]ष्वतिप्रसंगः ॥वा॥

नहि द्वन्द्वे शक्यत आस्येन प्रयत्नो विशेषयितुमिति भिन्नस्थानानां [15]जबगडदशामन्तर्वर्ती[16] स्पृष्टतादिः प्रयत्नस्तुल्य, एषां स्पृष्टं करणमिति, स्पर्शानामिति, सवर्णसंज्ञा प्राप्नोति । ततश्च परस्परं[17] सावर्ण्ये सति तप्तो[18] ऊर्ज्जः ऊर्ज्ज्यः इति "झरो झरि सवर्णे" (सू. ८. ४. ६५) इति लोपः प्राप्नोति ।

---

[1] Ms मप्य  [2] Edn. नञ्प्रत्ययः  [3] Ms भावो  [4] Ms निवर्त-
[5] Ms-न्नि-  [6] Ms तद्दा-  [7] Ms-मात्र
[8] Ms-स्येति  [9] Ms षण-  [10] Ms-बंधा
[11] Ms वाह्यस्थांनं  [12] Ms तत्रोदयि-  [13] Ms वक्ष्यतदयं
[14] Ms-प्यामह  [15] Ms-ब्वं-  [16] Ms जवग-
[17] Ms-शानां मन्तर्वत्ता:  [18] Ms-स्पर-  [19] Ms तसा

**सिद्धं त्वास्ये तुल्यदेशप्रयत्नं सवर्णम्**[1] ॥वा॥

संज्ञा न भविष्यति।

**एवमपि किमास्योपादाने प्रयोजन(म्)?**

[2]यावतास्यान्तर्वर्तिन एव प्रदेशा इति।

**(प्रयत्नविशेषणमिति)।**

इतरो य आस्यान्तर्वर्ती[3] बाह्यश्च [4]न भवति तद्विशेषणार्थमास्योपादानमिति। वर्ग्यो वर्ग्येण सवर्णसंज्ञ इष्यते। ते च परस्परं भिन्नप्रयत्नाः, तत्र मिथस्तेषां सवर्णसंज्ञा न स्यात्। तस्मादास्यग्रहणेन चत्वार [5]एवास्यान्तर्वर्तिनः सवर्णसंज्ञायाः प्रवृत्तिं निवृत्तिं च प्रत्याश्रीयन्ते, बाह्यास्तु व्युदस्यन्ते। तांश्च[6] बाह्यान् प्रतिनिर्दिशति—

**संवारविवाराविति।**

यथा चैते बाह्यास्तथा शिक्षायां विस्तरेणोपपादितम्।

**[7]एव(मप्यवर्णस्य) सवर्णसंज्ञा न प्राप्नोति। बाह्यं हि आस्यात् [8]स्थानमवर्णस्य।**

काकल(क)स्याधस्तात्[9] उपजत्रु[10] यः प्रदेशः तत्स्थानमवर्णस्य, तच्च बाह्यं आस्यात्। ननु चास्यग्रहणं प्रयत्नविशेषणमित्युक्तं, अवर्णस्य चान्तर्वर्ती[11] प्रयत्नः? एवं मन्यते—यस्य बाह्यं स्थानं प्रयत्नोऽपि तस्य बाह्य इति। अथवा स्थानमप्यस्ति [12]बाह्यमित्यतो देशविशेषणमपि [13]संभवत्यास्यग्रहणमिति न दोषः।

**सर्वमुखस्थानमवर्णमेक इच्छन्ति।**

सर्वमेव मुखं व्याप्रियते अवर्णनिष्पत्तौ तेन (न) बाह्यस्थानता संभवत्यस्यां शिक्षायाम्। भिन्नस्थानत्वात् नास्ति अवर्णहकारयोः सवर्णसंज्ञेत्येवमर्थं "नाज्झलौ" (सू. १. १. १०) इति न पठितव्यम्।

**एवमपि [15]व्यपदेशो न (प्र)कल्पते, आस्ये (ये)षां तुल्यो देश इति।**

[16]सर्वमुखस्थानत्वे सति कोऽन्यो देशस्तस्मिन् य आधेयत्वेन वाधिकरणत्वेन वा व्यपदिश्यते।

---

[1] Ms-यत्ने सवर्ण-
[2] Ms यावताप्यंत-
[3] Ms-र्वत्ती
[4] Ms सं-
[5] Ms एव
[6] Ms न्तोताश्च
[7] Ms एवं
[8] Ms स्थानं सव-
[9] Ms-स्तत्
[10] Ms जतू
[11] Ms र्वत्ता
[12] Ms बाह्यं
[13] Ms संभवमित्या-
[14] Ms-मिच्छ
[15] Ms-देशे-
[16] Ms सर्वे

**व्यपदेशिवद्भावेन व्यपदेशो भवति[1]।**

यच्च वर्णान्तरविषयमास्य यच्चोपनक्रिया (?) यच्चावर्णविषयं सर्वं तदाश्रित्य तस्मिन्निदं तुल्यमवर्णविषयमा[2]स्यमिति समुदायावयवकल्पनया भेदः क्रियते। अथवा शब्द एव भागोपनिपाती[3] कश्चित्सामान्यरूपेण ब्रवीति तदास्यं कश्चित् विशेषरूपेणेत्येवं वा भेदो भविष्यति।

**नहि [4]लौकिकमास्यम्।**

ननु च तद्धितान्तमपि लौकिकमेव? एतदाचष्टे—यत्प्रत्ययान्तमास्यं यस्य श्रुत्या समधिगमः क्रियते तन्नाश्रीयत इति।

**[5]स्थानं करणं च।**

स्थानं तालवादि। करणं केषांचित् स्पृष्टतादि, केषांचित् जिह्वाया अग्रोपा[6]ग्रमध्यमूलानि। यद्येवं किमर्थं प्रयत्नग्रहणं, एतावदस्तु "तुल्यास्यं सवर्णम्" इति, एतावदेवास्ये भवं[7] स्थानं प्रयत्नश्चेति। प्रत्येकं व्यापारव्युदासार्थमुभयोरुपादानं, यथैव स्थानं स्थानान्तरनिरपेक्षं स्यात्, एवं च सति स एव दोषो जबगडदशा[8] तुल्यप्रयत्नानां [9]स्थानभिन्नानां सवर्णसंज्ञा प्राप्नोति।

**एवमपि प्रयत्नः [10]अविशेषितो भवति।**

आस्येनेत्यर्थः। तथा च बाह्यप्रयत्ना न ह्यापिता भवन्ति।

**प्रयत्नश्च विशेषितः।**

**प्रारम्भो यत्नस्य प्रयत्नः।**

एतत् भाष्यकारस्य दर्शने। स्पृष्टतादयः पूर्वमुत्तरकालं मूर्ध्नि प्रतिह[11]तस्य वायोर्विवारादय इति।

**प्रश्लिष्टावर्णावेतौ[12]।**

यथैव चोदकुंभे क्षीरदधि दुः संश्लिष्टो (?) न ज्ञायते एवमेवावर्णम्। अन्ये वर्णयन्ति—प्रश्लिष्टावर्णावित्येतदुक्तं भवति, संवृतावर्णाविति।

**अवर्णस्य तर्हि ऐचोश्चेति।**

अयमभिप्रायः—विश्लिष्टावर्णावेताविति, तत्र नाव्यं [13]नौभूतं नौयतीति लोप [14]इत्वं च स्याताम्।

---

[1] Edn भविष्यति  [2] Ms-यंमा-  [3] Ms-परिपाती
[4] Ms लो-  [5] Ms स्थानकर-  [6] Ms-ग्रं-
[7] Ms भव-  [8] Ms दशानां  [9] Ms स्थानाभि-
[10] Ms प्रवि-  [11] Ms-तस्यं  [12] Ms-तो
[13] Ms नो भूतं नैय-  [14] Ms इत्वं

**एतयोरेव तर्हि मिथः ।**

एकारौकारयोः । किं पुनः स्यात् ? "एत ऐ" (सू. ३. ४. ९३) इत्यत्रौ[1]कारोऽपि प्राप्नोति, यदि तन्नास्ति[2], "भाव्यमानेन सवर्णानां ग्रहणं न" इति ।

**अभेदका [3]उदात्तादय इति ।**

प्रतिपादितं लिंगात्, न शास्त्र एते भेदेन व्याप्रियन्त इति ।

**यत्समानं तदाश्रयिष्यामः ।**

प्रथमद्वितीययोः तृतीयचतुर्थयोश्च यद्यपि प्रयत्नभेदस्तथापि (स्पृष्टताद)-यस्तेषां समानो यत्नः तदाश्रिता सवर्णसंज्ञा प्रवर्तिष्यते ।

**किं सति भेदे ।**

अयमभिप्रायः—यदि विवारादीनां भेदे [4]स्पृष्टतादिसाम्ये प्रवर्तते, एवं (स्पृ)ष्टतादिभेदे[5] विवारादीनां साम्येऽपि प्राप्नोति ।

**यदि हि यत्र सर्वं[6] समानमिति ।**

एतावत्[7]ब्रूयात् "अकः अकि दीर्घ" इति, "झरो झरि" इति । क्रियमा-णेऽपि सवर्णग्रहणे सर्वं समानं न भवतीति नैव लोपः स्यात् [8]शिष्ठि पिण्ठि इत्यतः (आह)—

**सति [9]भेदे सवर्णसंज्ञया भवितव्यमिति ।**

**[10]शकारछकारयोः [11]षकार[12]ठकारयोः सकार[13]थकारयोश्च[14] ।**

सर्वं[15] समानमघोषत्वं महा(प्रा)णत्वं च । करणं तु भिन्नम्, एके स्पृष्टकरणाः[16] अपरे[17] विवृतकरणाः । सत्यां च सवर्णसंज्ञायां नि(श्छद्म) निष्ठुरं[18] नि(स्)स्थानमिति "झरो झरि सवर्णे" (सू. ८. ४. ६५) इति लोपः प्राप्नोति ।

**किं[19] तर्हि ? त्रिपदोऽयं बहुव्रीहिः तुल्य आस्ये प्रयत्न एषामिति ।**

अभिधानाच्च असमानाधिकरणानामपि बहुव्रीहिः अभ्युपगतः । ननु चैवमास्यं तुल्यत्वेनाविशेषितं भवति वि(भिन्न)विभक्तित्वात् अप्रधानत्वाच्च ?

---

[1] Ms त्रो-
[2] Ms तन्नाम्रि
[3] Ms नुदा-
[4] Ms स्पृशता-
[5] Ms वृतादि-
[6] Ms सर्वे
[7] Ms-वत
[8] Ms शिणि पिण्ठि
[9] Edn सत्येव हि भेदे
[10] Ms ञका-
[11] Ms पका-
[12] Ms- वका-
[13] Ms षका-
[14] Edn omits च
[15] Ms सर्वे
[16] Ms स्पृष्टं करण
[17] Ms अपरो
[18] Ms निष्टुर
[19] Ms एवं तर्हि

नैष दोषः। यदाधेयं[1] प्रति यदधिकरणमुपादीयते तदाधेयं तुल्यं (चेत्) तथैव (तदधिकरणमपि) तुल्यमिति विज्ञायते। यथा देवदत्तयज्ञदत्तयोर्मथुरायां तुल्यं भोजनमित्युक्ते गम्यत एतत् मथुरापि तयोस्तुल्येति एवमिहापि [2]ययोर्वर्णयोरास्ये तुल्यः प्रयत्नो भवति आस्यमपि[3] तयोस्तुल्यमिति। आस्यशब्दस्य तद्धिता(न्तस्या)श्रयणसामर्थ्यात् वा[4]।

## अथवा पूर्वस्तत्पुरुषस्ततो बहुव्रीहि(ः)।

केन लक्षणेन तत्पुरुषः? यदि [5]निपातनात् समासः स्यात् न तुल्य तत्पुरुषः (?) तस्मात् "सप्तमी" (सू. २. १. ४०) इति योगविभागात् तत्पुरुषः। निपातनादपूर्वनिपातः। अथवार्थप्रदर्शनमेतत्—

## तुल्य[6] आस्य इति।

[7]साहचर्यादास्ये भवः प्रतिलब्धास्यव्यपदेशः प्रथमान्त एव समस्यते, तुल्य आस्य इति, "कृत्यतुल्याख्या अजात्या" (सू. २. १. ६८) इति।

## तस्य ॥वा॥

## तस्येति (तु) वक्तव्यम्।

अर्थप्रदर्शनमेतत्, न तु पाठः। पाठस्तु तथाभूतः कर्तव्यो यथायमर्थो लभ्यत इति। तत्र [8]विस्पष्टमेव वक्तव्यम्, [9]तुल्यास्यप्रयत्नं यद्यस्य तत्तस्य सवर्णमिति। [10]अथवैतद्वक्तव्यं, तुल्यास्यप्रयत्नं तत् तस्य सवर्णमिति, सामर्थ्यात् गम्यते यस्य[11] (य)दिति। इतरथा हि तुल्यास्यप्रयत्नत्वात् सवर्णमित्यस्मिन् नामधेये लब्धे[12] प्रदेशेषु "अकः सवर्णे दीर्घ" (सू. ६. १. १०१) इतीदं नास्ति। यो यस्य तुल्यास्यप्रयत्नस्स[13] तस्मिन्निति सवर्णमात्रे दीर्घः प्रवर्तते। सूत्रारम्भः किमर्थ इति चेत्, रेफोष्मणां निवृत्त्यर्थः। "रेफोष्मणां सवर्णा न सन्ति" (भा. ह्यवरट्) इति नास्त्येषां तुल्यप्रयत्नता। तत्र [14]रेफोष्मसु [15]च सवर्णसंज्ञाकार्यम् मा भूदिति।

## तस्यावचनमिति ॥ वा ॥

असमासोऽयम्। यः शब्दो भवतोच्चारितस्तस्यावचनमिति। अथवानुकरणशब्दः तस्येत्येतस्यावचनमिति। कुतः?

## वचनप्रामाण्यात् ॥ वा ॥

ननु चोक्तं, रेफोष्मणां निवृत्त्यर्थमिति। तच्चास(त्)। तेऽपि[16] हि

---

[1] Ms यदायेयं  [2] Ms यया-  [3] Ms आस्यमिति
[4] M-त वा  [5] Ms निपांत-  [6] Ms तुल्यं
[7] Ms सह-  [8] Ms विरुप-  [9] Ms यत्तुल्या-
[10] Ms अथे-  [11] Ms यस्थे-  [12] Ms लब्धे
[13] Ms-त्नस्य  [14] Ms रेफोऊष्म-  [15] Ms व-  [16] Ms-सतेपि

परस्परेण तुल्यास्यप्रयत्नाः रेफो रेफान्तरेण, ऊष्मा च ऊष्मान्तरेण। अथवा यद्येतावत्प्रयोजनं[1] स्यात् सवर्णप्रदेशेष्वेव रेफोष्मणां निवृत्तिं कुर्यात्।

**संबन्धिशब्दैर्वा तुल्यम् ॥ वा ॥**

[2]**मातरि वर्तितव्यं पितरि शुश्रू(षि)तव्यमिति।**

मातृशब्दः पितृशब्दश्च लोके न वन्ध्यानिवृत्त्यर्थं नपुंसकनिवृत्त्यर्थं वा प्रयुज्यते। किं तर्हि? अयमेवास्य स्वभावो[3] यदपेक्षितस्वप्रजनन एव प्रवर्तते।

**या यस्य माता यो[4] यस्य पितेति।**

एवं तुल्यशब्दो लोक एवंभूत एव। तुल्याय कन्या दातव्येति "न चण्डालेन तुल्याय ब्राह्मणः कन्यां ददाति। किं तर्हि? आत्मना[6]। सवर्णे दीर्घो भवतीति, तुल्यास्यप्रयत्ने अचि अको दीर्घो भवतीत्येतदुक्तं भवति। एवं च सति तुल्यशब्दस्यैव स्वभावत्वात् अन्तरेण तस्येति वचनमयमेवार्थो लभ्यत इति।

**ऋकारलृकारयोः सवर्णविधिः ॥ वा ॥**

सवर्णाश्रयस्य[7] कार्यस्य विधिः। अथवा संज्ञा विधेया। तत्र संज्ञाविधिर्लघी[8]यानिति। तस्मात्संज्ञा [9]विधेयेत्याह। अथात्र कथमसंबन्धिशब्दत्व एतयोः सवर्णसंज्ञेत्येतत्[10] गम्यते, न [11]पुनरेतयोरन्यैः सहेति; तत्र मिथ इति वा वक्तव्यम्। अथवा नायं पाठः कर्तव्यो "ऋकारलृकारयोः सवर्णविधिः" इति। किं तर्हि? प्रदर्शनमिति। स तु पाठः कर्तव्यः, यथैव तयोरेव मिथः सवर्णसंज्ञा भवति।

**होतृ [12]लृकारः होतृकार इति।**

**[13]सवर्णदीर्घत्वं यथा स्यात्।**

होतुः [14]लृकारः शोभन इति संबन्धषष्ठी, [15]ततश्च समासोऽयमिति।

**नैतदस्ति प्रयोजनमिति। वक्ष्यत्येतत्सवर्णदीर्घत्वे[16] इति।**

एवं मन्यते—दीर्घ इति तत्र वर्तते न ऋ इति। लृ इति च विभाषिते [17]लृशब्दे दीर्घत्वं भविष्यति। [18]लृति लृवर्णस्य दीर्घो नास्ति[19], उभयानुग्राही च[20] दीर्घो नास्तीति ऋकार[21] एव संभविष्यतीति।

---

[1] Ms-जन
[2] Ms भातरि
[3] Ms स्वभांवो
[4] Edn यश्च
[5] Ms भ वंडा-
[6] Ms-नात्
[7] Ms-र्णा अयस्य
[8] Ms-ध्वी-
[9] Ms-भिधे-
[10] Ms संज्ञत्येतत
[11] Ms पुनरत-
[12] Ms ऋका-
[13] Edn omits सवर्ण-
[14] Ms ऋका-
[15] Ms तत्रश्च
[16] Ms-त्वं
[17] Ms ऋ-
[18] Ms ऋति ऋव-
[19] Ms दीर्घा न सन्ति
[20] Ms व
[21] Ms दकार

तत्सवर्णे यथा स्यात् ।

यदि सवर्णसंज्ञा(म)विधाय तदुच्यते अकः ऋ इति भवतीति, [1]अङ्मात्रस्य स्यात्,

दध्ल्लृकार(:) मध्ल्लृकार इति ।

तस्माद्विधातव्या सवर्णसंज्ञा ।

यदे(त)त् [2]ऋतीति एतदत[3] इति वक्ष्यामि ।

ऋतः सवर्णे ऋ वा भवतीति ऋत्येव भवितव्यम् ।

ततः लृतीति ।

इदमसवर्णार्थमारभ्यते । ते(न) [4]ऋकारे त्रीणि रूपाणि, एकम्-संहिताविषयं, द्वे[5] संहिताविषये । एवं [6]लृकारेऽपि ।

तन्न वक्तव्यं भवति ।

एवं मन्यते—द्वावप्येतौ दीर्घौ[7], ऋकार लृकारश्च, तौ भविष्यतः, ऋकारे च सवर्णः[8] लृकारे च सवर्णसंज्ञायां सत्यां ऋकारश्च लृकारश्चेति ।

अवश्यं तद्वक्तव्यम्[9] । ऊकालोऽज्ह्रस्वदीर्घप्लुतः (इति)

न चायमजिति ।

कथमनच्त्वम् ? केचिन्मन्यन्ते—द्वो रेफावप्येव चाङ् मात्र इति (?) ते ईषत्स्पृष्टकरणत्वात्प्रयत्नभेदं मन्यन्ते । अपरे वर्णयन्ति—द्वौ रेफौ तुरीयावध्यवत्वाङ्मात्रो (?) केचित् मन्यते—सकलश्च रेफः[10]लकारश्चाज्भक्तिश्चार्धं[11]मात्रेति । किन्तु संवृततरोऽय[12]मृकारश्च विवृतः प्रयत्नभेदात्[13] नास्त्यस्य ऋकारे(ण) ग्रहणमिति । एवं तर्हि

अच्त्वं वक्ष्यामि ।

[14]सत्यच्त्वे दीर्घसंज्ञा लभ्यते[15]। यस्य तु पक्षोऽर्धतृतीयमात्रोऽयमिति तस्याच्त्वे सति दीर्घसंज्ञाया अभावः,[16] [17]भिन्नकालत्वात् । तस्मा(त्) द्विमात्र एवायमभ्युपगन्तव्यः ।

[18]तच्चावश्यं वक्तव्यम् ।

त्वयापि ऋवावचनं ब्रुवता । कथं वचनादिदं तावत्स्यात् ? अस्य

---

[1] Ms वड्-  [2] Ms भवतीति  [3] Ms एतं ऋत
[4] Ms लृ-  [5] Ms षयत्येद्वे  [6] Ms लका-
[7] Ms-ष्योतो दीर्घ  [8] Ms-र्णो  [9] Ms-व्या
[10] Ms ऋका-  [11] Ms-र्द्ध-  [12] Ms-रोम-
[13] Ms-भेदातादना-  [14] Ms सस्य-  [15] Ms ल इष्यते
[16] Ms अतावा:  [17] Ms भिन्ने-  [18] Ms तस्यावश्यं

तु प्लुतो शक्यः कर्तुम्। अनयो(:) हि प्लुत[1] उच्यते। यश्चासौ क्रियतेऽसावप्यन(च्)त्वात् प्लुतो न भवतीति न स्थानी[2] नाप्यादेश इति स्थितमेतत्। यश्च सवर्णसंज्ञामारभते यश्च सवर्णदीर्घत्वे[3] लृवावचनं करोति उभाभ्याम(प्यच्)त्वं वक्तव्यमिति।

## किं पुनरत्र ज्यायः ?

किं सवर्णसंज्ञाविधानम्, उत लृवावचनमिति ? अत्र चोद्यते—यदि लक्षणयोर्लक्ष्ये समानो व्यापार(:) तत एतदुपपद्यते—

## किं पुनरत्र ज्याय इति।

अयं इह[4] तु भिन्न एव व्यापारः। कथम् ? यदि सवर्णसंज्ञा विधीयते न तदुच्यते ऋति ऋवावचनमिति, होतृ ऋकार इति स्थिते[5] द्वयो(:) दीर्घयोरुपस्थितो[6]र्यदि तावत् द्वावपि ऋकारौ स्थानिनौ[7] द्वाभ्यां रेफाभ्यां तद्वन्ताविति द्वयो रेफैर्द्विणाशेन भवितव्यमिति, सर्वकालं द्विरेफको दीर्घः प्राप्नोति। अथायं पक्षः संवृततरमपि, एवमपि विवृतयोः ऋकारयोः स्थाने कथं संवृततरो भविष्यति ? तेन सर्वकालं विवृतेन भवितव्यम्। तथा लृकारे परभूते रलवान् नास्ति दीर्घ इति यथा येषा (?) [8]कदाचि(त्) दीर्घः स्यात् कदाचित् लृ इति दोषः। अथ मन्यसे रूपत्रयं साध्यं, तच्चैवं[9] सिद्ध्यतीति। तच्च न। भिन्नविषयौ लृकारऋकारौ[10] परिगृह्य त्रैशब्द्यं[11] सिध्येत् न त्वन्यत्। तस्मात् यस्तु लृ विधत्ते तस्य कथमसौ लृ वा वि(द)धत् पक्षे दीर्घत्वं विदधाति ? एवं[12] ऋ इत्यपि ? ननु च तस्यापि सवर्णसंज्ञां विदधतः लृ लृतीति लृकारः [13]सन्निहितः ऋतीति ऋकार, तत्रैकैकस्मिन् त्रैरूप्यं[14] प्राप्नोति। स्यादेतत्। प्रविभागोपादानमनर्थकं, ऋति लृति चेत्यन्यतरस्मिन् प्रविभागोपादानसामर्थ्यात् त्रैरूप्यं मा भूदिति अन्यतरस्मि(न्) तत्प्राप्नोत्येव।

## लृकारस्य लपरत्वं वक्ष्यामि[15]।

व्याख्यास्यामीत्यर्थः। कथम् ? प्रत्याहारे रट् लणिति लकारे योऽकारः असावनुनासिकः प्रतिज्ञास्यते। अत(:) स्वेनान्येनेतरदिति (?) रेफ आदिस्तन्मध्य(स्थ)स्या(पि) संज्ञा[16] भविष्यति इति "उरण् रपर" (सू. १. १. ५१) इति रेफः [17]तन्मध्य(स्थं) लकारं प्रत्याययति। एवमप्युभयोः रलौ[18] कस्मान्न भवतः ? आन्तरतम्यात्। यथा [19]जश्भाविनां जशः[20] चर्भाविनां चरः एवं[21]

---

[1] Ms प्लुतु [2] Ms स्थानि [3] Ms र्णग्रंदीर्घत्वे [4] Ms इह
[5] Ms स्थित [6] Ms-रुप्रस्तितयो [7] Ms स्थानेनौ
[8] Ms कदापि [9] Ms तथैवं [10] Ms-रो
[11] Ms-व्द्य [12] Ms एव [13] Ms स्थान्नि-
[14] Ms तत्रेकैकस्मि शस्त्रे रूप्यं [15] Ms वक्षयामि [16] Ms संता
[17] Ms तन्मध्यं [18] Ms रलो [19] Ms जस्। भा-
[20] Ms जसः [21] Ms यव-

रेफवतो रेफवानादेशः[1] लकारवतो लकारवांश्च[2] इति।

## (प्रक्लृप्यमानमिति)।

यथैव [3]क्लृप्य(मा)नमिति णत्वं भवति एवं "प्रक्लृप्यमानं[4] पश्य" इति, "कृत्यच" (सू. ८. ४. २९) इति णत्वं प्राप्नोति।

## त्रिभिश्च मध्यमैरिति।

कोऽत्र विशेषः? पूर्वत्र [5]शर्व्यवाय इति सामर्थ्यात् षकारोऽनुमीयते तस्य [6]णत्वनिमित्तत्वात्। इह

## [7]लशसैश्चेति।

व्यवधान[8]करावेव [9]शसावुपादीयेते[10]। ननु लकारव्यवाय इत्यप्युच्यमाने न प्राप्नोति, प्रक्लृप्यमानमिति[11] लकारोऽयं[12] न भवतीति, तत आह—

## [13]वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्त इति।

समुदायव्यापारे अवयवोऽपि व्याप्रियते न तस्य व्यापार उच्छिद्यत इति।

## यद्येवं[14] नार्थो (रषाभ्यां) णत्वे ऋकारग्रहणेन[15]।

रेफादेव णत्वं भविष्यति। एवं च[16] सति नास्ति ऋकारग्रहणमित्यगृह्यमाणं कथं [17]लृकारं ग्रहीष्यति इति स्थिता सवर्णसंज्ञा। एवं सत्यक्षरस(मा)[18]म्नायेऽनर्थकं लृकारोपदेश इति। ऋदिति तर्हि यदुच्यते तत् [19]लृदित्यत्रापि प्राप्नोति[20]। न भविष्यति, अङर्थं तु लृदित्वं स्यात्। तस्मात् लृकारः प्रत्याहारे पठितव्यः। पठ्यमाने तस्मिन् पृथगनुबन्ध[21]करणसामर्थ्याद् भवति परिहारः।

## नाञ्झलौ।१।१।१०

[22]इकारशकारयो(:) अवर्णहकारयोश्च स्थानकरणे[23] तुल्ये इति प्रतिषेध आरभ्यते सवर्णसंज्ञायाः। अञ्झलौ[24] मिथः सवर्णसंज्ञौ भवत इति [25]एवमवस्थिते इदमुच्यते—

---

[1] Ms वाभादेशः  [2] Ms लकात् वा व  [3] Ms लप्यणमिति  [4] Ms माणं
[5] Ms षर्व्य-  [6] Ms णत्वं-  [7] Ms लसषैश्चेति
[8] Ms-धरन-  [9] Ms सशा-  [10] Ms-यते
[11] Ms-माणमिति  [12] Ms-रायं  [13] Ms वार्णोकेदे-
[14] Ms यद्येयं  [15] Ms हाणेन  [16] Ms य
[17] Ms लकारं ग्रहा-  [18] Ms-सन्नाये  [19] Ms ऋदि-
[20] Ms-ति पृथग.....नाञ्झलौ ईकार न भवि-  [21] -कारण-
[22] Ms ई-  [23] Ms स्थानं कारणे  [24] Ms अजरुलौ  [25] Ms यव-

**अज्झलोः (प्रतिषेधे शकार)प्रतिषेधोऽज्झल्त्वात्[1] ॥वा॥**

च्चातव्यो प्रतिषेद्धुमिति (?) प्राकरणिको धर्मः प्रतिषेध्य[2]त्वेन विज्ञायते । कश्चासौ धर्मः ? सवर्णसंज्ञा[3]। अथवा प्रतिषेधे(न)[4] निवृत्तिः [5]व्यपदिश्यते । अज्झलोः [6]सवर्णसंज्ञानिवृत्तौ [7]शकारप्रतिषेध इति च[8] द्वेधा वर्ण्यते । [9]शकारस्य प्रतिषेधः प्राप्नोति, तदर्थो [10]यत्नः कर्तव्य इति ।अथवा योऽयमच् ऊकालः अत्र [11]शकारप्रतिषेध(:)[12] । (यद्य)प्येकवचनान्तस्य समासस्तथापि सामर्थ्यात्सविशेषः प्रतीयते, भेदाधिष्ठानत्वात्सवर्णसंज्ञायाः ।

**अच्चैव हि [13]शकारो हल् च[14] ।**

पाठात् निर्ज्ञातमेवास्य हल्त्वं, [15]अच्त्वमेवास्य दुरुपपादमिति अच्त्वमेव पृच्छति—

**कथं [16]तावदच्त्वमिति ।**

इतरोऽच्त्वमुपपादयति—

**इकारः [17]सवर्णग्रहणेन [18]शकारमपि गृह्णाति ।**

सवर्णगृहीत्य सवर्णग्रहणेन यथाऽऽणा (?) तत्र यथैव इकारोऽच्कार्याणि[19] प्रतिपद्यते,[20] एवं शकारोऽपीति । एवं तावदच्त्वम् । कथं पुनरिकारः [21]शकारं गृह्णाति; यावता नाज्झलाविति यमस्ति प्रतिषेधः । उच्यते—अस्मिन् प्रतिषेधसूत्रे योऽयमवयवोऽजिति स किं गृहीतसवर्ण(का)नां[22] अथ नेति विचारयामः । [23]तत्रेदं युक्तं, गृहीतसवर्णकानामिति; यथा "अकः सवर्णे दीर्घ" (सू. ६. १. १०१) इत्यस्मिन् ग्रहणे । इह तु नास्ति ग्रहणं "अणुदित्सवर्णस्य चाप्रत्यय" (सू. १. १. ६९) इति । किं कारणम् ? अस्मिन् ग्रहणे अपरिनिष्पन्नत्वात्संज्ञासंज्ञिसंबन्धस्य; [24]ग्रहणाण्ग्रहणे ग्रहणाभावः, ग्रहणक[25]शास्त्रस्यानभि[26]निर्वृत्तत्वात् ग्रहणान्तरस्य चाभावात् स्वात्मनि च क्रियाविरोधात् । तत्र [27]ह्याण्ग्रहणे ग्रहण(क)शास्त्रमनभिनिर्वृत्तं[28] क्रियमाणत्वात्संज्ञासंज्ञिसंबन्धस्य

---

[1] Ms धोनच्त्वात् अज्झला वच्त्वात्
[2] Ms-षेध-
[3] Ms -सिज्ञा
[4] Ms प्रतिषोध-
[5] Ms व्यपे-
[6] Ms सिज्ञातोनि
[7] Ms सकार
[8] Ms य-
[9] Ms सका-
[10] Ms पत्तः
[11] Ms स-
[12] Ms षद्य-
[13] Ms स-
[14] Ms हल्त्वा-
[15] Ms अच्च-
[16] Ms ताचावत्अल्त्व-
[17] Ms सवर्णे-
[18] Ms स-
[19] Ms-कापाणि
[20] Ms-द्याती
[21] Ms स-
[22] Ms-मा
[23] Ms तत्रैदं
[24] Ms ग्रहणात्
[25] Ms-के-
[26] Ms निवृत्त
[27] Ms ह्याण ग्रहग्रहणे
[28] Ms निवृत्तं

ग्रहणान्तरं च[1] नास्ति। स्वात्मनि च क्रिया विरुध्यते[2]। यथा घटो [3]नात्मानं शक्नोति[4] स्प्रष्टुम्। एवं च [5]कृत्वा "हलन्त्यम्" (सू. १. ३. ३) इ(त्य)त्रोक्तं[6]—[7]लकारस्यानुबन्धाञ्ञापि[8] तत्वात्हल्ग्रहणा[9]प्रसिद्धिः (वा १. ३. ३.) इति। अस्मिन् हि हल् इति व्यपदेशे स्वात्मनि क्रिया विरुद्धयत इति न शक्नोति लकारस्येत्संज्ञा[10] प्रतिपादयितुम्। तस्मात्पृथक् लकारस्ये[11]त्संज्ञा वक्तव्येति। तत्र चोक्तं—"सिद्धं तु लकारनिर्देशात्" (वा. १. ३. ३.), "एकशेषनिर्देशाद्वा" (वा. १. ३. ३) इति। यथैव चाण्ग्रहणे ग्रहणं नास्ति एवं प्रतिषेध[12]ग्रहणे प्रतिषेधा[13]भावः प्रतिषेधशास्त्रस्यानभिनिर्वृत्तत्वात्[14] प्रतिषेधशास्त्रस्यैवाभावात्[15]। स्वात्मनि च क्रियाविरोधात्[16]। नाञ्झलाविति प्रतिषेधोऽनभिनिर्वृत्त(:) स[17] एवास्मिन्नजिति प्रत्याहारे, शास्त्रान्तरं च नास्ति प्रतिषेधकं, स्वात्मनि[18] च क्रिया विरुध्यते [19]घटस्पर्शवत्। तत्र यथैव मा शब्दं कार्षीरिति [20]नानेनास्यैव शब्दस्य प्रतिषेधः शक्यः कर्तुम्। किं तर्हि? शब्दान्तराणाम्। एवमिह प्रतिषेधसूत्रेऽशक्यः प्रतिषेधः कर्तुमिति। यथैव च इकारशकारयोः सवर्णसंज्ञा प्रतिषिध्यते एवं शकारयोरपीति। यथैव कुमारी शेत इति नास्ति सवर्णसंज्ञा (ई)कारस्य शकारे परत इति। ननु च "प्रकल्प्य चापवादमुत्सर्गः प्रवर्तत" इति स(व)र्णसंज्ञा[21] प्रतिषेधविषयं उत्सृज्याभिनिविष्टेति कुतो ग्रहणम्? सत्यमेवमेतत्। यद्यत्रापवादः स्यात्, स च नास्तीत्युक्तं, अनिष्पन्नत्वात्प्रतिषेधस्येति। न चेदत्रापवादविषयः अस्तीति प्रवर्तितव्यं सवर्णसंज्ञया त(त्)पूर्वकेण च तद्ग्रहणेनेति[22]। इह प्रत्याहारे शकारस्याच्त्वेन ग्रहणादन्यत्र नास्ति सवर्णत्वेन ग्रहणमितीदमाह—

## तत्र सवर्णलोपे [23]दोषः ॥वा॥ इति

विषयवन्तं दोषमाचष्टे सवर्णलोपविषये सवर्णलोपाप्राप्तिर्दोषः।

## [24]परश्चतानि कार्याणीति।

शतादतिक्रान्तानि शतादधिकानि कर्तव्यानीति। "पञ्चमी" (सू. २. १. ३७) इति योगविभागात्समासः "साधनं कृता" (वा. २. १. ३३) इति वा। राजदन्तादित्वात्पर[25]निपातः। परशब्देन[26] समासः, अथवा[27] परः शब्दः पार-

---

[1] Ms-न्तरेव [2] Ms निरूप्यते [3] Ms नांत्मान
[4] Ms शक्तोति [5] Ms सत्वा [6] Ms-त्रौक्तं
[7] Ms वका- [8] Ms-बन्धत्वात् रापि [9] Ms-ण-
[10] Ms-स्यत्संज्ञा [11] Ms-स्यै- [12] Ms-धा-
[13] Ms-धैधा- [14] Ms-नतिनिवृत्वात् [15] Ms-स्यां व रा भावात्
[16] Ms-धरत् [17] Ms-निवृत्तर्त्य [18] Ms-कस्त्वात्मनि-
[19] Ms द्यत्तस्प- [20] Ms नादेना- [21] Ms-र्संज्ञा
[22] Ms-णेनान [23] Ms दोषमाह इति [24] Ms परःश-
[25] Ms-स्वात्सत्पर- [26] Ms यरशब्दन [27] Ms समासार्थो वा

स्करादित्वाद्वा सुट् द्रष्टव्यः। तत्र सकारस्य श्चुत्वे कृते द्विर्वचने सावर्ण्यस्य प्रतिषिद्धत्वात् [1]त्रिशकारः स्यादिति दोषः। अत्र चोदयन्ति[2] शकारश्चेद[3]जिति इकारेण गृहीतः, स यथैवाच्कार्यं प्रतिषेधं लभते एवमिदमपि कस्मात् (न) प्रतिपद्यते "शरोऽचि" (सू. ८. ४. ४९) न द्वे भवत इति, "अनचि च" (सू. ८. ४. ४७) द्वे भवत इति[4]। न चायतेन(?) द्विर्वचनमपि न भविष्यति। त एवं परिहारमाहुः—"अनचि च" इति पर्युदासोऽयं अचोऽन्यस्मिन्निति। भवति चायमचोऽन्य इति। [5]एतदसत्। नह्येतत्संज्ञासु प्रतिपादयितुं शक्यम्। इह हकारो हल्त्वात्[6] चतत् (?) यद्येवमुच्येत,–[7]अचोऽन्यस्मिन् भवितव्यमिति हकारो वर्ज्येत इति निःसंशयं न वर्ज्येतोकारश्चोदनायामपि (?) [8]यस्मिन्नर्थे [9]प्रतिपद्यन्ते। [10]अप्रासादवासिन आनीयन्तामिति, किमु (भूमि)-वासिनो[11] भूमिवासित्वात् भवितव्यमानयनेनाहो[12]स्वित्प्रासादवासिनोऽन्य इति व्यपदेष्टव्येति न भ(वि)तव्यमानयनेनेति[13]। एवं शबलः छागः [14]किम् "कृष्णमालभेत शुक्लमालभेतेति" आलब्धव्यो [15]नालब्धव्य इति नालब्धव्यः(?)। एवं तु [16]त्रिशकारत्वमिह न्यायप्राप्तमेव। कथम्? उक्तं हि "प्रतिषेधसूत्रे प्रतिषेधो नास्ति [17]अनभिनिर्वृत्तत्वात्प्रतिषेधस्य, अन्यत्र तु प्रत्याहारेऽस्त्येव प्रतिषेध" इति। कुतोऽस्य द्विर्वचनविधावच्त्वम्? तस्मादस्य स [18]यत्न(:) कर्तव्यः येन इकार इह प्रत्याहारे शकारं न गृह्णाति। ग्रहणे हि सति व्यक्तमन्यत्र ग्रहणमस्ति [19]शकारस्य। एतच्च प्रसज्यप्रतिषेधो[20], न (पर्युदासोऽ)यमिति कृत्वोपन्यस्तम्। एवं च कृत्वा वाक्यं पठितम्—

**अज्झलो(:) प्रतिषेध इति।**

प्रसज्यप्रतिषेधं प्रतिषेध इत्याह। यदि हि पर्युदासः स्यात् "तुल्यास्यप्रयत्नं [21]सवर्णमज्झलौ" इति नैव किंचित् लक्षणं विधायकमज्झलोरस्ति नापि प्रतिषेधकमिति अज्झलौ मिथो मुक्त्वा अचां[22] हलां च [23]मिथः सवर्णसंज्ञेति दोषाभावः।

**सिद्धमनच्त्वात् ॥ वा ॥**

आस्यान्तर्वर्तिनः प्रयत्नस्य भेदात्सावर्ण्यं[24] नास्ति। असति (त)स्मिन् किं प्रतिषेधेनेति[25] सूत्रं[26] प्रत्याख्या(य)ते। न परिहार उक्तः। यथा तु पाणि-

---

[1] Ms त्रिस [2] Ms अचोदर्यति [3] Ms-रश्चैतद-
[4] Ms इती [5] Ms यत- [6] Ms हलाच्चात्
[7] Ms अटोन्य- [8] Ms-या- [9] Ms षति-
[10] Ms अप्र- [11] Ms-भो [12] Ms-नें ताहो
[13] Ms-यतेनेति [14] Ms किमकृ- [15] Ms माल-
[16] Ms त्रिसका [17] Ms अनचि निवृत्त [18] Ms यत्र
[19] Ms स- [20] Ms-षोध- [21] Ms सवणमे- [22] Ms अचा
[23] Ms सिथः [24] Ms-र्ण्यं [25] Ms-षैधनेति [26] Ms सत्र

निना[1] पठितमुभयत्र वा[2] ईषदित्यनुवर्तते, उभयत्र[3] वा निवृत्तमिति, तथा परिहारमाह—

## वाक्यापरिसमाप्तेर्वा ॥ वा ॥

नास्ति ग्रहणमिति इदं वाक्यम्, अप[4]रिसमाप्तार्थत्वात्; "अणुदित्सवर्णस्य[5] च" (सू. १. १. ६९) इत्यपरिसमाप्तमित्युच्यते। कथम् पुनरस्यापरिसमाप्तत्वम्? अंगयोरनिर्ज्ञानाद्ग्राह्यस्य[6] इमे अङ्गे—अणिति च, सवर्णस्येति च। ते यदानिर्ज्ञाते[7] भवतः अयमस्य[8] सवर्ण इति, तदा[9] ग्रहणम्। तत्रोपदेशः इत्संज्ञा प्रत्याहार इत्येतेष्वस्य ग्रहणं प्रति नास्ति व्यापारः। यत्रैव तावत् अणिति[10] रूपमुच्चारितं अचः "अणुदित्सवर्णस्ये"ति तत्रैव तावत् ग्रहणम्। किमङ्गं पुनः यत्रैदुपायानि(?) रूपाणीति। उपदेशकाले सवर्णा हेतेति(?)।

## प्र(त्)याहारोत्तरकाला च[11] सवर्णसंज्ञेति।

[12]न पाठक्रमोऽभिप्रेतः। किं तर्हि? प्रवृत्तिक्रमः[13]। "अणुदित्सवर्णस्य च" (इ)त्यस्मिन्यः क्रमोऽणिति च सवर्णस्येति च, तत्र यथैवोपदेशादिष्व[14]निवृत्तं रूपमिति नास्ति ग्रहणं, एवं सवर्णोऽप्यनिर्ज्ञाते[15] न ग्रहणेन प्रवर्तितव्यम्। यदा सोत्सर्गा सापवादा सवर्णसंज्ञा निर्ज्ञाता भवति [16]तदा चान्यत्राप्यच्त्वव्यपदेशेषु सवर्णत्वेन ग्राहकं भविष्यतीति, नैवात्र ग्रहणं न प्रतिषेधः। अत्र च नेकारो[17] गृहीतो नापि [18]शकार इति इकारशकारयोः प्रतिषिद्धा सवर्णसंज्ञा। [19]ईकारशकारयोस्तुल्यत्वात्सावर्ण्यमिति कुमारी शेत इति सावर्ण्यकार्यमेकादेशः प्राप्नोति, अजधिकारान्निवर्त्यते।

## यथैव तर्हि (इकारः) शकारं न गृह्णाति एवमीकारमपि न गृह्णीयात्।

एवं मन्यते—यत्र यत्र सवर्णसंशब्दनं तत्र तत्र चक्रकं वर्तत इति [20]वर्णानामुपदेशादित्येव नास्ति ग्रहणम्। ते हि एतदर्था उपादीयन्ते यथा कपालावस्थायां घट [21]एव नास्ति कुतस्तस्य कार्यविरो(ध)ः। ये तु प्रदेशा "अकः सवर्णे दीर्घ" (सू. ६. १. १०१) इति न ते एतदर्थाः, इदमेव तदर्थमिति किमिति ग्रहणं न भविष्यति[22]। अतोऽनेनोपायेनैतत्कथयति[23]—इह विषये ग्रहणमिहाग्रहणमिति।

---

[1] Ms पाणिनीया [2] Ms या [3] Ms-यत्रा
[4] Ms-सत्माप्ता [5] Ms-स्या [6] Ms-नाद्वाह्यस्य
[7] Ms निज्ञते [8] Ms मनय [9] Ms भदा-
[10] Ms यत्रैयता च वस्त्वणिति [11] Edn omits च [12] Ms नापाठः
[13] Ms-क्रमा [14] Ms-ष्ट- [15] Ms-ज्ञाते
[16] Ms तवा याव्यन्यात्यच्त्व- [17] Ms-रे [18] Ms हकारं [19] Ms हकार
[20] Ms वर्णानो- [21] Ms एंव [22] Ms-ष्येति [23] Ms-थर्यति।

अपर आह ।

[1]सर्वमेतत्समानं, एतावानस्ति[2] विशेषः—[3]सिद्धेरनच्त्वं [4]हेतुरनच्त्वस्य वाक्यापरिसमाप्तिः । अत्र तु साध्यस्य भिन्नत्वात् [5]हेतुविकल्पो न युज्यते इत्याह—

अस्मिन् पक्षे वेत्येतदसमर्थितं भवति ।

एतच्च समर्थितम् ।

वाक्यशेष उपादास्यते प्रतिज्ञाविकल्पार्थमित्यभिप्रायः । वाक्यापरिसमाप्तेरनच्त्वाद्वा[6] सिद्धं, यदि वा ग्रहणमिकारेण शकारस्येति ।

ननु च भेदो भवति ।

अभ्युपगम्य श्रुतिकृतं भेदं इदमुच्यते ।

विभाषा द्विर्वचनम्[7] ।

"यरोऽनुनासिकेऽनुनासिको वा" (सू. ८. ४. ४५) इति [8]वर्तते ।

स एष कथं भेदो न स्यात् ।

अस्त्येव भेद इत्यर्थः । इतर आह—

यदि नित्यो लोपः स्यात् ।

स्याद्भेदः ।

किं तु विभाषा (स) लोपः ।

"झयो होऽन्यतरस्याम्" (सू. ८. ४. ६२) इति वर्तते । एवं चेत् यथा-भेद आवयोस्तथा शास्त्रमवस्थितम्[9] । अपरेषां व्याख्यानं—

स [10]एष कथं भेदो नेति ।

एतावति स्थिते पक्षे इतर आह[11]—

[12]स्याद्यदि नित्यो लोपः स्यात् ।

स्यादेष भेदो यदि[12] नित्यो[13] (लोपः) स्यादिति ॥

॥ इति भर्तृहरिटीकायां चतुर्थमाह्निकम् ॥

---

[1] Ms सर्वा- [2] Ms-नस्तु [3] Ms सिद्धेरनज्ञत्वं
[4] Ms हेतुरने- [5] Ms हेतुर्विकल्पेन [6] Ms-त्वात् द्वा
[7] Ms-चनो [8] Ms त्वर्तते [9] Ms-स्त्रवमस्थितं
[10] Ms-यव [11] Ms-हा [12] Ms चदि
[13] Ms नित्योः